॥ श्री गणेशायनमः ॥

स्कन्दपुराणस्थब्रह्मखण्डेतृतीयं चातुर्मास्यमाहात्म्यम्

—:०:—

प्रथमोऽध्यायः

चातुर्मास्यस्नानमहत्त्ववर्णनम्

नारद उवाच

देवदेव महाभाग व्रतानि सुबहून्यपि । श्रुतानि त्वन्मुखाद् ब्रह्मन्नतृप्तिमधिगच्छति
अधुना श्रोतुमिच्छामि चातुर्मास्यव्रतं शुभम् ॥ २ ॥

ब्रह्मोवाच

शृणु देवमुने! मत्तश्चातुर्मास्यव्रतं शुभम् । यत्कृत्वाभारते खण्डे नृणांमुक्तिर्नदुर्लभा
मुक्तिप्रदोऽयं भगवान् संसारोत्तारकारणम् । यस्यस्मरणमात्रेण सर्वपापैः प्रमुच्यते
मानुष्यं दुर्लभं लोके तत्राऽपिच कुलीनता । तत्रापि सदयत्वञ्च तत्र सत्सङ्गमःशुभः

सत्सङ्गमो न यत्राऽस्ति विष्णुभक्तिर्व्रतानि च ।
चातुर्मास्ये विशेषेण विष्णुव्रतकरः शुभः ॥ ६ ॥
चातुर्मास्येऽव्रती यस्तु तस्य पुण्यं निरर्थकम् ।
सर्वतीर्थानि दानानि पुण्यान्यायतनानि च ॥ ७ ॥

विष्णुमाश्रित्यतिष्ठन्तिचातुर्मास्येसमागते । सुपुष्टेनापिदेहेन जीवितन्तस्यशोभनम्

चातुर्मास्ये समायातेहरिर्यः प्रणमेद् बुधः । कृतार्थास्तस्यविबुधायावज्जीवम्वरप्रदाः
सम्प्राप्यमानुषं जन्म चातुर्मास्यपराङ्मुखः । तस्य पापशतान्याहुर्देहस्थानिनसंशयः
मानुष्यं दुर्लभं लोके हरिभक्तिश्च दुर्लभा । चातुर्मास्ये विशेषेण सुप्ते देवे जनार्दने
चातुर्मास्ये नरः स्नानं प्रातरेव समाचरेत् । सर्वक्रतुफलम्प्राप्य देववद्दिवि मोदते

चातुर्मास्ये नदीस्नानं कुर्यात्सिद्धिमवाप्नुयात् ।
तथा निर्झरणे स्नाति तडागे कूपिकासु च ॥ १३ ॥

तस्य पापसहस्राणि विलयं यान्ति तत्क्षणात् । पुष्करेचप्रयागेवायत्रक्वापिमहाजले

चातुर्मास्येषु यः स्नाति पुण्यसङ्ख्या न विद्यते ॥ १४ ॥

रेवायां भास्करक्षेत्रेप्राच्यांसागरसङ्गमे । एकाहमपि यः स्नातश्चातुर्मास्येनदोषभाक्
दिनत्रयञ्च यः स्नाति नर्मदायांसमाहितः । सुप्ते देवे जगन्नाथे पापं याति सहस्रधा

पक्षमेकं तु यः स्नाति गोदावर्यां दिनोदये ।
स भित्त्वा कर्मजं देहं याति विष्णोः सलोकताम् ॥ १७ ॥

तिलोदकेनयःस्नाति तथा चैवामलोदकैः । विल्वपत्रोदकैश्चैवचातुर्मास्येनदोषभाक्
गङ्गां स्मरन्ति यो नित्यमुदपानसमीपतः । तद्गाङ्गेयंजलंजातं तेन स्नानं समाचरेत्
गङ्गाऽपिदेवदेवस्यचरणाङ्गुष्ठवाहिनी । पापघ्नीसासदा प्रोक्ता चातुर्मास्येविशेषतः

यतः पापसहस्राणि विष्णुर्दहति संस्मृतः ।
तस्मात्पादोदकं शीर्षे चातुर्मास्ये धृतं शिवम् ॥ २१ ॥
चातुर्मास्ये जलगतो देवो नारायणो भवेत् ।
सर्वतीर्थाधिकं स्नानं विष्णुतेजोंशसङ्गतम् ॥ २२ ॥

स्नानं दशविधंकार्यं विष्णुनाममहाफलम् । सुप्ते देवे विशेषेण नरो देवत्वमाप्नुयात्
विनास्नानंतुयत्कर्मपुण्यकार्यमयंशुभम् । क्रियतेनिष्फलं ब्रह्मंस्तत्प्रगृह्णन्तिराक्षसाः

स्नानेन सत्यमाप्नोति स्नानं धर्मः सनातनः ।
धर्मान्मोक्षफलम्प्राप्य पुनर्नैवाऽवसीदति ॥ २५ ॥

ये चाध्यात्मविदः पुण्या ये च वेदाङ्गपारगाः । सर्वदानप्रदाये च तेषां स्नानेनशुद्धता

कृतस्नानस्य च हरिर्देहमाश्रित्यतिष्ठति । सर्वक्रियाकलापेषु सम्पूर्णफलदो भवेत्
सर्वपापविनाशाय देवतातोषणाय च । चातुर्मास्ये जलस्नानं सर्वपापक्षयावहम्

निशायाञ्चैव न स्नायात्सन्ध्यायां ग्रहणम्विना ।
उष्णोदकेन न स्नानं रात्रौ शुद्धिर्न जायते ॥ २६ ॥

भानुसन्दर्शनाच्छुद्धिर्विहिता सर्वकर्मसु । चातुर्मास्ये विशेषेणजलशुद्धिस्तुभाविनी

अशक्तया तु शरीरस्य भस्मस्नानेन शुध्यति ।
मन्त्रस्नानेन विप्रेन्द्र! विष्णुपादोदकेन वा ॥ ३१ ॥

नारायणाग्रतःस्नानं क्षेत्रतीर्थनदीषुच । यः करोतिविशुद्धात्माचातुर्मास्ये विशेषतः

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे
ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये स्नानमहत्त्ववर्णनंनाम
प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

नियमविधिमाहात्म्यवर्णनम्

ब्रह्मोवाच

पितॄणांतर्पणं कुर्याच्छ्रद्धायुक्तेन चेतसा । स्नानावसाने नित्यंचसुप्ते देवेमहाफलम्
सङ्गमेसरितां तत्र पितॄन्संतर्प्य देवताः । जपहोमादिकर्माणि कृत्वा फलमनन्तकम्

गोविन्दस्मरणं कृत्वा पश्चात्कार्याः शुभाः क्रियाः ।
एष एव पितृदेवमनुष्यादिषु तृप्तिदः ॥ ३ ॥

श्रद्धांधर्मयुतांनाम स्मृतिपूतानिकारयेत् । कर्माणिसकलानीह चातुर्मास्येगुणोत्तरे
सत्सङ्गोद्विजभक्तिश्च गुरुदेवाग्नितर्पणम् । गोप्रदानंवेदपाठः सत्क्रियासत्यभाषणम्

गोभक्तिर्दानभक्तिश्चसदा धर्मस्य साधनम् । कृष्णेसुप्तेविशेषेण नियमोऽपिमहाफलः

नारद उवाच

नियमः कादृशो ब्रह्मन् फलंच नियमेन किम् । नियमेन हरिस्तुष्टो यथा भवतितद्वद

ब्रह्मोवाच

नियमश्चगुरादीनांक्रियासुविविधासुच । कार्योविद्य वतापुंसातत्प्रयोगान्महासुखम्
एतत्षड्वर्गहरणं रिपुनिग्रहणं परम् । अध्यात्ममूलमेतद्धि परमं सौख्यकारणम् ॥
तत्र तिष्ठन्तिनियतं क्षमासत्यादयोगुणाः । विवेकरूपिणः सर्वे तद्विष्णोःपरमंपदम्
कृतं भवति यज्ञायं कृतकृत्यत्वमत्र तत् । स्यात्तस्य तत्पूर्वजानां येन ज्ञातमिदं पदम्
तन्मुहूर्तमपिध्यात्वा पापंजन्मशतोद्भवम् । भस्मसाद्याति विहितंनिरञ्जननिषेवणात्
प्रत्यहंसङ्कुचद्यस्य क्षुत्पिपासादिकःश्रमः । सयोगीनियमीनित्यं हरौसुप्तेविशिष्यते

चातुर्मास्ये नरो भक्त्या योगाभ्यासरतो न चेत् ।
तस्य हस्तात्परिभ्रष्टममृतं नात्र संशयः ॥ १४ ॥

मनोनियमितंयेन सर्वेच्छासु सदागतम् । तस्य ज्ञाने च मोक्षे च कारणं मन एव हि
मनोनियमने यत्नः कार्यः प्रज्ञावतासदा । मनसा सुगृहीतेन ज्ञानाप्तिरखिला ध्रुवम्
तन्मनः क्षमया ग्राह्यं यथावह्निश्च वारिणा । एकया क्षमया सर्वो नियमःकथितोबुधैः
सत्यमेकं परो धर्मः सत्यमेकं परं तपः । सत्यमेकं परं ज्ञानं सत्ये धर्मः प्रतिष्ठितः
धर्ममूलमहिंसा च मनसातां च चिन्तयन् । कर्मणा च तथावाचातत एतांसमाचरेत्
परस्वहरणं चौर्यं सर्वदा सर्वमानुषैः । चातुर्मास्ये विशेषेण ब्रह्मदेवस्ववर्जनम् ॥
अकृत्यकरणं चैव वर्जनीयं सदाबुधैः । अनीहः सर्वकार्येषु यः सदा विप्रवर्तते ॥
स च योगी महाप्राज्ञः प्रज्ञाचक्षुरहं न धीः । अहङ्कारो विरमिदं शरीरे वर्तते नृणाम्

तस्मात्स सर्वदा त्याज्यः सुप्ते देवे विशेषतः ।
अनीहया जितक्रोधो जितलोभो भवेन्नरः ॥ २३ ॥

तस्य पापसहस्राणि देहाद्यान्ति सहस्रधा । मोहं मानं पराजित्य शमरूपेण शत्रुणा
विचारेण शमोग्राह्यः सन्तोषेणतथाहिंसः । मात्सर्यमृजुभावेन नियच्छेत्समुनीश्वरः

चातुर्मास्ये दयाधर्मो न धर्मो भूतविद्रुहम् । सर्वदा सर्वमासेषु भूतद्रोहं विवर्जयेत्
एतत्पापसहस्राणां मूलं प्राहुर्मनीषिणः । तस्मात्सर्वप्रयत्नेन कार्या भूतदया नृभिः
सर्वेषामेव भूतानां हरिर्नित्यं हृदि स्थितः । स एव हि पराभूतोयो भूतद्रोहकारकः
यस्मिन् धर्मे दयानैव स धर्मोदूषितो मतः । दयां विना न विज्ञानं न धर्माज्ञानमेवच

तस्मात्सर्वात्मभावेन दयाधर्मः सनातनः ।
सेव्यः स पुरुषैर्नित्यं चातुर्मास्ये विशेषतः ॥ ३० ॥

इतिश्री स्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये नियमविधिमाहात्म्य वर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

दानमहिमावर्णनम्

ब्रह्मोवाच

दानधर्मं प्रशंसन्ति सर्वधर्मेषु सर्वदा । हरौ सुप्ते विशेषेण दानं ब्रह्मत्वकारणम् ॥
अन्नं ब्रह्मइति प्रोक्तमन्ने प्राणाः प्रतिष्ठिताः । तस्मादन्नप्रदो नित्यं वारिदश्च भवेन्नरः
वारिदस्तृप्तिमायाति सुखमक्षय्यमन्नदः । वार्यन्नयोः समं दानं न भूतं न भविष्यति
मणिरत्नप्रवालानां रूप्यहाटकवाससाम् । अन्येषामपि दानानामन्नदानं विशिष्यते
अन्नोदकप्रदानं च गोप्रदानं च नित्यदा । वेदपाठो वह्निहोमश्चातुर्मास्ये महाफलम्
वैकुण्ठपदवाञ्छा चेद्विष्णुना सह सङ्गमे । सर्वपापक्षयार्थाय चातुर्मास्येऽन्नदोभवेत्
सत्यं सत्यं हि देवर्षे! मयोक्तं तव नारद । जन्मान्तरसहस्रेषु नाऽदत्तमुपतिष्ठते ॥ ७
तस्मादन्नप्रदानेन सर्वे हृष्यन्ति जन्तवः । देवा वै स्पृहयन्त्येनमन्नदानप्रदायिनम् ॥
आज्यं देयं च पात्रेषु श्रद्धया वज्रमिश्रितम् । वज्रदानकरो मर्त्यश्चातुर्मास्येन मानवः

भोजने गुरुविप्राणां घृतदानं च सत्क्रिया ।

एतानि यस्य तिष्ठन्ति चातुर्मास्येन मानवः ॥ १० ॥

सद्धर्मः सत्कथाचैव सत्सेवा दर्शनं सताम् । विष्णुपूजारतिर्दाने चातुर्मास्येषुदुर्लभा
पितॄनुद्दिश्ययोमर्त्यश्चातुर्मास्येऽन्नदोभवेत् । सर्वपापविशुद्धात्मापितृलोकमवाप्नुयात्

देवाः सर्वेऽन्नदानेन तृप्ता यच्छन्ति वाञ्छितम् ।

पिपीलिकाऽपि तद्गेहाद्भक्ष्यमादाय गच्छति ॥ १३ ॥

रात्रौ दिवा निषिद्धान्नो अन्नदानमनुत्तमम् । हरौ सुप्ते हि पापघ्नं न वार्यमपिशत्रुषु
चातुर्मास्ये दुग्धदानं दधितक्रं महाफलम् । जन्मकाले येनबद्धः पिण्डस्तद्दानमुत्तमम्
शाकप्रदाता नरकं यमलोकं न पश्यति । वस्त्रदः सोमलोकं च वसेदाभूतसंप्लवम्
सुप्ते देवे यथाशक्ति ह्यन्यासु प्रतिमासु च । पुष्पवस्त्रप्रदानेन सन्तानं नैव हीयते
चन्दनागुरुधूपं च चातुर्मास्ये प्रयच्छति । पुत्रपौत्रसमायुक्तो विष्णुरूपो भवेन्नरः
सुप्ते देवे जगन्नाथे फलदानं प्रयच्छति । विप्राय वेदविदुषे यमलोकं न पश्यति
विद्यादानं च गोदानं भूमिदानं प्रयच्छति । विष्णुप्रीत्यर्थमेवेह स तारयतिपूर्वजान्
गुडसैन्धवतैलादिमधुतिक्ततिलान्नदः । देवतायास्समुद्दिश्य तासां लोकं प्रयाति हि

चातुर्मास्ये तिलान् दत्वा न भूयः स्तनपो भवेत् ।

यवप्रदाता वसते वासवं लोकमक्षयम् ॥ २२ ॥

हूयेतहव्यंवह्नौ च दानंदद्याद्द्विजातये । गावः सुपूजिताः कार्याश्चातुर्मास्येविशेषतः
यत्किञ्चित्सुकृतं कर्मजन्मावधिसुसञ्चितम् । चातुर्मास्येगतेपात्रे विषुवेयत्प्रदीयते
प्रणश्यति क्षणादेव वचनाद्यस्तु प्रच्युतः । दिवसे दिवसे तस्यवर्द्धते च प्रतिश्रुतम्

तस्मान्नैव प्रतिश्राव्यं स्वल्पमप्याशु दीयते ।

तावद्विवर्द्धते दानं यावत्तन्न प्रयच्छति ॥ २६ ॥

योमोहान्मनुजोलोके यावत्कोटिगुणंभवेत् । ततोदशगुणाद्वृद्धिश्चातुर्मास्येप्रदातरि
नरके पतनं तस्य यावदिन्द्राश्चतुर्दश । अतस्तुसर्वदादेयंनरैर्यत्तुप्रतिश्रुतम् ॥ २८
अन्यस्मैन प्रदातव्यं प्रदत्तं नैवहारयेत् । चातुर्मास्येषुयःशय्यांद्विजाग्र्याय प्रयच्छति

वेदोक्तेन विधानेन न सयातियमालयम् । आसनंवारिपात्रं च भोजनंताम्रभाजनम्
चातुर्मास्ये प्रयत्नेन देयं वित्तानुसारतः । सर्वदानानि विप्रेभ्यो ददेत्सुप्ते जगद्गुरौ
आत्मानं पूर्वजैःसार्द्धं समोचयतिपातकात् । गौर्भूश्चतिलपात्रंच दीपदानमनुत्तमम्

ददेद् द्विजातये मुक्तो जायते स ऋणत्रयात् ॥ ३२ ॥

स विश्वकर्ता भुवनेषु गोप्ता स यज्ञभुक् सर्वफलप्रदश्च ।

दानानि वस्तुष्वधिदैवतं च यस्मिन्समुद्दिश्य ददाति मुक्तः ॥ ३३ ॥

इतिश्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे
ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये दानमहिमावर्णनं नाम
तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

इष्टवस्तुपरित्यागमहिमावर्णनम्

ब्रह्मोवाच

इष्टवस्तुप्रदोविष्णुर्लोकश्चेष्टरुचिः सदा । तस्मात्सर्वप्रयत्नेन चातुर्मास्येत्यजेच्चतत्

नारायणस्य प्रीत्यर्थं तदेवाक्षय्यमाप्यते ।

मर्त्यस्त्यजति श्रद्धावान् सोऽनन्तफलभाग् भवेत् ॥ १ ॥

कांस्यभोजनसन्त्यागाज्जायते भूपतिर्भुवि । पालाशपत्रेभुञ्जानो ब्रह्मभूयस्त्वमश्नुते
ताम्रपात्रेन भुञ्जीत कदाचिद्विद्यागृहीनरः । चातुर्मास्ये विशेषेणताम्रपात्रं विवर्जयेत्
अर्कपत्रेषु भुञ्जानोऽनुपमं लभतेफलम् । वटपत्रेषु भोक्तव्यं चातुर्मास्ये विशेषतः
अश्वत्थपत्रसम्भोगःकार्योबुधजनैःसदा । एकान्नभोजीराजास्यात्सकलेभूमिमण्डले
तथा च लवणत्यागात्सुभगोजायते नरः । गोधूमान्नपरित्यागाज्जायते जनवल्लभः

अशाकभोजी दीर्घायुश्चातुर्मास्येऽभिजायते ।

रसत्यागान्महाप्राणी मधुत्यागात्सुलोचनः ॥ ७ ॥

मुद्गत्यागाद्रिपुमृती राजमाषाद्धनाढ्यता ।

अश्वामिस्तण्डुलत्यागाच्चातुर्मास्येऽसिजायते ॥ ८ ॥

फलत्यागाद्बहुसुतस्तैलत्यागात्सुरूपता । ज्ञानी तु वारिसन्त्यागाद्बलं वीर्यं सदैव हि

मार्गमांसपरित्यागान्नरकं न च पश्यति । शौकरस्य परित्यागाद्ब्रह्मवासमवाप्यते

ज्ञानं लावकसन्त्यागादाज्यत्यागे महत्सुखम् ।

आसवं सम्परित्यज्य मुक्तिस्तस्य न दुर्लभा ॥ ११ ॥

सबलः कनकत्यागाद्रूप्यत्यागेन मानुषः । दधिदुग्धपरित्यागी गोलोकेसुखभाग्भवेत्

ब्रह्मा पायससन्त्यागात्क्षीरत्यागान्महेश्वरः ।

कन्दर्पोऽपूपसन्त्यागान्मोदकत्याजकः सुखी ॥ १३ ॥

गृहाश्रमपरित्यागी बाह्याश्रमनिषेवकः । चातुर्मास्येहरिप्रीत्यै न मातुर्जठरेशिशुः

नृपो मरीचसन्त्यागाच्छुण्ठीत्यागेन सत्कविः ।

शर्करायाः परित्यागाज्जायते राजपूजितः ॥ १५ ॥

गुडत्यागान्महाभूतिस्तथा दाडिमवर्जनात् । रक्तवस्त्रपरित्यागाज्जायते जनवल्लभः

पट्टकूलपरित्यागादक्षय्यं स्वर्गमाप्यते । माषान्नचणकान्नस्य त्यागान्नैव पुनर्भवः

कृष्णवस्त्रं सदात्याज्यंचातुर्मास्येविशेषतः । सूर्यसन्दर्शनाच्छुद्धिर्नीलवस्त्रस्यदर्शनात्

चन्दनस्य परित्यागाद्गान्धर्वं लोकमश्नुते । कर्पूरस्य परित्यागाद्यावज्जीवंमहाधना

कुसुम्भस्य परित्यागान्नैवपश्येद्यमालयम् । केशरस्यपरित्यागान्मनुष्योराजवल्लभः

यक्षकर्दमसन्त्यागाद्ब्रह्मलोकेमहीयते । जातीपुष्पपरित्यागाच्छय्यात्यागेमहत्सुखम्

भार्यावियोगंनाप्नोतिचातुर्मास्येन संशयः । अलीकवादसन्त्यागान्मोक्षद्वारमपावृतम्

परमर्मप्रकाशश्च सद्यः पापसमागमः । चातुर्मास्ये हरौ सुप्ते परनिन्दांविवर्जयेत्

परनिन्दा महापापं परनिन्दा महाभयम् । परनिन्दामहद् दुःखं नतस्याःपातकंपरम्

केवलं निन्दने चैवतत्पापं लभते गुरु । यथा शृणवान एव स्यात्पातकी न ततःपरः

केशसंस्कारसन्त्यागात्तापत्रयविवर्जितः । नखरोमधरोयस्तु हरौ सुप्ते विशेषतः

दिवसे दिवसे तस्य गङ्गास्नानफलं भवेत् ॥ २७ ॥

सर्वोपायैर्विष्णुरेव प्रसाद्यो योगिध्येयः प्रवरैः सर्ववर्णैः ।

विष्णोर्नाम्ना मुच्यते घोरबन्धाच्चातुर्मास्ये स्मर्यतेऽसौ विशेषात् ॥ २८

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे

ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्य इष्टवस्तुपरित्यागमहिमा-

वर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

व्रतमहिमावर्णनम्

नारद उवाच

कदा विधिनिषेधौ च कर्त्तव्यौ विष्णुसन्निधौ ।

युष्मद्वाक्यामृतं पीत्वा तृप्तिर्मम न विद्यते ॥ १ ॥

ब्रह्मोवाच

कर्कसंक्रान्तिदिवसे विष्णुं सम्पूज्य भक्तितः ।

फलैरर्घः प्रदातव्यः शस्तजम्बूफलैः शुभैः ॥ २ ॥

जम्बूद्वीपस्य सञ्ज्ञेयं फलेन च विजायते । मन्त्रेणानेन विप्रेन्द्रश्रद्धाधर्मसुसंयुतैः

षण्मासाभ्यन्तरे मृत्युर्यत्र क्वापिभवेन्मम । तन्मयावासुदेवायस्वयमात्मानिवेदितः

इति मन्त्रेणाऽर्घ्यम्

ततो विधिनिषेधौ चग्राह्यौभक्त्याहरेःपुरः । चातुर्मास्येसमायातेसर्वलोकमहासुखे

विधिर्वेदविधिःकार्योनिषेधोनियमोमतः । विधिश्चैवनिषेधश्चद्वावेतौविष्णुरेवहि

तस्मात्सर्वप्रयत्नेन सेव्य एव जनार्दनः ।

विष्णोः कथा विष्णुपूजा ध्यानं विष्णोर्नतिस्तथा ॥ ७ ॥

सर्वमेव हरिप्रीत्या यः करोति स मुक्तिभाक् ।
वर्णाश्रमविधेर्मूर्तिः सत्यो विष्णुः सनातनः ॥ ८ ॥
चातुर्मास्ये विशेषेण जन्मकष्टादिनाशनम् । हरिरेव व्रताद् ग्राह्यो व्रतं देहेन कारयेत्
देहोऽयं तपसा शोध्यः सुप्ते देवे तपोनिधौ ।

नारद उवाच

किं व्रतं किं तपः प्रोक्तं ब्रह्मन्ब्रूहि सविस्तरम् ।
सुप्ते देवे मया कार्यं कृतं यच्च महाफलम् ॥ १० ॥

ब्रह्मोवाच

व्रतंविष्णुव्रतंविद्धिविष्णुभक्तिसमन्वितम् । तपश्चधर्मवर्त्तित्वंकृच्छ्रादिकमथापिवा
शृणुव्रतस्य माहात्म्यं वक्ष्यामि प्रथमं तव । ब्रह्मचर्यव्रतं सारं व्रतानामुत्तमं व्रतम्
ब्रह्मचर्यं तपःसारं ब्रह्मचर्यं महत्फलम् । क्रियासु सकलास्वेव ब्रह्मचर्यं विवर्द्धयेत्
ब्रह्मचर्यप्रभावेण तप उग्रं प्रवर्त्तते । ब्रह्मचर्यात्परं नास्ति धर्मसाधनमुत्तमम् ॥ १४ ॥
चातुर्मास्ये विशेषेण सुप्ते देवेगुणोत्तरम् । महाव्रतमिदं लोके तन्निबोध सदाद्विज
नारायणमिदंकर्म यः करोति न लिप्यते । शतत्रयं षष्टियुतं दिनमाहुश्च वत्सरे ॥
तत्र नारायणोदेवः पूज्यतेव्रतकारिभिः । सत्क्रियाममुकींदेवकारयिष्यामिनिश्चयः
कुरुते तद्व्रतं प्राहुः सुप्ते देवेगुणोत्तरम् । वह्निहोमोविप्रभक्तिःश्रद्धा धर्मे मतिःशुभा
सत्सङ्गो विष्णुपूजा च सत्यवादो दया हृदि ।
आर्जवं मधुरा वाणी सच्चरित्रे सदा रतिः ॥ ११ ॥
वेदपाठस्तथास्तेयमहिंसाह्रीःक्षमादमः । निर्लोभताऽक्रोधता च निर्मोहोयमतारतिः
श्रुतिक्रियापरंज्ञानं कृष्णार्पितमनोगतिः । एतानि यस्य तिष्ठन्ति व्रतानिब्रह्मवित्तम
जीवन्मुक्तो नरः प्रोक्तो नैव लिप्यति पातकैः । व्रतं कृतं सकृदपिसदैवहिमहाफलम्
चातुर्मास्ये विशेषेण ब्रह्मचर्यादिसेवनम् । अव्रतेनगतं येषां चातुर्मास्यंसदानृणाम्
धर्मस्तेषां वृथा सद्भिस्तत्त्वज्ञैःपरीकीर्त्तितः । सर्वेषामेववर्णानां व्रतचर्यामहाफलम्
स्वल्पाऽपि विहिता वत्स! चातुर्मास्ये सुखप्रदा ।

सर्वत्र दृश्यते विष्णुर्व्रतसेवापरैर्नृभिः ॥ २५ ॥
चातुर्मास्ये समायाते पालयेत्तत्प्रयत्नतः ॥ २६ ॥
भजस्व विष्णुं द्विजवह्नितीर्थं वेदप्रभेदमयमूर्तिमजं विराजम् ।
यत्प्रसादाद् भवति मोक्षमहातरुस्थस्तापं नयास्यति स चार्कसमुद्भवन्तम्॥
इतिश्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे
ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये व्रतमहिमावर्णनं नाम
पञ्चमोऽध्यायः॥ ५ ॥

षष्ठोऽध्यायः

तपोमहिमावर्णनम्

ब्रह्मोवाच

तपः शृणुष्व विप्रेन्द्र विस्तरेण महामते !। यस्यश्रवणमात्रेणच्चातुर्मास्येऽघनाशनम्
षोडशेनोपचारेण विष्णोः पूजासदातपः । ततः सुप्ते जगन्नाथे महत्तप उदाहृतम्
करणं पञ्चयज्ञानां सततं तप एव हि । तन्निवेद्य हरौचैव चातुर्मास्ये महत्तपः
ऋतुयानं गृहस्थस्य तप एव सदैव हि । चातुर्मास्ये हरिप्रीत्यै तन्निषेव्यं महत्तपः
सत्यवादस्तपो नित्यं प्राणिनाम्भुवि दुर्लभम् ।
सुप्ते देवपतौ कुर्वन्ननन्तफलभाग्भवेत ॥ ५ ॥
अहिंसादिगुणानाञ्च पालनं सततं तपः । चातुर्मास्ये त्यक्तवैरं महत्तप उदाहृतम्
तप एव महन्मर्त्यः पञ्चायतनपूजनम् । चातुर्मास्ये विशेषेण हरिप्रीत्या समाचरेत्

नारद उवाच

पञ्चायतनसञ्ज्ञेयं कस्योक्तासा कथम्भवेत् । कथं पूजाचकर्त्तव्याविस्तरेणाऽशुतद्वद

ब्रह्मोवाच

प्रातर्मध्याह्नपूजायां मध्येपूज्योरविःसदा। रात्रौ मध्ये भवेच्चन्द्रस्तद्वर्णकुसुमैः शुभैः
वह्निकोणे तु हेरम्बं सर्वविघ्नोपशान्तये। रक्तचन्दनपुष्पैश्च चातुर्मास्ये विशेषतः
नैरृतं दलमास्थाय भगवान् दुष्टदर्पहा। गृहस्थस्यसदा शत्रुविनाशं विदधातिसः
नैरृत्यकोणगं विष्णुं पूजयेत्सर्वदा बुधः। सुगन्धचन्दनैः पुष्पैर्नैवेद्यैश्चातिशोभनैः
गोत्रजा वायुकोणे तु पूजनीया सदाबुधैः। पुत्रपौत्रप्रवृद्ध्यर्थं सुमनोभिर्मनोहरैः

ऐशाने भगवान् रुद्रः श्वेतपुष्पैः सदार्चितः।
अपमृत्युविनाशाय सर्वदोषापनुत्तये ॥ १४ ॥

जागर्ति महिमा तेषां ब्रह्माद्यैर्नैव लिख्यते। पञ्चायतनमेतद्धि पूज्यते गृहमेधिभिः
तप एतत्सदा कार्यं चातुर्मास्ये महाफलम्। पर्वकालेषु सर्वेषु दानंदेयंतपः सदा

चातुर्मास्ये विशेषेण तदनन्तं प्रजायते ॥ १६ ॥

शौचं तु द्विविधं ग्राह्यं बाह्यमाभ्यन्तरं सदा।
जलशौचं तथा बाह्यं श्रद्धया चान्तरम्भवेत् ॥ १७ ॥

इन्द्रियाणां ग्रहःकार्यस्तपसोलक्षणं परम्। निवृत्त्येन्द्रियलौल्यञ्च चातुर्मास्येमहत्तपः
इन्द्रियाश्वान् सन्नियम्य सततंसुखमेधते। नरके पात्यते प्राणैस्तैरेवोत्पथगामिभिः

ममतारूपिणीं ग्राहीं दुष्टां निर्भर्त्स्य निग्रहेत्।
तप एव सदा पुंसां चातुर्मास्येऽधिगौरवम् ॥ २० ॥

काम एव महाशत्रुस्तमेकंनिर्जयेद्दृढम्। जितकामा महात्मानस्तैर्जितंनिखिलञ्जगत्
एतच्च तपसोमूलं तपसो मूलमेवतत्। सर्वदा कामविजयः सङ्कल्पविजयस्तथा ॥
तदेव हि परं ज्ञानं कामो येन विर्जीयते। महत्तपस्तदेवाहुश्चातुर्मास्ये फलोत्तमम्

लोभः सदा परित्याज्यः पापं लोभे समास्थितम्।
तपस्तस्यैव विजयश्चातुर्मास्ये विशेषतः ॥ २४ ॥

मोहः सदा विवेकश्चवर्जनीयःप्रयत्नतः। तेन त्यक्तोनरोज्ञानी न ज्ञानीमोहसंश्रयात्
मद एव मनुष्याणां शरीरस्थोमहारिपुः। सदा स एव निग्राह्यः सुप्ते देवे विशेषतः
मानः सर्वेषु भूतेषु वसत्येव भयावहः। क्षमयातंविनिर्जित्य चातुर्मास्ये गुणाधिकः

मात्सर्यं निर्जयेत्प्राज्ञोमहापातककारणम्। चातुर्मास्ये जितं तेन त्रैलोक्यममरैःसह

अहङ्कारसमाक्रान्ता मुनयो विजितेन्द्रियाः।
धर्ममार्गम्परित्यज्य कुर्वन्त्युन्मार्गजां क्रियाम् ॥ २६ ॥

अहङ्कारं परित्यज्यसततंसुखमाप्नुयात्। चातुर्मास्येविशेषेणतस्य त्यागोमहाफलम्
एतद्धि तपसोमूलं यदेतन्मनसस्त्यजेत्। त्यक्तेष्वेतेषु सर्वेषु परब्रह्ममया भवेत् ॥
प्रथमं कायशुद्ध्यर्थं प्राजापत्यं समाचरेत्। शयने देवदेवस्य विशेषेण महत्तपः ॥
हरेस्तुशयनेनित्यमेकान्तरमुपोषणम्। यः करोति नरोभक्त्यानस गच्छेद्यमालयम्
हरिस्वापे नरो नित्यमेकभक्तंसमाचरेत्। दिवसे दिवसे तस्य द्वादशाहफलंलभेत्
चातुर्मास्ये नरो यस्तु शाकाहारपरो यदि। पुण्यं क्रतुसहस्राणां जायतेनात्रसंशयः
चातुर्मास्येनरोनित्यंचान्द्रायणव्रतश्चरेत्। मासैकमासितत्पुण्यं वर्णितुं नैव शक्यते
सुप्ते देवे च पाराकंयःकरोतिविशुद्धधीः। नारी वा श्रद्धया युक्ताशतजन्माघनाशनम्
कृच्छ्रसेवीभवेद्यस्तु सुप्ते देवे जनार्दने। पापराशिं विनिर्धूय वैकुण्ठे गणताम्व्रजेत्
तप्तकृच्छ्रपरोयस्तु सुप्ते देवे जनार्दने। कीर्तिसम्प्राप्यवापुत्रं विष्णुसायुज्यतांव्रजेत्

दुग्धाहारपरो यस्तु चातुर्मास्येऽभिजायते।
तस्य पापसहस्राणि विलयं यान्ति देहिनः ॥ ४० ॥

मिताल्पाशनकृद्धीरश्चातुर्मास्ये नरो यदि। निर्धूय सकलं पापं वैकुण्ठपदमाप्नुयात्
एकान्नाशनकृन्मर्त्यो न रोगैरभिभूयते। अक्षारलवणाशी च चातुर्मास्ये न पापभाक्
फलाहारी।महत्पापैर्निर्मुक्तो जायते ध्रुवम्। हरिमुद्दिश्य मासेषु चतुर्षु च न संशयः

कन्दमूलाशनकरः पूर्वजान सह आत्मना।
उद्धृत्य नरकाद् घोराद्याति विष्णुसलोकताम् ॥ ४४ ॥

नित्याम्बुप्राशनकरश्चातुर्मास्ये यदाभवेत्। दिनेदिनेऽश्वमेधस्यफलमाप्नोत्यसंशयः
शीतवृष्टिसहो यस्तुचातुर्मास्येनरोभवेत्। हरिप्रीत्यैजगन्नाथस्तस्यात्मानंप्रयच्छति
महापाराकसञ्ज्ञं तु महत्तप उदाहृतम्। मासैकमुपवासेन सर्वं पूर्णं प्रजायते ॥ ४७
देवस्वापदिनादौ तु यावत्पवित्रद्वादशी। पवित्रद्वादशीपूर्वं यावच्छ्रवणद्वादशी ॥

महापाराकमेतद्धि द्वितीयं परिकीर्तितम् । श्रवणद्वादशी पूर्वं प्राप्ता चाश्विनद्वादशी
महापाराकं तृतीयं प्राज्ञैश्चसमुदाहृतम् । आश्विनद्वादशी चादौ प्राप्ता देवसुबोधिनी
महापाराकमेतद्धि चतुर्थं परिकथ्यते । एतेषामेकमपि च नारी वा पुरुषोऽपि वा ॥
यः करोति नरोभक्त्या स च विष्णुः सनातनः । इदंचसर्वतपसां महत्तपउदाहृतम्
दुष्करं दुर्लभं लोके चातुर्मास्येमखाधिकम् । दिवसेदिवसेतस्ययज्ञायुतफलंस्मृतम्
महत्तप इदं येन कृतं जगति दुर्लभम् । इदमेव महापुण्यमिदमेव महत्सुखम् ॥ ५४ ॥
इदमेव परं श्रेयो महापाराकसेवनम् । नारायणो वसेद्देहे ज्ञानं तस्य प्रजायते ॥ ५५
जीवन्मुक्तः स भवति महापातककारकः । तावद्गर्जन्ति पापानि नरकास्तावदेव हि

तावन्माया सहस्राणि यावन्मासोपवासकः ।
चातुर्मास्युपवासी यो यस्य प्राङ्गणिको भवेत् ॥ ५७ ॥
सोऽपि हत्यासहस्राणि त्यक्त्वा निष्कल्मषो भवेत् ।
य इदं श्रावयेन्मर्त्या यः पठेत्सततं स्वयम् ॥ ५८ ॥
सोपि वाचस्पतिसमः फलं प्राप्नोत्यसंशयः ॥ ५९ ॥

इदं पुराणं परमं पवित्रं शृण्वन् गृणन् पापविशुद्धिहेतु ।
नारायणं तं मनसा विचिन्त्य मृतोऽभिगच्छत्यमृतं सुराधिकम् ॥ ६० ॥

इतिश्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां तृतीये ब्रह्मखण्डे
ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये तपोमहिमावर्णनंनाम
षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

तपोधिकारषाडशोपचारदीपमहिमावर्णनम्

नारद उवाच

उपचारैः षोडशभिः पूजनं क्रियते कथम् । ते के षोडशभावाःस्युर्नित्यंये शयनेहरेः
एतद्विस्तरतो ब्रूहि पृच्छतो मे प्रजापते !। तवप्रसादमासाद्यजगत्पूज्यो भवाम्यहम्

ब्रह्मोवाच

विष्णुभक्तिर्दृढा कार्या वेदशास्त्रविधानतः । वेदमूलमिदं सर्वं वेदोविष्णुःसनातनः
ते वेदा ब्राह्मणाधाराब्राह्मणाश्चाग्निदैवताः । अग्नौ प्रास्ताहुतिर्विप्रीयज्ञेदेवंयजन्तसदा

जगत्सन्धारयेत्सर्वं विष्णुपूजारतः सदा ।
नारायणः स्मृतो ध्यातः क्लेशदुःखादिनाशनः ॥ ५ ॥

चातुर्मास्ये विशेषेण जलरूपगतो हरिः । जलादन्नानि जायन्ते जगतां तृप्तिहेतवे ॥
विष्णुदेहांशसम्भूतं तदन्नं ब्रह्म इष्यते । तदन्नं विष्णवे दत्त्वा ह्यावाहनपुरःसरम् ॥
पुनर्जन्मजराक्लेशसंस्कारैर्नाभिभूयते । आकाशसम्भवो वेद एक एव पुराऽभवत् ॥
ततो यजुः सामसञ्ज्ञामृग्वेदः प्रापभूयते । ऋग्वेदोभिहितःपूर्वं यजुःसहस्रशीर्षेतिच
षोडशर्चं महासूक्तं नारायणमयं परम् । तस्यापि पाठमात्रेण ब्रह्महत्यानिवर्त्तते ॥
विप्रः पूर्वं न्यसेद्देहे स्मृत्युक्तेन निजेबुधः । ततस्तु प्रतिमायां चशालग्रामेविशेषतः
क्रमेण च ततःकुर्यात्पश्चादावाहनादिकम् । आवाह्यसकलंरूपंवैकुण्ठस्थानसंस्थितम्
कौस्तुभेन विराजन्तं सूर्यकोटिसमप्रभम् । दण्डहस्तं शिखासूत्रसहितंपीतवाससम्
महासन्यासिनंध्यायेच्चातुर्मास्येविशेषतः । एवं रूपमयंविष्णुं सर्वपापौघहारिणम्
आवाहयेच्च पुरतोध्यानसंस्थं द्विजोत्तम !। ऋचा प्रथमयाचास्योङ्कारादिसमुदीर्णया
द्वितीयया चासनंचपार्षदैश्चसमन्वितम् । सौवर्णान्यासनान्येषांमनसापरिचिन्तयेत्
चिन्तनैर्भक्तियोगेन परिपूर्णं च तद्भवेत् । पाद्यं तृतीयया कार्यं गङ्गांतत्रस्मरेद्बुधः

अर्घः कार्यस्ततो विष्णोः सरिद्भिः सप्तसागरैः । पुनराचमनंकार्यममृतेनजगत्पतेः ॥

त्रिभिराचमनैः शुद्धिर्ब्राह्मणस्य निगद्यते ।

अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः ॥ १६ ॥

हृत्कण्ठतालुगाभिश्चयथावर्णं द्विजातयः । शुद्धेरन् स्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरन्ततः

पञ्चम्याऽऽचमनंकार्यंभक्तियुक्तेनचेतसा । भक्तिग्राह्योहृषीकेशोभक्त्यात्मानंप्रयच्छति

ततः सुवासितैस्तोयैः सर्वौषधिसमन्वितैः ।

शेषोदकैः स्वर्णघटैः स्नानं देवस्य कारयेत् ॥ २२ ॥

तीर्थोदकैः श्रद्धया च मनसा समुपाहृतैः । अश्रद्धया रत्नराशिःप्रदत्तो निष्फलोभवेत्

वार्यपि श्रद्धया दत्तमनन्तत्वाय कल्पते । चातुर्मास्ये विशेषेण श्रद्धया पूयते नरः ॥

षष्ठ्या स्नानं ततः कार्यंपुनराचमनं भवेत् । दद्याच्चवाससीस्वर्णसहितेभक्तिशक्तितः

आच्छादितं जगत्सर्वं वस्त्रेणाऽऽच्छादितो हरिः ।

चातुर्मास्ये विशेषेण वस्त्रदानं महाफलम् ॥ २६ ॥

पुनराचमनं देयं यतये विष्णुरूपिणे । वस्त्रदानं च सप्तम्या कार्यं विष्णोर्मुनीश्वर

यज्ञोपवीतमष्टम्या तच्चाध्यात्मतया शृणु । सूर्यकोटिसमस्पर्शं तेजसा भास्वरं तथा

क्रोधाभिभूते विप्रेतुतडित्कोटिसमप्रभम् । सूर्येन्दुवह्निसंयोगाद्गुणत्रयसमन्वितम्

त्रयीमयं ब्रह्मविष्णुरुद्ररूपं त्रिविष्टपम् । यस्यप्रभावाद्विप्रेन्द्र मानवो द्विज उच्यते ॥

जन्मना जायते शूद्रः संस्काराद्द्विजउच्यते । शापोनुग्रहसामर्थ्यं तथाक्रोधःप्रसन्नता

त्रैलोक्यप्रवरत्वं च ब्राह्मणादेव जायते । न ब्राह्मणसमो बन्धुर्न ब्राह्मणसमागतिः ॥

न ब्राह्मणसमः कश्चित्त्रैलोक्ये सचराचरे । दत्तोपवीते ब्रह्मण्ये सुप्तेदेवे जनार्दने ॥

सर्वं जगद्ब्रह्ममयं संजातं नात्र संशयः । नवम्या च सुलेपश्च कर्त्तव्यो यज्ञमूर्तये ॥

सुगन्धकर्दमैर्लिप्तो विष्णुर्येन जगद्गुरुः । तेनाप्यायितमेतद्धि वासितं यशसा जगत्

तेजसा भास्करो लोके देवत्वं प्राप्य मानवः ।

ब्रह्मलोकादिके लोके मोदते चन्दनप्रदः ॥ ३६ ॥

चन्दनालेपसुभगंविष्णुंपश्यन्तिमानवाः । न ते यमपुरंयान्ति चातुर्मास्ये विशेषतः

दशम्या पुष्पपूजा च भक्तिपूजा तथैवच । पुष्पे चैव सदा लक्ष्मीर्वसत्येवनिरन्तरम्

लक्ष्म्याऽसर्वत्रगामिन्या दोषो नैव प्रजायते । यथा सर्वमयो विष्णुर्नदोषैरनुभूयते

तथा सर्वमयी लक्ष्मीःसतीत्वान्नैवहीयते । प्रतिमासुच सर्वासु सर्वभूतेषु नित्यदा

मनुष्यदेवपितृषु पुष्पपूजा विधीयते । पुष्पैः सम्पूजितो येन हरिरेकः श्रिया सह

आब्रह्मस्तम्बपर्यन्तं पूजितंतेन वै जगत् । अतः सुश्वेतकुसुमैर्विष्णुं सम्पूजयेत्सदा

चातुर्मास्ये विशेषेण भक्तियुक्तः सदा शुचिः ।

भक्त्या सुविहिता ब्रह्मन् पुष्पपूजा नरैर्यदि ॥ ४२ ॥

यं यं काममभिध्यायेत्तस्यसिद्धिर्निरन्तरा । पुष्पैरुपचितंविष्णुं यद्यन्येप्रणमन्तिच

तेषामप्यक्षया लोकाश्चातुर्मास्येऽधिकम्फलम् । एकादश्या धूपदानं कर्तव्यं यतयेहरौ

वनस्पतिरसो दिव्यो गन्धाढ्यो गन्धवत्तमः ।

आघ्रेयःसर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ ४६ ॥

इमं मन्त्रं समुच्चार्य धूपमागुरुजं शुभम् । दद्याद्भगवते नित्यं चातुर्मास्ये महाफलम्

कर्पूरचन्दनदलैः सितामधुसमन्वितम् । मासीजटाभिः सहितं सुप्ते देवेऽथ सत्तम

देवाघ्राणेन तुष्यन्ति धूपंघ्राणहरं शुभम् । द्वादश्यांदीपदानंतु कर्त्तव्यंमुक्तिमिच्छुभिः

दीपः सर्वेषुकार्येषुप्रथमस्तेजसाम्पतिः । दीपस्तमौघनाशाय दीपःकान्तिप्रयच्छति

तस्माद्दीपप्रदानेन प्रीयतां मे जनार्दनः । अयं पौराणजो मन्त्रो वेदर्चेन समन्वितः

दीपप्रदाने सकलः प्रयुक्तो नाशयेदघम् ॥ ५१ ॥

चातुर्मास्ये दीपदानं कुरुते यो हरेः पुरः । तस्य पापमयो राशिर्निमेषादपि नश्यति

तावत्पापानि गर्जन्ति तावद् बिभेति पातकी ।

यावन्न विहितो भास्वान्दीपो नारायणे गृहे ॥ ५३ ॥

दर्शनादपि दीपस्य सर्वसिद्धिर्नृणाम्भवेत् । कामनायां समुद्दिश्यदीपंकारयते हरौ

तासांसिद्ध्यतिनिर्विघ्नासुप्तेऽनन्ते गुणोत्तरम् । पञ्चायतनसंस्थेषु तथादेवेषुपञ्चसु

विहितं दीपदानञ्च चातुर्मास्ये महाफलम् ॥ ५६ ॥

एको विष्णुस्तुष्यते मुक्तिदाता नित्यं ध्यातः पूजितः संस्तुतश्च ।

यच्चाऽभीष्टं यच्च गेहे शुभं वा तत्तद्देयं मुक्तिहेतोर्नृवर्यैः ॥ ५७ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये तपोधिकारषोडशोपचार-दीपमहिमावर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

देवायान्नप्रदानमहत्त्ववर्णनम्

ईश्वर उवाच

हरेर्दीपस्तु मद्दीपादधिकोऽयं प्रवर्तते । वैकुण्ठवास एवस्यान्ममैश्वर्यमवाञ्छितम्

कार्त्तिकेय उवाच

दीपोऽयंविष्णुभवनेमन्त्रवद्विहितोनरैः । सदाविशेषफलदश्चातुर्मास्येऽधिकःकथम्

ईश्वर उवाच

विष्णुर्नित्याधिदैवं मे विष्णुः पूज्यः सदा मम ।
विष्णुमेनं सदा ध्याये विष्णुर्मत्तः परो हि सः ॥ ३ ॥

स विष्णुवल्लभोदीपःसर्वदापापहारकः । चातुर्मास्ये विशेषेण कामनासिद्धिकारकः
विष्णुर्दीपेन सन्तुष्टो यथा भवति पुत्रक । तथा यज्ञसहस्रैश्च वरनैव प्रयच्छति ॥
स्वल्पव्ययेन दीपस्यफलमानन्तकंनृणाम् । अनन्तशयने प्राप्ते पुण्यसंख्या न विद्यते
तस्मात्सर्वात्मभावेन श्रद्धया संयुते न च । दीपप्रदानं कुरुते हरेः पापैर्न लिप्यते ॥
उपचारैः षोडशकैर्यतिरूपे हरौ पुनः । दीपप्रदाने विहिते सर्वमुद्द्योतितजगत् ॥

ब्रह्मोवाच

दीपादनन्तरं ब्रह्मन्नन्नस्यच निवेदनम् । त्रयोदश्या भक्तियुक्तैः कार्यं मोक्षपदस्थितैः
अमृतं सम्परित्यज्य यदन्नं देवताअपि । स्पृहयन्ति गृहस्थस्य गृहद्वारगताः सदा

हरौ सुप्ते विशेषेण प्रदेयः प्रत्यहं नरैः । फलैरर्घः प्रदातव्यस्तत्कालसमुद्राहृतैः ॥
ताम्बूलवल्लीपत्रैश्च तदा पूगफलैःशुभैः । द्राक्षाजम्ब्वाम्रजफलैरक्षोटैर्दाडिमैरपि ॥१२॥
बीजपूरफलैश्चैव दद्यादर्घ्यं सुभक्तितः । शङ्खतोयं समादाय तस्योपरिफलं शुभम्
मन्त्रेणानेन विप्रेन्द्र! केशवाय निवेदयेत् । पुनराचमनं देयमन्नदानादनन्तरम् ॥ १४॥
आर्त्तिक्यञ्च ततः कुर्यात्सर्वपापविनाशनम् । चतुर्दश्यानमस्कुर्याद्विष्णवेयतिरूपिणे

पञ्चदश्या भ्रमः कार्यः सर्वदिक्षु द्विजैः सह ।
सप्तसागरजैस्तोयैर्दत्तैर्यत्फलमाप्यते ॥ १६ ॥

ततोपदानाच्च हरेः प्राप्यते विष्णुवल्लभैः । चतुर्वारभ्रमीभिश्च जगत्सर्वञ्चराचरम् ॥
क्रान्तंभवतिविप्राग्र्यतत्तीर्थगमनादिकम् । षोडश्यादेवसायुज्यंचिन्तयेद्योगवित्तमः
आत्मनश्च हरेर्नित्यंनमूर्त्ति भावयेत्तदा । मूर्त्तामूर्त्तस्वरूपत्वाद्दृश्योभवतियोगवित्
तस्मिन्दृष्टे निवर्त्तेतसदसद्रूपजाक्रिया । आत्मानं तेजसां मध्येचिन्तयेत्सूर्यवर्चसम्
अहमेव सदाविष्णुरित्यात्मनिविचारयन् । लभतेवैष्णवंदेहं जीवन्मुक्तोद्विजोभवेत्

चातुर्मास्ये विशेषेण योगयुक्तो द्विजो भवेत् ।
इयं भक्तिः समादिष्टा मोक्षमार्गप्रदे हरौ ॥ २२ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्येदेवायान्नसमर्पणमहत्त्ववर्णनंनामा-ष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

तपोधिकारेसच्छूद्रकथनम्

ईश्वर उवाच

एतत्ते पूजनंविष्णोःषोडशोपायसम्भवम् । कथितं यद्द्विजःकृत्वाप्राप्नोतिपरमंपदम्

तथाच क्षत्रियविशां करणान्मुक्तिरुत्तमा ।

शूद्राणां चाऽधिकारोऽस्मिन्स्त्रीणां नैव कदाचन ॥ २ ॥

कार्त्तिकेय उवाच

शूद्राणाञ्चतथा स्त्रीणां धर्मं विस्तरतोवद । केनमुक्तिर्भवेत्तेषां कृष्णस्याराधनंविना

ईश्वर उवाच

सच्छूद्रैरपि नो कार्या वेदाक्षरविचारणा । न श्रोतव्यान पाठ्याच पठन्नरकभाग्भवेत्

पुराणानां नैव पाठः श्रवणंकारयेत्सदा । स्मृत्युक्तंसुगुरोर्ग्राह्यं न पाठःश्रवणादिकम्

स्कन्द उवाच

सच्छूद्राः के समाख्यातास्तांश्च विस्तरतो वद ।

के सन्तः के च शूद्राश्च सच्छूद्रा नामतश्च के ॥ ६ ॥

ईश्वर उवाच

धर्मोढा यस्य पत्नी स्यात्स सच्छूद्र उदाहृतः । समानकुलरूपाच दशदोषविवर्जिता

उद्वोढावेदविधिनाससच्छूद्रःप्रकीर्त्तितः । अक्लीवाऽव्यङ्गिनीशस्तामहारोगाद्यदूषिता

अनिन्दिता शुभकला चक्षुरोगविवर्जिता । वाधिर्यहीना चपला कन्या मधुरभाषिणी

दूषणैर्दशभिर्हीना वेदोक्तविधिना नरैः । विवाहिता च सापत्नीगृहिणीयस्यसर्वदा

सच्छूद्रः स तु विज्ञेयो देवादीनांविभागकृत् । पुण्यकार्येषुसर्वेषुप्रथमासा प्रकीर्त्तिता

तया सुविहितो धर्मः सम्पूर्णफलदायकः । चातुर्मास्ये विशेषेणतयासहगुणाधिकः

भार्यारतिःशुचिर्भृत्यादीनांपोषणतत्परः । श्राद्धादिकारकोनित्यमिष्टापूर्तप्रसाधकः

नमस्कारादिमन्त्रेण नामसङ्कीर्तनेन च । देवास्तस्य च तुष्यन्तिपञ्चयज्ञादिकैः शुभैः

स्नानं च तर्पणं चैवबह्निहोमोऽप्यमन्त्रकः । ब्रह्मयज्ञोऽतिथेःपूजापञ्चयज्ञान्नसन्त्यजेत्

कार्यं स्त्रीभिश्च शूद्रैश्च ह्यमन्त्रपञ्चयज्ञकम् । पञ्चयज्ञैश्च सन्तुष्टा यथैवाम्पितृदेवताः

तथापतिव्रतायाश्च पतिशुश्रूषया सदा । पतिव्रताया देहे तु सर्वे देवाश्च सन्ति हि

अनस्त्राभ्यां स्तोत्राभ्यां यज्ञादीनां समागमः । यद्दोभयोर्मतेपृष्ठेसन्तुष्टाःपितृदेवताः

कार्यादीनां च सर्वेषां सङ्गमस्तत्र नित्यदा ।

चातुर्मास्ये समायाते विष्णुभक्त्या तयोः शिवम् ॥ १६ ॥

समानजातिसम्भूता पत्नीयस्यधृताभवेत् । पूर्वाभर्ताऽर्द्धभागीस्याद्द्वितीयस्यनकिञ्चन

अर्थकार्याधिकारोऽस्यास्तेन धर्मार्धधारिणी ।

स्वं स्वं कृतं सदैव स्यात्तयोःकर्म शुभाशुभम् ॥ २१ ॥

यानुगच्छति भर्तारं मृतं पुनरसा द्विज । साध्वीमाहिपरिज्ञेयातयाचोद्ध्रियतेकुलम्

अन्यजातिमृतं चाथ धृतावापि विवाहिता । वैश्वानरस्य मार्गेणसातमुद्धरतेपतिम्

यथाजलाच्च जम्वालः कृष्यते धार्मिकैर्नृभिः । एवमुद्धरते साध्वीभर्त्तारंयानुगच्छति

अन्यजातिसमुद्भूताअन्येनविधृतायदि । तावुभौधर्मकार्येषुसन्त्याज्यौनित्यदामतौ

स्वंस्वंकर्मप्रकुरुतःस्वकर्मजंस्वकंफलम् । तस्माद्वरिष्ठाहीनावासत्कुल्याशूद्रसम्भवैः

धृता न कार्या सा पत्नी यत्करोति न वर्द्धते । तया सह कृतंपुण्यंवर्द्धते दशधोत्तरम्

अनन्ततृप्तिदंनैव तत्सुतैरपि वा तथा । क्रयक्रीता च या कन्यादासी सापरिकीर्तिता

सच्छूद्रस्याधिकारेसा कदाचिन्नैवजायते । याकन्या स्वयमुद्यम्य पित्रादत्तावरायच

विवाहविधिनोदूढा पितृदेवार्थसाधिनी । सुलक्षणाविनीताया विवेकादिगुणाशुभा

सच्चरित्रा पतिपरासा तेभ्योदातुमर्हति । विशुद्धकुलजा कन्या धर्मोढाधर्मचारिणी

सा पुनाति कुलं सर्वं मातृतः पितृतस्तथा ।

एष एव मया प्रोक्तः सच्छूद्राणां परो विधिः ॥ ३२ ॥

अधोजातिसमुद्भूताः सच्छूद्रात्क्रमहीनजाः । विवाहोदशधातेषां दशधापुत्रताभवेत्

चत्वार उत्तमाः प्रोक्ता विवाहा मुनिसत्तम । शेषाः सर्वप्रकृतिषु कथिताश्च पुराविदैः

प्राजापत्यस्तथाब्राह्मो दैवार्षौचातिशोभनाः । गान्धर्वश्चासुरश्चैव राक्षसश्चपिशाचकः
प्रातिभोघातिनश्चेति विवाहाःकथितादश । एतेहिहीनजातीनां विवाहाःपरिकीर्तिताः
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च । गूढोत्पन्नोपविद्धश्च कानीनश्च सहोढजः
क्रीतःपौनर्भवश्चापिपुत्रा दशविधाःस्मृताः । औरसादपिहीनाश्च तेपितेषांशुभावहाः

अष्टादशमिता नीचा प्रकृतीनां यथातथा ।
विधिर्नैव क्रिया नैव स्मृतिमार्गोऽपि नैव च ॥ ३६ ॥

तासांब्राह्मणशुश्रूषा विष्णुध्यानं शिवार्चनम् । अमन्त्रात्पुण्यकरणदानं देयंचवै सदा
न दानस्य क्षयो लोके श्रद्धया यत्प्रदीयते । अश्रद्धया शुचितया दानंवैरस्यकारणम्
अहिंसादिसमादिष्टो धर्मस्तासांमहाफलः । चातुर्मास्येविशेषेणत्रिदिवेशादिसेवया
सुदर्शनैस्तथा धर्मः सेव्यतेह्यविरोधिभिः । सच्छूद्रैर्दानपुण्यैश्च द्विजशुश्रूषणादिभिः

वृत्तिश्च सत्यानृतजा वाणिज्यव्यवहारजा ।
अशीतिभागमादद्याद् द्विजाद्वाधुर्षिकः शते ॥ ४३ ॥

सपादभागवृद्धा तु क्षत्रियादिषु गृह्यते । एवं न बन्धो भवति पातकस्य कदाचन

प्रातः कर्म सुरेशानं मध्याह्ने द्विजसेवनम् ।
अपराह्णेऽथ कार्याणि कुर्वन्मर्त्यः सुखी भवेत् ॥ ४६ ॥

गृहस्थैश्च सदा भाव्यं यावज्जीवं क्रियापरैः । पञ्चयज्ञरतैश्चैवातिथिद्विजसुपूजकैः
विष्णुभक्तिरतैश्चैव वेदमन्त्रविपाठकैः । सततं दानशीलैश्च दीनार्तजनवत्सलैः
श्रमादिगुणसंयुक्तैर्द्वादशाक्षरपूजकैः । षडक्षरमहोङ्कारपरमानन्दपूरितैः ॥ ४६ ॥
सदपत्यैः सदाचारैः सतां शुश्रूषणैरपि । विमत्सरैःसदास्थेयंतापक्लेशविवर्जितैः
प्रव्रज्यावर्जनैरेवं सच्छूद्रैर्धर्मतर्जितैः । तोषणं सर्वभूतानां कार्यं वित्तानुसारतः
सदाविष्णुशिवादीनांयेभक्तास्तेनराःसदा । देववद्दिविदीव्यन्तिचातुर्मास्येविशेषतः

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांतृतीये ब्रह्मखण्डे
ब्रह्मनारदसम्वादे ईश्वरकुमारसम्वादे चातुर्मास्यमाहात्म्ये तपो-
धिकारेसच्छूद्रकथनंनाम नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

अष्टादशप्रकृतीनाम्वर्णनम्

नारद उवाच

अष्टादश प्रकृतयः का वदस्व पितामह । वृत्तिस्तासां च कोधर्मःसर्वंविस्तरतो मम

ब्रह्मोवाच

मज्जन्माऽभूद्भगवतोनाभिपङ्कजकोशतः । स्वकालपरिमाणेनप्रबुद्धस्यजगत्पतेः ॥ २
ततो बहुतिथे काले केशवेन पुरा स्मृतः । स्रष्टुकामेन विविधाः प्रजामनसिराजसीः
अहं कमलजस्तत्र जातः पुत्रश्चतुर्मुखः । उदरं नाभिनालेन प्रविश्याथव्यलोकयम्
तत्र ब्रह्माण्डकोटीनांदर्शनंमेऽभवत्पुनः । विस्मयाच्चिन्तयानस्य सृष्ट्यर्थमभिधावतः
निर्गम्य पुनरेवाहं पद्मनालेन यावता । बहिरागां विस्मृतं तत्सर्वंसृष्ट्यर्थकारणम्
पुनरेव ततोगत्वा प्रजाः सृष्टा चतुर्विधाः । नाभिनालेन निर्गत्यविस्मृतेनान्तरात्मना
तदाहं जडवज्जातोवागुवाचाऽशरीरिणी । तपस्तप महाबुद्धे ! जडत्वंनोचितंतव ॥
दशवर्षसहस्राणि ततोऽहं तप आस्थितः । पुनराकाशजा वाणीमामुवाचाविनश्वरा
वेदरूपाश्रिता पूर्वमाविर्भूतातपोबलात् । ततो भगवतादिष्टः सृज त्वं बहुधाःप्रजाः
राजसं गुणमाश्रित्य भूतसर्गमकल्मषम् । मनसा मानसी सृष्टिःप्रथमंचिन्तितामया
ततोवैब्राह्मणाजातामरीच्यादिमुनीश्वराः । तेषांकनीयांस्त्वं जातोज्ञानवेदान्तपारगः

कर्मनिष्ठाश्च ते नित्यं सृष्ट्यर्थं सततोद्यताः ।
निर्व्यापारो विष्णुभक्त एकान्तब्रह्मसेवकः ॥ १३ ॥

निर्ममोनिरहङ्कारो ममत्वं मानसः सुतः । क्रमान्मया तु तेषां वै वेदरक्षार्थमेव च
प्रथमामानसीसृष्टिर्द्विजात्यादिविनिर्मिता । ततोऽहमाङ्गिकींसृष्टिंसृष्टवांस्तत्रनारद
मुखाच्चब्राह्मणाजाताबाहुभ्यःक्षत्रियामम । वैश्याऊरुसमुद्भूताःपद्भ्यांशूद्राबभूविरे
अनुलोमविलोमाभ्यां क्रमाच्चक्रमयोगतः । शूद्रादधोधोजाताश्च सर्वे पादतलोद्भवाः

तः सर्वास्तु प्रकृतयो मम देहांशसम्भवाः ।

नारद! त्वं विजानीहि तासां नामानि वच्मि ते ॥ १८ ॥

ब्राह्मणः क्षत्त्रियोवैश्यस्त्रय एव द्विजातयः । वेदास्तपोऽध्ययनं च यजनं दानमेव च वृत्तिरध्यापनाच्चैवतथास्वल्पप्रतिग्रहात् । विप्रःसमर्थस्तपसा यद्यपिस्यात्प्रतिग्रहे तथापि नैवगृह्णीयात्तपोरक्षायतः सदा । वेदपाठो विष्णुपूजा ब्रह्मध्यानमलोभता

अक्रोधता निर्ममत्वं क्षमासारत्वमार्यता ।

क्रियातत्परता दानक्रियासत्यादिभिर्गुणैः ॥ २२ ॥

भूषितो यो भवेन्नित्यं स विप्र इतिकथ्यते । क्षत्त्रियेण तपः कार्यं यजनं दानमेवच वेदपाठो विप्रभक्तिरेषां शस्त्रेण जीवनम् । स्त्रीबालगोब्राह्मणार्थे भूम्यर्थेस्वामिसङ्कटे सम्प्राप्ते शरणेचैव पीडितानांच शब्दिते । आर्तत्राणपरायै च क्षत्त्रिया ब्रह्मणाकृताः धनवृद्धिकरो वैश्यः पशुपाली कृषीवलः । रसादीनां च विक्रेता देवब्राह्मणपूजकः अर्थवृद्धिकरोव्याजाद्यज्ञकर्मादिकारकः । दानमध्ययनं चेति वैश्यवृत्तिरुदाहृता ॥२७

एतान्येव ह्यमन्त्राणि शूद्रः कारयते सदा ।

नित्यं षड्दैवतं श्राद्धं हन्तकारोऽग्नितर्पणम् ॥ २८ ॥

देवद्विजातिभक्तिश्च नमस्कारेण सिध्यति ।

शूद्रोऽपि प्रातरुत्थाय कृत्वा पादाभिवन्दनम् ॥ २९ ॥

विष्णुभक्तिमयाञ्श्लोकान् पठन्विष्णुत्वमाप्नुयात् ।

वार्षिकव्रतकृन्नित्यं तिथिवाराधिदैवतम् ॥ ३० ॥

अन्नदः सर्वजीवानां गृहस्थःशूद्र ईरितः । अमन्त्राण्यपि कर्माणि कुर्वन्नेवहिमुच्यते चातुर्मास्यव्रतकरः शूद्रोऽपिहरितांव्रजेत् । शिल्पी च नर्तकश्चैवकाष्ठकारःप्रजापतिः धर्मकश्चित्रकश्चैव सूत्रको रजकस्तथा । गच्छकस्तन्तुकारश्च चाक्रिकश्चर्मकारकः

सूनिकोऽध्वनिकश्चैव कैहिको मत्स्यघातकः ।

औनामिकस्तु चाण्डालः प्रकृत्याऽष्टादशैव ते ॥ ३४ ॥

शिल्पिनः स्वर्णकारश्च दारुकःकांस्यकारकः ।

काण्डुकःकुम्भकारश्च प्रकृत्या उत्तमाश्च षट् ॥ ३५ ॥

खरवाह्युष्ट्रवाही च हयवाही तथैव च । गोपाल इष्टकाकारो अधमाधमपञ्चकम् ॥ रजकश्चर्मकारश्च नटोबुरुड एव च । कैवर्त्तमेदिभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः योयस्यहीनोवर्णेन पचास्मादधमोनरः । सर्वासांप्रकृतीनां च उत्तमामध्यमाःसमाः

भेदास्त्रयः समाख्याता विज्ञेयाःस्मृतिनिर्णयात् ।

शिल्पिनः सप्त विज्ञेया उत्तमाः समुदाहृताः ॥ ३९ ॥

स्वर्णकृत्कम्बुकश्चैव तन्दुलीपुष्पलावकः । ताम्बूली नापितश्चैव मणिकारश्चसप्तधा न स्नानं देवताहोमस्तपो नियम एव च । न स्वाध्यायवषट्कारौनचशुद्धिर्विवाहिता

एतासां प्रकृतीनां च गुरुपूजा सदोदिता ।

विप्राणां प्राकृतो नित्यं दानमेव परो विधिः ॥ ४२ ॥

सर्वेषामेव वर्णानामाश्रमाणांमहामुने !। सर्वासांप्रकृतीनां च विष्णुभक्तिःसदाशुभा इति ते कथितं सर्वंयथाप्रकृतिसम्भवम् । कथां शृणु महापुण्यांशूद्रःशुद्धिमगाद्यथा

इदं पुराणं परमं पवित्रं विशुद्धधीर्यस्तु शृणोति वा पठेत् ।

विधूय पापानि पुरार्जितानि स याति विष्णोर्भवनं क्रियापरः ॥ ४५ ॥

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये प्रकृतिकथनं नाम

दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

पैंजवनोपाख्यानवर्णनम्

ब्रह्मोवाच

शूद्रः पैंजवनो नाम गार्हस्थ्याच्छुद्धिमाप्तवान् । धर्ममार्गाविरोधेन तन्निबोधमहामते
आसीत्पैंजवनः शूद्रः पुरा त्रेतायुगे किल । स धर्मनिरतःख्यातोविष्णुब्राह्मणपूजकः

न्यायागतधनो नित्यं शान्तः सर्वजनप्रियः ।
सत्यवादी विवेकज्ञस्तस्य भार्या च सुन्दरी ॥ ३ ॥

धर्मोढा वेदविधिना समानकुलजा शुभा । पतिव्रता महाभागा देवद्विजहिते रता ॥

काश्यां सम्बन्धिता बाला वैजयन्त्यां विवाहिता ।
सा धर्माचरणे दक्षा वैष्णवव्रतचारिणी ॥ ५ ॥

भर्त्रासहतथासम्यक्चिक्रीडेसुविनीतवत् । सोऽपिरेमेतयाकालेहस्तिन्येव महागजः
अर्थाप्तिः पूर्वपुण्येनजातातस्य महात्मनः । वाणिज्यं स्वजनैर्नित्यं स्वदेशपरदेशजम्
कारयत्यर्थजातैश्च परकीयस्वकीयजैः । एवमर्थश्च वहुधा सञ्जातो धर्मदर्शिनः ॥८॥
पुत्रद्वयं च सञ्जातं पितुः शुश्रूषणेरतम् । तस्य पुत्राः पितुर्भक्ता द्रव्यादिमदवर्जिताः
पितृवाक्यरताःश्रेष्ठाःस्वधर्माचारशोभनाः। पित्रोःशुश्रूषणादन्यन्नाभिनन्दन्तिकिञ्चन

ते सम्बन्धैःसुसम्बद्धाः पित्रा धर्मार्थदर्शिना ।
तत्पत्न्यो मातृपित्रर्चां कारयन्त्यनिवारितम् ॥ ११ ॥

ऋद्धिमद्भवनं तस्य धनधान्यसमन्वितम् । सोऽपिधर्मरतो नित्यंदेवतातिथिपूजकः
गृहागतो न विमुखो यस्य यातिकदाचन । शीतकाले धनं प्रादादुष्णकालेजलान्नदः
वर्षाकाले वस्त्रदश्च बभूवान्नप्रदः सदा । वापीकूपतडागादि प्रपादेवगृहाणि च ॥१४
कारयत्युचिते काले शिवविष्णुव्रतस्थितः । इष्टधर्मस्तुवर्णानां समाचीर्णोमहाफलः
अन्येषां पूर्वधर्माणां तेषांपूतकरः सदा। स बभूवधनाढ्योऽपि व्यसनैर्न समाश्रितः

विष्णुभक्तिरतो नित्यं चातुर्मास्ये विशेषतः । एकदागालवमुनिःशिष्यैर्बहुभिरावृतः
ब्रह्मज्ञानरतः शान्तस्तपोनिष्ठो महावशी । अभ्याजगाम शूद्रस्य गेहे पैंजवनस्य सः

स वाग्भिर्मधुभिस्तस्य ह्यभ्युत्थानासनादिभिः ।
उपचारैः पुनर्युक्तः कृतार्थ इव मानयन् ॥ १६ ॥

अद्य मे सफलंजन्मजातंजीवितमुत्तमम् । अद्य मे सफलोधर्मःसकुलश्चोद्धृतस्त्वया
मम पापसहस्राणि दृष्ट्वा दग्धानि ते मुने !। गृहं ममगृहस्थस्यसकलंपावितंत्वया
तस्य भक्त्या प्रसन्नोऽभूद्गतमार्गपरिश्रमः । उवाच मुनिशार्दूलःसच्छूद्रंतंकृताञ्जलिम्

कच्चित्ते कुशलं सौम्य! मनोधर्मे प्रवर्त्तते ।
अर्थानुबन्धाः सततं बन्धुदारसुतादयः ॥ २३ ॥

गोविन्दे सततंभक्तिस्तथादानेप्रवर्तते । धर्मार्थकामकार्येषुसप्रभावंमनस्तव ॥ २४ ॥
विष्णुपादोदकं नित्यं शिरसाधार्यते न वा । पादोद्भवं च गङ्गोदं द्वादशाब्दफलप्रदम्
चातुर्मास्ये विशेषेण तत्फलं द्विगुणंभवेत् । हरिभक्तिर्हरिकथा हरिस्तोत्रं हरेर्नतिः
हरिध्यानं हरेः पूजा सुमते दंत्ते च मोक्षकृत् । एवं श्रुत्वाणं समुनिं पुनराह नतिं गतः

भवद्दृष्ट्या श्रमफलमेतज्जातं न संशयः ।
तथापिश्रोतुमिच्छामि तव वाणीमनामयीम् ॥ २८ ॥

भवादृशानां गमनं सर्वार्थेषु प्रकल्प्यते । ततस्तौ सुमुदायुक्तौ सञ्जातौ हृष्टचेतसौ
मुनिम्पैंजवनो नाम सच्छूद्रः प्राह सम्मतः । किमागमनकृत्यं ते कथयस्वप्रसादतः
को वा तीर्थप्रसङ्गश्चचातुर्मास्येसमीपगो । गालवःप्राहसच्छूद्रंधार्मिकंसत्यवादिनम्
मम तीर्थावसक्तस्य मासा बहुतरा गताः । इदानीमाश्रमं यास्येचातुर्मास्ये समागते
आषाढशुक्लैकादश्यांकरिष्येनियमंगृहे । नारायणस्यप्रीत्यर्थं श्रेयोर्थञ्चात्मनस्तथा

प्रत्युवाच मुनिर्धर्मान् विनयानतकन्धरम् ।

पैंजवन उवाच

मामनुग्रहजां बुद्धिं ब्रूहि त्वं द्विजपुङ्गव !। वेदेऽधिकारो नैवास्ति वेदसारजपस्य वा

पुराणस्मृतिपाठस्य तस्मात्किञ्चिद्वदस्व मे ।

तत्त्वात्मसदृशं किञ्चिद्दाति रूपं महाफलम् ॥ ३५ ॥
चातुर्मास्ये विशेषेण मुक्तिसन्साधकं वद ॥ ३६ ॥

गालव उवाच

शालग्रामगतं विष्णुश्चक्राङ्कितपुटं सदा । येऽर्चयन्ति नरा नित्यं तेषांभक्तिस्त्वदूरतः
शालग्रामे मनोयस्ययत्किञ्चित्क्रियतेशुभम् । अक्षय्यंतद्भवेन्नित्यंचातुर्मास्येविशेषतः
शालग्रामशिला यत्र यत्र द्वारावतीशिला । उभयोः सङ्गमःप्राप्तोमुक्तिस्तस्यनदुर्लभा
शालग्रामशिलायस्यांभूमौसम्पूज्यते नृभिः । पञ्चक्रोशंपुनात्येषाअपिपापशतान्वितैः
तैजसं पिण्डमेतद्धि ब्रह्मरूपमिदं शुभम् । यस्याः संदर्शनादेवसद्यः कल्मषनाशनम्
सर्वतीर्थानिपुण्यानि देवतायतनानि च । नद्यः सर्वा महाशूद्र! तीर्थत्वंप्राप्नुवन्तिहि
सन्निधानेन वै तस्याः क्रियाः सर्वत्र शोभनाः ।
व्रजन्ति हि क्रियात्वं च चातुर्मास्ये विशेषतः ॥ ४३ ॥
पूज्यतेभवने यस्य शालग्रामशिला शुभा । कोमलैस्तुलसीपत्रैर्विमुखस्तत्र वै यमः
ब्राह्मणक्षत्रियविशां सच्छूद्राणामथापि वा ।
शालग्रामाधिकारोऽस्ति न चाऽन्येषां कदाचन ॥ ४५ ॥

सच्छूद्र उवाच

ब्रह्मन् वेदविदांश्रेष्ठ! सर्वशास्त्रविशारद !। स्त्रीशूद्रादिनिषेधोऽयं शालग्रामे हि श्रूयते
मादृशस्तु कथं शालग्रामपूजाविधिं वद ॥ ४७ ॥

गालव उवाच

असच्छूद्रगतं दास!निषेधंविद्धिमानद !। स्त्रीणामपिच साध्वीनांनैवाभावःप्रकीर्तितः
मा भूत्संशयस्तेनात्र नाप्नुषे संशयात्फलम् । शालग्रामार्चनपराः शुद्धदेहाविवेकिनः
न ते यमपुरं यान्ति चातुर्मास्येव पूजकाः । शालग्रामार्पितंमाल्यंशिरसाधारयन्तिये
तेषां पापसहस्राणि विलयं यान्ति तत्क्षणात् ।
शालग्रामशिलाग्रे तु ये प्रयच्छन्ति दीपकम् ॥ ५१ ॥
तेषां सौरपुरे वासः कदाचिन्नैव जायते । शालग्रामगतं विष्णुं सुमनोभिर्मनोहरैः

येऽर्चयन्ति महाशूद्र! सुप्ते देवे हरौ तथा ॥ ५२ ॥
पञ्चामृतेन स्नपनं ये कुर्वन्ति सदानराः । शालग्रामशिलायांचनतेसंसारिणो नराः
मुक्तेर्निदानममलं शालग्रामगतं हरिम् ।
हृदि न्यस्य सदा भक्त्या यो ध्यायति स मुक्तिभाक् ॥ ५४ ॥
तुलसीदलजां मालां शालग्रामोपरि न्यसेत् ।
चातुर्मास्ये विशेषेण सर्वकामानवाप्नुयात् ॥ ५५ ॥
न तावत्पुष्पजामालाशालग्रामस्यवल्लभा । सर्वदातुलसीदेवीविष्णोर्नित्यंशुभाप्रिया
तुलसी वल्लभानित्यं चातुर्मास्ये विशेषतः ।
शालग्रामो महाविष्णुस्तुलसी श्रीर्न संशयः ॥ ५७ ॥
अतोवासितपानीयैः स्नाप्य चन्दनचर्चितैः । मञ्जरीभिर्युतंदेवंशालग्रामशिलाहरिम्
तुलसीसम्भवाभिश्च कृत्वा कामानवाप्नुयात् ।
पत्रे तु प्रथमे ब्रह्मा द्वितीये भगवाञ्छिवः ॥ ५९ ॥
मञ्जर्यां भगवान्विष्णुस्तदेकत्रस्थया तदा । मञ्जरीदलसंयुक्ता ग्राह्या बुधजनैः सदा
तां निवेद्य गुरौ भक्त्या जन्मादिक्षयकारणम् ।
शालग्रामे धूपराशिं निवेद्य हरितत्परः ॥ ६१ ॥
चातुर्मास्ये विशेषेण मनुष्यो नैव नारकी । शालग्रामं नरो दृष्ट्वापूजितं कुसुमैःशुभैः
सर्वपापविशुद्धात्मा याति तन्मयतां हरौ ।
यः स्तौत्यश्मगतं विष्णुं गण्डकीजलसम्भवम् ॥ ६३ ॥
श्रुतिस्मृतिपुराणैश्च सोपि विष्णुपदं व्रजेत् ।
शालग्रामशिलायाश्च चतुर्विंशतिसङ्ख्यकाः ॥
भेदाः सन्ति महाशूद्र ताञ्छृणुष्व महामते !॥ ६४ ॥
इमा द्वादश्यो लोके च चतुर्विंशतिसङ्ख्यकाः ।
तासां च दैवतं विष्णुं नामानि च वदाम्यहम् ॥ ६५ ॥
स एव मूर्त्तश्चतुरुत्तराभिर्विंशद्भिरेकोभगवान्यथाऽऽद्यः ।

स एव सम्वत्सरनामसञ्ज्ञः स एव ग्रावागतआदिदेवः ॥ ६६ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्यानं नामैकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः

शालग्राममूर्त्युत्पत्तिवर्णनम्

पैजवन उवाच

एतान् भेदान् मम ब्रूहि विस्तरेण तपोधन !। त्वद्वाक्यामृतपानेन तृषानैवप्रशाम्यति

गालव उवाच

श्रृणु विस्तरतो भेदान् पुराणोक्तान् वदामि ते ।
यान् श्रुत्वा मुच्यतेऽवश्यं मनुजः सर्वकिल्बिषात् ॥ २ ॥

पूर्वं तु केशवः पूज्यो द्वितीयो मधुसूदनः । सङ्कर्षणस्तृतीयस्तुततोदामोदरःस्मृतः पञ्चमो वासुदेवाख्यः षष्ठः प्रद्युम्नसञ्ज्ञकः । सप्तमोविष्णुरुक्तश्चाष्टमो माधव एव च नवमोऽनन्तमूर्त्तिश्च दशमः पुरुषोत्तमः । अधोक्षजस्ततः पश्चाद्द्वादशस्तु जनार्दनः त्रयोदशस्तु गोविन्दश्चतुर्दशस्त्रिविक्रमः । श्रीधरश्च पञ्चदशो हृषीकेशस्तु षोडशः नृसिंहस्तुसप्तदशोविश्वयोनिस्ततः परम् । वामनश्चततःप्रोक्तस्ततोनारायणःस्मृतः पुण्डरीकाक्ष उक्तस्तु ह्युपेन्द्रश्चततःपरम् । हरिस्त्रयोविंशतिमःकृष्णश्चान्त्यउदाहृतः शालग्रामस्यभेदास्ते मयोक्तास्तवशूद्रज । मूर्तिभेदास्तथा प्रोक्ता एत एव महाधन मूर्त्तयस्तिथिनाम्न्यः स्युरेकादश्यःसदैवहि । सम्वत्सरेणपूज्यन्तेचतुर्विंशति मूर्त्तयः

देवाश्च ताराश्च तथा चतुर्विंशतिसङ्ख्यकाः ।
मासा मार्गशिराद्याश्च मासार्द्धाः पक्षसञ्ज्ञकाः ॥ ११ ॥

अधीशसहितान्नित्यं पूजयन् भक्तिमान् भवेत् । चतुर्विंशतिसञ्ज्ञश्चचतुष्टयमुदाहृतम् एतच्चतुष्टयं नृणां धर्मकामार्थमोक्षदम् । यः श्रृणोति नरोभक्त्या पठेद्वापि समाहितः भूतसर्गस्य गोप्तारौ हरिस्तस्य प्रसीदति ॥ १४ ॥

इतिश्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये मूर्त्युत्पत्तिर्नाम द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

पैजवनोपाख्यानेसतीदेहत्यागपूर्वकशिवपार्वतीविवाहवर्णनम्

पैजवन उवाच

शालग्रामशिलायाञ्च जगदादिसनातनः । कथं पाषाणतां प्राप्तोगण्डक्यांतच्च मे वद त्वत्प्रसादेन विप्रर्षे ! हरौ भक्तिर्दृढा भवेत् । भवन्तस्तीर्थरूपाहिदर्शनात्पापहारिणः तीर्थामृतावगाहेन यथापवित्रता नृणाम् । भवद्वाक्यामृताज्ञातातथामम न संशयः

गालव उवाच

इतिहासस्त्वयं पुण्यः पुराणेषु च पठ्यते । यथा सएवभगवान्शालग्रामत्वमागतः महेश्वरश्च लिङ्गत्वं कथयेऽहं तवानघ । पूर्वं प्रजापतिर्दक्षो ब्रह्मणोऽङ्गुष्ठसम्भवः ॥ ५

तस्याऽऽसीद्दुहिता साध्वी सती नाम्नी सुलक्षणा ।
हरेणोढा विधिज्ञेन वेदोक्तविधिना ततः ॥ ६ ॥

स चकार महायज्ञे हरद्वेषं विमूढधीः । तेन द्वेषेणमहता सती प्रकुपिता भृशम् ॥ यज्ञवेद्यां समागम्य वह्निधारणया तदा । प्राणायामपरा भूत्वा देहोत्सर्गं चकारसा पितृभागं परित्यज्य स्वभागेन हता सती । मनसा ध्यानमगच्छीतलं च हिमालयम यत्र यत्र मनो याति स्वकर्मवशगं मृतौ । अवतारस्तत्र तत्र जायते नात्र संशयः

दह्यमाना हि सा देवी हिमालयसुताऽभवत् ।
तत्र सा पार्वती भूत्वा तप उग्रं समाश्रिता ॥ ११ ॥

शिवभक्तिरता नित्यं हरव्रतपरायणा । शृङ्गे हिमवतः पुत्री मनो न्यस्य महेश्वरे ॥ ततो वर्षसहस्रान्ते भगवान् भूतभावनः । अथाऽऽजगाम तं देशं विप्ररूपो महेश्वरः तां ज्ञात्वा तपसाशुद्धांकर्मभावैःपरीक्षितैः । ततोदिव्यवपुर्भूत्वा करेजग्राहपार्वतीम्

तपसा निर्जितश्चास्मि करवाणि च किं प्रियम् ।
ततः प्राह महेशानं प्रमाणं मे पिता कुरु ॥ १५ ॥

सप्तर्षीन् स तथोक्तस्तु प्रेषयामास शङ्करः । ते तत्रगत्वा समयं वक्तुं हिमवतासह निवेद्यच महेशानं प्रेषिता मुनयोययुः । ततोलग्नदिने देवा महेन्द्रादय ईश्वरम् ॥ १७ ब्रह्मविष्णुपुरोगैश्च पुरोधायाग्निमाययुः । योगसिद्धाः समायान्तं वरवेषं वृषध्वजम् हिमवान् पूजयामास मधुपर्कादिकैः शुभैः । उपचारैर्मुदायुक्तोमानयन् कृतकृत्यताम्

वेदोक्तेन विधानेन तां कन्यां समयोजयत् ।
पाणिग्रहेण विधिना द्विजातिगणसम्वृतः ॥ २० ॥

वह्निप्रदक्षिणीकृत्य गिरीशस्तदनन्तरम् । दानकाले च गोत्रादि पृष्टोलज्जापरो हरः ब्रह्मणोवचनात्तेन विधिशेषोवशेषतः । चरुप्राशनकाले तु पञ्चवक्त्रप्रकाशकृत् ॥ सहितः सकलैर्देवैः कुतूहलपरायणैः । गिरिजार्थं समायुक्तो वरः सोऽपि महेश्वरः ॥

नवकोटिमुखान्दृष्ट्वा साट्टहासो जनोऽभवत् ।
वैदिकी श्रुतिरित्युक्ता शिव! त्वं स्थिरतां व्रज ॥ २४ ॥

लज्जितासा परित्यागं नाकरोत्पञ्चजन्मसु । भर्ताग्मसितापाङ्गी हरमेवाभ्यगच्छत देवानां पर्वतानाञ्चप्रहृष्टं सकलं कुलम् । ततोविवाहे सम्पूर्णे हरोगात्कौतुकौकसि गणानां चापि सान्निध्येसनामर्षयदम्बिकाम् । पारिवर्हंततोगत्वाशैलेनसविसर्जितः

मानितः सत्कृतश्चापि मन्दरालयमभ्यगात् ।
विश्वकर्मा ततस्तस्यक्षणेन मणिमद् गृहम् ॥ २८ ॥

निर्ममे देवदेवस्यस्वेच्छावर्द्धिष्णुमन्दिरम् । सर्वर्द्धिमत्प्रशस्ताभंमणिविद्रुमभूषितम्

स्थूणासहस्रसंयुक्तं मणिवेदि मनोहरम् । गणा नन्दिप्रभृतयोयस्यद्वारिसमाश्रिताः त्रिनेत्राः शूलहस्ताश्च बभुःशङ्कररूपिणः । वाटिका अस्यपरितःपारिजाताःसहस्रशः कामधेनुर्मणिर्दिव्यो यस्यद्वारिसमाश्रितौ । तस्मिन्मनोहरतरे कामवृद्धिकरे गृहे ॥ वसतःपार्वतीसार्द्धं कामोदृष्टिपथं ययौ । वायुरूपः शिवं दृष्ट्वा कामः प्रोवाचशङ्करम् नमस्ते सर्वरूपाय नमस्ते वृषभध्वज !। नमस्ते गणनाथाय पाहि नाथ ! नमोस्तुते त्वयाविरहितं लोकं शववत्स्पृश्यते मही । न त्वया रहितंकिञ्चिद्दृश्यते सचराचरे त्वं गोप्ता त्वं विधाता च लोकसंहारकारकः । कृपां कुरुमहादेव! देहदानं प्रयच्छ मे

ईश्वर उवाच

यन्मया त्वं पुरादग्धः पार्वतीपुरतोऽनघ । तस्या एव समीपे च पुनर्भवस्वदेहवान् एवमुक्तस्ततः कामः स्वशरीरमुपागतः । ववन्दे चरणौरुद्र! विनयावनतोऽभवत् ॥ ततो ननाम चरणौ पार्वत्याः संप्रहृष्टवान् । लब्धप्रसादस्तुतयोः समीपाद्भुवनत्रये चचारसुमहातेजा महामोहबलान्वितः । पुष्पधन्वा पुष्पबाणस्त्वाकुञ्चितशिरोरुहः सदाघूर्णितनेत्रश्च तयोर्देहमुपाविशत् । दिव्यासवैर्दिव्यगन्धैर्वस्त्रमाल्यादिभिस्तथा सख्यः सम्भोगसमये परिचक्रुः समन्ततः । एवंप्रक्रीडतस्तस्य वत्सराणांशतं ययौ सायमेका निशायद्वन्मैथुने सक्तचेतसः । एतस्मिन्नन्तरे देवास्तारकप्रद्रुता भयात्

ब्रह्माणं शरणं जग्मुः स्तुत्वा तं शरणं गताः ।

देवा ऊचुः

तारकोसौ महारौद्रस्त्वया दत्तवरः पुरा ॥ ४४ ॥
विजित्य तरसा शक्रं भुङ्क्ते त्रैलोक्यपूजितः ।
वधोपायो यथा तस्य जायते त्वं कुरु स्वयम् ॥ ४५ ॥

ब्रह्मोवाच

मयादत्तवरश्चासौ मयैवोच्छिद्यते न हि । स्वयं सम्वर्ध्यकटुकं छेत्तुंकोपिनचार्हति तस्मात्तस्यवधोपायंकथयामिमहात्मनः । पार्वत्यांयोमहेशानात्सूनुरुत्पत्स्यतेहिसः दिनसप्तचतुर्भूत्वा तारकं संहनिष्यति । इतिवाक्यं तु ते श्रुत्वामन्दरंलोकसुन्दरम्

ब्रह्मलोकात्समाजग्मुः पीडिता दैत्यदानवैः ॥ ४६ ॥
तत्रनन्दिप्रभृतयो गणाःशूलभृत पुरः । गृहद्वारे ह्यपावृत्य तस्थुः संयतचेतसः ॥ ५०
देवाश्च दुःखातुरचेतसो भृशं हतप्रभास्त्यक्तगृहाश्रयाखिलाः ।
संप्राप्य मासाश्चतुरस्तपःस्थिता देवे प्रसुप्ते हरतोषणं परम् ॥ ५१ ॥
इतिश्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
ब्रह्मनारदसंमादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने शिवपार्वती-
विवाहवर्णननाम त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः

पैजवनोपाख्याने इन्द्रादीनांशापप्रदानवर्णनम्

गालव उवाच

शक्रादयस्तु देवेशा दुःखसन्तप्तमानसाः । ईश्वरादर्शनभ्रान्तमनःकर्मेन्द्रियात्मकाः
नप्रापुर्लोकनाथंते कृत्वायःप्रतिमाकृतिम् । तपसाऽऽराधयामासुःसर्वभूतहृदिस्थितम्
कपर्दशिरसं देवं शूलहस्तं पिनाकिनम् । कपालखट्वाङ्गधरं दशहस्तं किरीटिनम्
उमासहितमीशानं पञ्चवक्त्रं महाभुजम् । कर्पूरगौरदेहाभं सितभूतिविभूषितम् ॥
नागयज्ञोपवीतेन गजचर्मसमन्वितम् । कृष्णसारत्वचा चापिकृतप्रावरणं विभुम्
कृतध्यानाः सुरास्तत्र वृक्षाधारे समाश्रिताः ।
व्रतचर्या समाश्रित्य प्रचक्रुस्तप उत्तमम् ॥ ६ ॥
षडक्षरेण मन्त्रेण शैवेन विहितां सुराः ।

शूद्र उवाच

व्रतचर्या त्वया या सा प्रोक्ता सञ्जायते कथम् ॥ ७ ॥
ब्रह्मन् ! विस्तरतो ब्रूहि न तृप्ये ते वचोऽमृतैः ॥ ८ ॥

गालव उवाच

जपनभस्मचखट्वाङ्गं कपालंस्फाटिकं तथा । मुण्डमालांपञ्चवक्त्रमर्द्धचन्द्रंचमूर्द्धनि
चित्रकृत्तिपरीधानं कौपीनकुण्डलद्वयम् । घण्टायुग्मंत्रिशूलं च सूत्रं चर्यास्वरूपकम्
अमीभिर्लक्षणैर्लक्ष्यं मयोक्तं तव शूद्रज !। अनेनविधिना सर्वे देवा वह्निपुरोगमाः ॥
सर्वे आराधयामासुः सर्वोपायैर्वरप्रदम् । चातुर्मास्ये च संपूर्णे संपूर्णे कार्त्तिकेऽमले
चीर्णव्रतान् सुरान् दृष्ट्वा विशुद्धांश्च महेश्वरः ।
मतिं तेषां ददौ तुष्टो जीवात्मा सर्वभूतदृक् ॥ १३ ॥
शतरुद्रीयजाप्येन विधानसहितेन च । ध्यानेन दीपदानेन चातुर्मास्ये तुतोष सः ॥
पूजनैः षोडशविधैर्यथा विष्णोस्तथा हरेः ।
कुर्वाणान् भक्तिभावेन ज्ञात्वा देवान् समागतान् ॥ १५ ॥
प्रहृष्टो भगवानुद्रोददौतेषांशुभां मतिम् । ततःसमंत्र्यतेदेवा वह्निस्तुत्वा यथार्थतः
प्रसन्नवदनं चक्रुः कार्यसाधनतत्परम् । कर्मसाक्षी महातेजाः कृत्वा पारावतंवपुः ॥
प्रविवेश ततो मध्ये द्रष्टुं देवं महेश्वरम् । चकार गतिविक्षेपं गुण्ठनैरवगुण्ठनैः ॥
लुण्ठनैः सर्पणैश्चैव चारुरूपोऽद्भुता गतिः । तं दृष्ट्वा भगवांस्तत्र कारणं समबुध्यत
ऊर्ध्वरेतास्ततस्तस्मिन्ससर्जादौदधारतत् । वीर्यंवह्निमुखेचैवसोत्पपातगृहाद्बहिः
गते तस्मिन्पतङ्गेऽथ पार्वती विफलश्रमा । संक्रुद्धा सर्वदेवानां सा शशाप महेश्वरी
यस्मान्ममेच्छा विहता भवद्भिर्दुष्टबुद्धिभिः ।
तस्मात्पाषाणतामाशु व्रजन्तु त्रिदिवौकसः ॥ २२ ॥
निरपत्यानिर्दयाश्च सर्वे देवा भविष्यथ । ततः प्रसादयामासुः प्रणताः शापयन्त्रिताः
महद्दुःखं संप्रविष्टाः पुनः पुनरथाब्रुवन् ॥ २४ ॥

देवा ऊचुः

त्वं माता सर्वदेवानां सर्वसाक्षी सनातना । उत्पत्तिस्थितिसंहारकारणं जगतांसदा
भूतप्रकृतिरूपा त्वं महाभूतसमाश्रिता । अपर्णा तपसां धात्री भूतधात्री वसुन्धरा
मन्त्राराध्या मन्त्रबीजं विश्वबीजलया स्थितिः ।

यज्ञादिफलदात्री च स्वाहारूपेण सर्वदा ॥ २७ ॥
मन्त्रयन्त्रसमोपेता ब्रह्मविष्णुशिवादिषु । नित्यरूपा महारूपा सर्वरूपा निरञ्जना ॥
दोषत्रयसमाक्रान्तजननैः श्रेयसप्रदा । महालक्ष्मीर्महाकाली महादेवी महेश्वरी ॥
विश्वेश्वरी महामाया मायाबीजवरप्रदा । वररूपा वरेण्या त्वं वरदात्री वरासुता
बिल्वपत्रैः शुभैर्ये त्वां पूजयन्ति नराः सदा ।
तेषां राज्यप्रदात्री च कामदा सिद्धिदा सदा ॥ ३१ ॥
चातुर्मास्येऽर्चिता यैस्त्वं बिल्वपत्रैर्विशेषतः ।
तेषां वाञ्छितसिद्ध्यर्थं जाता कामदुघा स्वयम् ॥ ३२ ॥
येऽर्चयन्तिसदालोके महेश्वरसमन्वितम् । बिल्वपत्रैर्महाभक्त्यानतेषां दुःखदुष्कृती
चातुर्मास्ये विशेषेण तव पूजा महाफला । अद्यप्रभृति यैर्लोकैर्बिल्वपत्रैस्तु पूजिता
विधास्यसि महेशानि तेषां ज्ञानमनुत्तमम् । चातुर्मास्येऽधिकफलं बिल्वपत्रंवराननै
उमामहेश्वरप्रीत्यै दत्तंविधिवदक्षयम् । यथा श्रीस्तुलसीवृक्षे तथा बिल्वे च पार्वती
त्वं मूर्त्या दृश्यसे विश्वं सकलाभीष्टदायिनी ।
चातुर्मास्ये विशेषेण सेवितौ द्वौ महाफलौ ॥ ३७ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे
ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्यान इन्द्रादीनां
शापप्रदानंनाम चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः

पैजवनोपाख्यानेऽश्वत्थमहिमावर्णनम्

पैजवन उवाच

श्रीःकथं तुलसीरूपा बिल्ववृक्षे च पार्वती । एतच्च विस्तरेण त्वं मुने तत्त्वंवदप्रभो

गालव उवाच

पुरा देवासुरे युद्धे दानवा बलदर्पिताः । देवान्निजघ्नुः संग्रामे घोररूपाः सुदारुणाः
देवाश्च भयसंविग्ना ब्रह्माणंशरणं ययुः । ते स्तुत्वा पितरं नत्वा बृहस्पतिपुरःसराः
तस्थुःप्राञ्जलयः सर्वेतानुवाच पितामहः । किमर्थं देवनिकरा मत्सकाशमुपागताः
कारणं कथ्यतामाशु वह्नीन्द्रवसुभिर्युतैः ।

देवा ऊचुः

दैत्यैः पराजितास्तात सङ्गरेऽद्भुतकारिभिः ॥ ५
वयं सर्वे पराक्रान्ता अतस्त्वां शरणंगताः । त्राह्यस्मान्देवदेवेश शरणं समुपागतान्
तच्छ्रुत्वाभगवान्प्राह ब्रह्मालोकपितामहः । मयान शक्यते कर्त्तुं पक्षःकस्यजनस्य च
कथयाम्युपायं सद्धर्माश्रितानां भवतांपुरः । एकदाशिवभक्तानां विवादःसुमहानभूत्
सम केशवभक्तैश्च परस्परजिगीषया । ततस्तु भगवानरुद्रः स्वभक्तानां च पश्यताम्
एवं विष्णुगणैः कुर्वन् दध्रे रूपं महाद्भुतम् । तदा हरिहराख्यं च देहार्द्धाभ्यांदधारसः
हरश्चैवार्द्धदेहेन विष्णुरर्द्धेन चाभवत् । एकतो विष्णुचिह्नानि हरचिह्नानि चैकतः ॥
एकतो वैनतेयश्च वृषभश्चान्यतोऽभवत् । वामतो मेघवर्णाभोदेहोश्मनिचयोपमः ॥
कर्पूरगौरः सव्ये तु समजायत वै तदा । द्वयोरैक्यसमं विश्वं विश्वमैक्यमवर्त्तत
विभेदमतयोनष्टाःश्रुतिस्मृत्यर्थबाधकाः । पाखण्डिनोहैतुकाश्च सर्वेविस्मयमागमन्
स्वं स्वं मार्गं परित्यज्य ययुर्निर्वाणपद्धतिम् ।
मन्दरे पर्वतश्रेष्ठे सा मूर्तिर्नित्यसंस्तुता ॥ १५ ॥

प्रथमाद्यैर्गणैश्चैव वर्ततेऽद्यापिनिश्चला । सृष्टिस्थित्यन्तकर्त्रीसा विश्वबीजमनन्तका

महेशविष्णुसंयुक्ता सा स्मृता पापनाशिनी ।

योगिध्येया ससत्या च सत्त्वाधारगुणातिगा ॥ १७ ॥

मुमुक्षवोऽपि तां ध्यात्वा प्रयान्ति परमं पदम् ।

चातुर्मास्ये विशेषेण ध्यात्वा मर्त्यो ह्यमानुषः ॥ १८ ॥

तत्रगच्छन्तियेतेषां सदेवःशंविधास्यति । इत्युक्त्वा भगवांस्तेषांतत्रैवान्तरधीयत

तेपिवह्निमुखा देवाः प्रजग्मुर्मन्दराचलम् । बभ्रमुस्तत्रतत्रैव विचिन्वाना महेश्वरम्

पार्वतीं विल्ववृक्षस्थां लक्ष्मीं च तुलसीगताम् । आदौसर्ववृक्षमयंपूर्वंविश्वमजायत

एतेवृक्षामहाश्रेष्ठाःसर्वेदेवांशसम्भवाः । एतेषां स्पर्शनादेव सर्वपापैः प्रमुच्यते ॥२२

चातुर्मास्ये विशेषेण महापापौघहारिणः । यदा ते नैव ददृशुर्देवास्त्रिभुवनेश्वरम् ॥

तदाकाशभवावाणी प्राह देवान् यथार्थतः ।

ईश्वरः सर्वभूतानां कृपया वृक्षमाश्रितः ॥ २४ ॥

चातुर्मास्येऽथसम्प्राप्ते सर्वभूतदयाकरः । अश्वत्थोऽतः सदासेव्योमन्दवारेविशेषतः

नित्यमश्वत्थसंस्पर्शात्पापं यातिसहस्रधा । दुग्धेन तर्पणं ये वै तिलमिश्रेणभक्तितः

सेचनं वा करिष्यन्ति तृप्तिस्तत्पूर्वजेषु च । दर्शनादेव वृक्षस्य पातकं तु विनश्यति

पिप्पलः पूजितो ध्यातो दृष्टः सेवित एव वा ।

पापरोगविनाशाय चातुर्मास्ये विशेषतः । अश्वत्थं पूजितं सिक्तं सर्वभूतसुखावहम्

सर्वामयहरं चैव सर्वपापौघहारिणम् । ये नराः कीर्त्तयिष्यन्तिनामाप्यश्वत्थवृक्षजम्

न तेषां यमलोकस्य भयं मार्गे प्रजायते । कुङ्कुमैश्चन्दनैश्चैव सुलिप्तं यश्च कारयेत्

तस्यतापत्रयाभावो वैकुण्ठे गणना भवेत् । दुःस्वप्नं दुष्टचिन्ताचदुष्टज्वरपराभवा

विलयं नयपापानिपिप्पल! त्वंहरिप्रिय !। मन्त्रेणानेनयेदेवाःपूजयिष्यन्तिपिप्पलम्

ततस्तेषां धर्मराजो जायते वाक्यकारकः ।

अश्वत्थो वचनेनाऽपि प्रोक्तो ज्ञानप्रदो नृणाम् ॥ ३३ ॥

श्रुतोहरति पापं च जन्मादिमरणावधि । अश्वत्थसेवनं पुण्यं चातुर्मास्ये वि[illegible]

सुमेदेवेवृक्षमध्यमास्थायभगवान्प्रभुः । जलंपृथ्वीगतंसर्वं प्रपिबन्निव सेवते ॥ ३५ ॥

जलं विष्णुर्जलत्वेन विष्णुरेव रसो महान् ।

तस्माद् वृक्षगतो विष्णुश्चातुर्मास्येऽघनाशनः ॥ ३६ ॥

सर्वभूतगतो विष्णुराप्याययतिवै जगत् । तथाऽश्वत्थगतंविष्णुं योनमस्येन्ननारकी

अश्वत्थं रोपयेद्यस्तु पृथिव्यांप्रयतोनरः । तस्यपापसहस्राणिविलयंयान्तितत्क्षणात्

अश्वत्थः सर्ववृक्षाणां पवित्रो मङ्गलान्वितः ।

मुक्तिदोऽपि ततो ध्यातश्चातुर्मास्येऽघनाशनः ॥ ३९ ॥

अश्वत्थेचरणं दत्त्वा ब्रह्महत्या प्रजायते । निष्कारणं संकुथित्वा नरके पच्यतेध्रुवम्

मूले विष्णुः स्थितो नित्यं स्कन्धे केशव एव च ।

नारायणस्तु शाखासु पत्रेषु भगवान् हरिः ॥ ४१ ॥

फलेऽच्युतोन सन्देहःसर्वदेवसमन्वितः । चातुर्मास्येविशेषेणद्रुमःपूज्यःसमुक्तिभाक्

तस्मात्सर्वप्रयत्नेन सदैवाश्वत्थसेवनम् । यः करोतिनरोभक्त्या पापंयातिदिनोद्भवम्

स एव विष्णुर्द्रुम एवमूर्तो महात्मभिः सेवितपुण्यमूलः ।

यस्याश्रयः पापसहस्रहन्ता भवेन्नृणां कामदुघो गुणाढ्यः ॥ ४४ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने अश्वत्थ-महिमावर्णनंनाम पञ्चदशोऽध्यायः ॥ १५ ॥

——:०:——

षोडशोऽध्यायः

पैजवनोपाख्यानेपालाशमहिमावर्णनम्

वाण्युवाच

पलाशो हरिरूपेण सेव्यते हि पुराविदैः । बहुभिर्ह्युपचारैस्तु ब्रह्मवृक्षस्य सेवनम् ॥
सर्वकामप्रदं प्रोक्तं महापातकनाशनम् ।
त्रीणिपत्राणि पालाशे मध्यमं विष्णुशापितम् ॥ २ ॥
वामे ब्रह्मा दक्षिणे च हरएकः प्रकीर्तितः । पालाशपत्रे योभुङ्क्तेनित्यमेव नरोत्तमः ।
अश्वमेधसहस्रस्य फलंप्राप्नोत्यसंशयम् । चातुर्मास्ये विशेषेणभोक्तुर्मोक्षप्रदंभवेत्
पयसावाऽथ दुग्धेन रविवारेऽनिशं यदि ।
चातुर्मास्येऽर्चितो यैस्तु ते यान्ति परमं पदम् ॥ ५ ॥
दृश्यते यदि पालाशः प्रातरुत्थाय मानवैः । नरकानाशुनिर्धूय गम्यते परमं पदम् ॥
पालाशः सर्वदेवानामाधारो धर्मसाधनम् । यत्रलोभस्तु तस्यस्यात्तत्रपूज्योमहातरुः
यथासर्वेषुवर्णेषु विप्रोमुख्यतमो भवेत् । मध्ये सर्वतरूणां च ब्रह्मवृक्षो महोत्तमः ॥
यस्य मूले हरो नित्यं स्कन्धे शूलधरः स्वयम् ।
शाखासु भगवान् रुद्रः पुष्पेषु त्रिपुरान्तकः ॥ ६ ॥
शिवःपत्रेषु वसतिफले गणपतिस्तथा । भङ्गापतिस्त्वचायांतुमज्जायांभगवान् भवः
ईश्वरस्तु प्रशाखासु सर्वोऽयं हरवल्लभः । हरः कर्पूरधवलो यथावद्वर्णितः सदा ॥११
तथा ह्ययं ब्रह्मरूपः सितवर्णो महाभगः ।
चिन्तितो रिपुनाशाय पापसंशोषणाय च ॥ १२ ॥
मनोरथप्रदानाय जायते नात्र संशयः । गुरुवारे समायाते चातुर्मास्ये तथैव च ॥
पूजितस्तु ततो ध्यातः सर्वदुःखविनाशकः ।
देवस्तुत्यो देवबीजं परं यन्मूर्तंब्रह्म ब्रह्मवृक्षत्वमागतम् ॥

नित्यं सेव्यः श्रद्धया स्थाणुरूपश्चातुर्मास्ये सेवितः पापहा स्यात् ॥ १५ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
ब्रह्मनारदसम्वादे पैजवनोपाख्याने पालाशमहिमावर्णनन्नाम
षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

पैजवनोपाख्यानेतुलसीमहिमावर्णनम्

वाण्युवाच

तुलसी रोपिता येन गृहस्थेन महाफला । गृहेतस्य न दारिद्र्यं जायते नात्र संशयः
तुलस्या दर्शनादेव पापराशिर्निवर्तते । श्रियेऽमृतकणोत्पन्ना तुलसी हरिवल्लभा ॥
पिबन्तीरुचिरंपानंप्राणिनांपापहारिणी । यस्यारूपेवसेल्लक्ष्मीःस्कन्धेसागरसम्भवा
पत्रेषु सततं श्रीश्च शाखासु कमला स्वयम् ।
इन्दिरा पुष्पगा नित्यं फले क्षीराब्धिसम्भवा ॥ ४ ॥
तुलसीशुष्ककाष्ठेषु या रूपाविश्वव्यापिनी । मज्जायां पद्मवासाचत्वचासुचहरिप्रिया
सर्वरूपा च सर्वेशा परमानन्ददायिनी । तुलसीप्राशको मर्त्यो यमलोकं न गच्छति
शिरस्था तुलसी यस्य न याम्यैः परिभूयते ।
मुखस्था तुलसी यस्य निर्वाणपददायिनी ॥ ७ ॥
हस्तस्था तुलसी यस्य स तापत्रयवर्जितः । तुलसीहृदयस्थाचप्राणिनांसर्वकामदा
स्कन्धस्था तुलसी यस्य स पापैर्न च लिप्यते ।
कण्ठगा तुलसी यस्य जीवन्मुक्तः सदा हि सः ॥ ६ ॥
तुलसीसम्भवंपत्रंसदावहतियो नरः । मनसा चिन्तितां सिद्धिं सम्प्राप्नोतिनसंशयः
तुलसींसर्वकार्यार्थसाधिनींदुष्टवारिणीम् । योनरःप्रत्यहं सिञ्चेन्न सयातियमालयम्

चातुर्मास्ये विशेषेण वन्दितापिविमुक्तिदा । नारायणंजलगतं ज्ञात्वा वृक्षगतं तथा

प्राणिनां कृपया लक्ष्मीस्तुलसीवृक्षमाश्रिता ।

चातुर्मास्ये समायाते तुलसी सेविता यदि ॥ १३ ॥

तेषां पापसहस्राणियाति नित्यंसहस्रधा । गोविन्दस्मरणंनित्यं तुलसीवनसेवनम्

तुलसीसेचनंदुग्धैश्चातुर्मास्येतिऽतिदुर्लभम् । तुलसींवर्द्धयेद्यस्तु मानवोयदिश्रद्धया

आलवालाम्बुदानैवपावितंसकलंकुलम् । यथाश्रीस्तुलसीसंस्था नित्यमेवहिवर्द्धते

तथातथागृहस्थस्यकामवृद्धिः प्रजायते । ब्रह्मचारी गृहस्थश्च वानप्रस्थोयतिस्तथा

तथा प्रकृतयः सर्वास्तुलसीसेवने रताः । श्रद्धयायदि जायन्तेन तासां दुःखदोहरिः

एको हरिः सकलवृक्षगतो विभाति नानारसेन परिभावितमूर्त्तिरेव ।

वृक्षादिवासमगमत्कमला च देवी दुःखादिनाशनकरी सततं स्मृताऽपि ॥१६

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे

ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये पैंजवनोपाख्यानेतुलसी-

माहात्म्यवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः

पैंजवनोपाख्यानेबिल्वोत्पत्तिवर्णनम्

वाण्युवाच

बिल्वपत्रस्यमाहात्म्यंकथितुं नैव शक्यते । तवोद्देशेन वक्ष्यामि महेन्द्रश्रृणुतत्त्वतः

विहाराश्रममापन्ना देवीगिरिसुता शुभा । ललाटफलके तस्याः स्वेदबिन्दुरजायत

स भवान्या विनिक्षिप्तो भूतले निपपात च । महातरुरयं जातो मन्दरे पर्वतोत्तमे

ततः शैलसुता तत्र रममाणा ययौ पुनः । दृष्ट्वा वनगतं वृक्षं विस्मयोत्फुल्ललोचना ॥

जयां च विजयांचैवपप्रच्छच सखीद्वयम् । कोऽयंमहातरुर्दिव्योविभातिवनमध्यगः

दृश्यते रुचिराकारो महाहर्षकरो ह्ययम् ।

जयोवाच

देवि! त्वद्देहसम्भूतो वृक्षोऽयं स्वेदबिन्दुजः ॥ ६ ॥

नामाऽस्य कुरु वै क्षिप्रं पूजितः पापनाशनः ।

पार्वत्युवाच

यस्मात्क्षोणितलं भित्त्वा विशिष्टोऽयं महातरुः ॥ ७ ॥

उदतिष्ठत्समीपे मे तस्माद्बिल्वो भवत्वयम् ।

इमं वृक्षं समासाद्य भक्तितः पत्रसञ्चयम् ॥ ८ ॥

आहरिष्यत्यसौराजाभविष्यत्येवभूतले । यःकरिष्यति मे पूजांपत्रैःश्रद्धासमन्वितः

यं यं काममभिध्यायेत्तस्यसिद्धिः प्रजायते ।

यो दृष्ट्वा बिल्वपत्राणि श्रद्धामपि करिष्यति ॥ १० ॥

पूजनार्थाय विधये धनदाऽहं न संशयः । पत्राग्रप्राशने यस्तु करिष्यति मनो यदि

तस्य पापसहस्राणि यास्यन्ति विलयं स्वयम् ॥ ११ ॥

शिरःपत्राग्रसंयुक्तंकरोतियदिमानवः । न याम्यायातना ह्यस्य दुःखदात्रीभविष्यति

इत्युक्त्वा पार्वतीहृष्टा जगाम भवनं स्वकम् ।

सखीभिः सहिता देवी गणैरपि समन्विता ॥ १३ ॥

वाण्युवाच

अयं बिल्वतरुः श्रेष्ठः पवित्रः पापनाशनः । तस्यमूलेस्थितादेवी गिरिजानात्रसंशयः

स्कन्धेदाक्षायणीदेवीशाखासुचमहेश्वरी । पत्रेषुपार्वती देवी फलेकात्यायनीस्मृता

त्वचि गौरी समाख्याता अपर्णा मध्यवल्कले ।

पुष्पे दुर्गा समाख्याता उमा शाखाङ्कुरेषु च ॥ १६ ॥

कण्टकेषु च सर्वेषु कोटयोनवसंख्यया । शक्तयः प्राणिरक्षार्थं संस्थितागिरिजाज्ञया

ताभजन्तिसुपत्रैश्चपूजयन्तिसनातनीम् । यं यं कामंकामयन्तेतस्यसिद्धिर्भवेद्ध्रुवम्

महेश्वरी सा गिरिजा महेश्वरी विशुद्धरूपा जनमोक्षदात्री ।

हरं च दृष्ट्वाथ पलाशमाश्रितं स्वलीलया बिल्ववपुश्चकार सा ॥ १६ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे
ब्रह्मनारदसम्वादेचातुर्मास्यमाहात्म्ये पैंजवनोपाख्यानेबिल्वोत्पत्तिवर्णनं
नामाष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः

पैंजवनोपाख्यानेविष्णुशापवर्णनम्

गालव उवाच

इत्युक्त्वाकाशजावार्णी विरराम शुभप्रदा । तेऽपिदेवास्तदाश्चर्यं महद्दृष्ट्वामहाव्रताः
चतुष्टयं च वृक्षाणां चातुर्मास्ये समागते । अपूजयंश्च विधिवद्देवयभावेन शूद्रज !॥
चातुर्मास्येऽथसम्पूर्णेदेवोहरिहरात्मकः । प्रसन्नस्तानुवाचाथ भक्त्याप्रत्यक्षरूपधृक

यूयं गच्छत देवेशा महाव्रतपरायणाः ।
भुङ्ध्वं स्वांश्चाधिकारान् मया ते दानवा हताः ॥ ४ ॥

इत्युक्त्वा देवदेवांशावैक्यरूपधरौयदा । गणानां देवतानाञ्च बुद्धिनिर्भेदता तदा ॥
नयन्तौ तौ तदा ईशौ बभूवतुररिन्दमौ । तेऽपिदेवा निराबाधा हृष्टचित्ता अभेदतः

प्रययुः स्वांश्चाधिकारान् विमानगणकोटिभिः ।

गालव उवाच

तया तत्राऽपि ते देवा पार्वत्या शापमोहिताः ॥ ७ ॥

स्तुत्वातां बिल्वपत्रैश्च पूजयित्वामहेश्वरीम् । प्रसन्नवदनांस्तुत्वा प्रणेमुश्चपुनःपुनः

सा प्रोवाच ततो देवान् विश्वमाता तु संस्तुता ।
मम शापो वृथा नैव भविष्यति सुरोत्तमाः !॥ ६ ॥

तथापिकृतपापानांकरवाणिकृपां च वः । स्वर्गेदूषन्मयानैव भविष्यथसुरोत्तमाः

मर्त्यलोकं च सम्प्राप्यप्रतिमासुच सर्वशः । सर्वे देवाश्च वरदा लोकानांप्रभविष्यथ
पाणिग्रहेण विहितायेकुमाराःकुमारिकाः । तेषांतासां प्रजाश्चैवभविष्यन्तिनसंशयः
देवास्तस्या भयान्नष्टा मर्त्येषुप्रतिमाङ्गताः । भक्तानांमानसंभावंपूरयन्तःसुसंस्थिताः
इत्युक्त्वा सा भगवती देवतानां वरप्रदा । विष्णुं महेश्वरञ्चैवप्रोवाचकुपिताभृशम्

यस्माद्विष्णो महेशानस्त्वयाऽपि न निषेधितः ।
तस्मात्त्वमपि पाषाणो भविष्यसि न संशयः ॥ १५ ॥
हरोऽप्यश्ममयं रूपं प्राप्य लोकविगर्हितम् ।
लिङ्गाकारं विप्रशापान्महद्दुःखमवाप्स्यति ॥ १६ ॥

तच्छ्रुत्वाभगवान्विष्णुःपार्वतीमनुकूलयन् । उवाचप्रणतोभूत्वा हरभार्यां महेश्वरीम

श्रीविष्णुरुवाच

महाव्रते! महादेवि! महादेवप्रिये! सदा । त्वं हिसत्त्वरजःस्याचतामसीशक्तिरुत्तमा
मात्रात्रयसमोपेता गुणत्रयविभाविनी । मायादीनांजनित्री त्वं विश्वव्यापकरूपिणी
वेदत्रयस्तुतात्वं च साध्यारूपेणरागिणी । अरूपा सर्वरूपा त्वं जनसन्तानदायिनी
फलवेलामहाकालीमहालक्ष्मीःसरस्वती । ॐकारश्च वषट्कारस्त्वमेवहि सुरेश्वरी
भूतधात्रिनमस्तेस्तुशिवायैचनमोस्तु ते । रागिण्यैचविरागिण्यै विकरालेनमः शुभे
एवंस्तुताप्रसन्नाक्षी प्रसन्नेनान्तरात्मना । उवाच परमोदारं मिथ्यारोपयुतं वचः

मच्छापो नान्यथाभावी जनार्दन! तवाऽप्ययम् ।
तत्राऽपि संस्थितस्त्वं हि योगीश्वरविमुक्तिदः ॥ २४ ॥

कामप्रदश्च भक्तानां चातुर्मास्ये विशेषतः । निम्नगागण्डकीनामब्रह्मणोदयितासुता
पाषाणसारसम्भूतापुण्यदात्रीमहाजला । तस्याःसुविमलेर्नारेतववासो भविष्यति
चतुर्विशतिभेदेनपुराणज्ञैर्निरीक्षितः । मुखे जाम्बूनदंचैवशालग्रामः प्रकीर्त्तितः ॥ २७ ॥

वर्त्तुलस्तेजसः पिण्डः श्रिया युक्तो भविष्यति ।
सर्वसामर्थ्यसंयुक्तो योगिनामपि मोक्षदः ॥ २८ ॥
ये त्वां शिलागतं विष्णुं पूजयिष्यन्ति मानवाः ।

तेषां सुचिन्तितां सिद्धिं भक्तानां सम्प्रयच्छसि ॥ २६ ॥
शिलागतं च देवेशं तुलस्याभक्तितत्पराः । पूजयिष्यन्ति मनुजास्तेषांमुक्तिर्नदूरतः
शिलास्थितं च यः पश्येत्त्वां विष्णुं प्रतिमागतम् ।
सुचक्राङ्कितसर्वाङ्गं न स गच्छेद्यमालयम् ॥ ३१ ॥

गालव उवाच

इति ते कथितंसर्वंशालग्रामस्यकारणम् । यथासभगवान्विष्णुः पाषाणत्वमुपागतः
गोविन्दोऽपि महाशापंलब्ध्वास्वभवनंगतः । पार्वती च महेशानंकुपिताप्रणमय्य च
एवं स एव भगवान् भवभूतभव्यभूतादिकृत्सकलसंस्थितिनाशनाङ्कः ।
सोऽपि श्रिया सह भवोऽपि गिरीशपुत्र्या सार्द्धं चतुर्षु च द्रुमेषुनिवासमाप

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्त्र्यांसंहितायांतृतीयेब्रह्मखण्डे
ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने विष्णु-
शापोनामैकोनविंशोऽध्यायः ॥ १६ ॥

विंशोऽध्यायः

पैजवनोपाख्यानेवृक्षमाहात्म्यवर्णनम्

सूद्र उवाच

महदाश्चर्यमेतद्धि यत्सुरा वृक्षरूपिणः । चातुर्मास्ये समायाते सर्ववृक्षनिवासिनः
भगवन्केसुरास्ते तु केषु केषु निवासिनः । एतद्विस्तरतो ब्रूहिममानुग्रहकाम्यया

गालव उवाच

अमृतं जलमित्याहुश्चातुर्मास्येतदिच्छया । लीलया विधृतंदेवैःपिबन्तिद्रुमदेवताः
तस्य पापान्महातृप्तिर्जायते नात्र संशयः । बलं तेजश्चकान्तिश्च सौष्ठवं लघुविक्रमः
गुणाएतेप्रजायन्तेपानात्कृष्णांशसंभवात् । नित्यामृतस्यपानेनबलं स्वल्पं प्रजायते

भोजनं तत्प्रशंसन्ति नित्यमेतन्न संशयः । तस्माच्चतुर्षु मासेषु पिबन्ति जलमेवहि
वृक्षस्थाः पितरो देवाः प्राणिनांहितकाम्यया । वृक्षाणांसेवनंश्रेष्ठंसर्वमासेषुसर्वदा
चातुर्मास्येविशेषेणसेविताःसौख्यकारकाः । तिलोदकेनवृक्षाणांसेचनं सर्वकामदम्
क्षीरवृक्षाःक्षीरयुक्तैस्तोयैःसिक्ताःशुभप्रदाः । चतुष्टयंचवृक्षाणांयच्चोक्तंपूर्वतोमया
चातुर्मास्ये विशेषेण सर्वकामफलप्रदम् । ब्रह्मा तु वटमाश्रित्य प्राणिनां स वरप्रदः
सावित्री तिलमास्थाय पवित्रं श्वेतभूषणम् । सुप्ते देवे विशेषेणतिलसेवामहाफला
तिलाः पवित्रमतुलंतिलाधर्मार्थसाधकाः । तिलामोक्षप्रदाश्चैवतिलाःपापापहारिणः
तिलाविशेषफलदास्तिलाः शत्रुविनाशनाः । तिलाः सर्वेषु पुण्येषु प्रथमंसमुदाहृताः
नतिलाधान्यमित्याहुर्देवधान्यमितिस्मृतम् । तस्मात्सर्वेषुदानेषुतिलदानंमहोत्तमम्
कनकेन युता येन तिला दत्तास्तु शूद्रज । ब्रह्महत्यादिपापानां विनाशस्तेन वै कृतः
सावित्री च तिलाः प्रोक्ताः सर्वकार्यार्थसाधकाः ।
तिलैस्तु तर्पणं कुर्याच्चातुर्मास्ये विशेषतः ॥ १६ ॥
तिलानां दर्शनं पुण्यं स्पर्शनं सेवनं तथा । हवनं भक्षणं चैव शरीरोद्वर्त्तनं तथा ॥
सर्वथा तिलवृक्षोऽयंदर्शनादेव पापहा । चातुर्मास्ये विशेषेण सेवितः सर्वसौख्यदः
महेन्द्रो यवमास्थाय स्थितो भूतहिते रतः । यवस्य सेवनं पुण्यं दर्शनंस्पर्शनंतथा
यवैस्तु तर्पणं कुर्याद्देवानां दत्तमक्षयम् । प्रजानां पतयः सर्वेचूतवृक्षमुपाश्रिताः
गन्धर्वा मलयं वृक्षमगुरुं गणनायकः । समुद्रा वेतसं वृक्षं यक्षाः पुन्नागमेव च ॥
नागवृक्षं तथा नागाःसिद्धाःकङ्कोलकंद्रुमम् । गुह्यकाःपनसंचैवकिन्नरामरिचं श्रिताः
यष्टीमधुंसमाश्रित्यकन्दर्पोभूद्व्यवस्थितः । रक्ताञ्जनंमहावृक्षंवह्निराश्रित्यतिष्ठति
यमोविभीतकं चैव बकुलं नैर्ऋताधिपः । वरुणः खर्जुरीवृक्षं पूगवृक्षं च मारुतः
धनदोऽक्षोटकं वृक्षं रुद्राश्च बदरीद्रुमम् । सप्तर्षीणां महाताला बहुलश्चामरैर्वृतः
जम्बूमेघैः परिवृतः कृष्णवर्णोघनाशनः । कृष्णस्य सदृशोवर्णस्तेन जम्बूनगोत्तमः
तत्फलैर्वासुदेवस्तु प्रीतोभवतिदानतः । जम्बूवृक्षंसमाश्रित्यकुर्वन्तिद्विजभोजनम्
तेषांप्रीतो हरिर्दद्यात्पुरुषार्थचतुष्टयम् । चातुर्मास्ये समायाते सुप्ते देवे जनार्दने ॥

ब्राह्मणानभोजयेद्यस्तु सपत्नीकान् शुचिः स्थितः ।

तेन नारायणस्तुष्टो भवेल्लक्ष्मीसहायवान् ॥ २६ ॥

लक्ष्मीनारायणप्रीत्यै वस्त्रालङ्करणैः शुभैः । परिधाय सपत्नीकान् कृतकृत्योभवेन्नरः यद्रात्रित्रितयेनैव वटाशोकभवेन च । यत्फलं जायते तच्च जम्बुना द्विजभोजनात् तस्मिन् दिने एकभक्तं कारयेद्व्रतकृत्तदा । बहुना च किमुक्तेनजम्बूवृक्षप्रपूजनात् पुत्रपौत्रधनैर्युक्तो जायते नात्र संशयः । जम्बूमेथैः परिवृता विद्युताशोक एव च

वसुभिः स्वीकृतो नित्यं प्रियालश्च महानगः ।

आदित्यैस्तु जपावृक्षो ह्यश्विभ्यां मदनस्तथा ॥ ३४ ॥

विश्वेभिश्च मधूकश्च गुग्गुलुः पिशिताशनैः । सूर्येणार्कःपवित्रेणसोमेनाथत्रिपत्रकः खदिरो भूमिपुत्रेण अपामार्गोबुधेन च । अश्वत्थोगुरुणा चैव शुक्रेणोदुम्बरस्तथा शर्मा शनैश्चरेणाथ स्वीकृताशूद्रजातिना । राहुणास्वीकृतादूर्वापितृणांतर्पणोचिता

विष्णोश्च दयिता नित्यं चातुर्मास्ये विशेषतः ।

केतुना स्वीकृता दर्भा याज्ञिकेया महाफलाः ॥ ३८ ॥

विना येन शुभं कर्म संपूर्णं नैव जायते । पवित्राणांपवित्रं यो मङ्गलानां च मङ्गलम् मुमूर्षूणांमोक्षरूपोधरासंस्थोमहाद्रुमः । अस्मिन्वसन्तिसततंब्रह्मविष्णुशिवाःसदा मूलेमध्येतथाग्रेचयस्यनामापितृप्रिदम् । अन्येपिदेवावृक्षांस्तानश्रिश्रित्यमहाद्रुमान् प्रवर्तन्ते हिमासेषु चतुर्षु च न संशयः । चातुर्मास्येदेवपत्न्यःसर्वावल्लीस्समाश्रिताः

प्रयच्छन्ति नृणां कमान् वाञ्छितान्सेविता अपि

तस्मात्सर्वात्मभावेन पिप्पलो येन सेवितः ॥ ४३ ॥

सेविताः सकला वृक्षाश्चातुर्मास्ये विशेषतः ।

तुलसी सेविता येन सर्ववल्लयश्च सेविताः ॥ ४४ ॥

आप्यायितं जगत्सर्वमाब्रह्मस्तम्बसेवितम् । चातुर्मास्येगृहस्थेन वानप्रस्थेन वापुनः ब्रह्मचारियतिभ्यां च सेविता मोक्षदायिनी । एतेषां सर्ववृक्षाणां छेदनं नैवकारयेत् चातुर्मास्ये विशेषेण विना यज्ञादिकारणम् । एतदुक्तमशेषेण यत्पृष्टोहमिह त्वया

यथा वृक्षत्वमापन्ना देवाः सर्वेऽपि शूद्रज !॥ ४८ ॥

अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दश तिन्तिडीश्च ।

कपित्थबिल्वामलकीत्रयं च एतांश्च दृष्ट्वा नरकं न पश्येत् ॥ ४९ ॥

सर्वे देवा विश्ववृक्षेशयाश्च कृष्णाधारा कृष्णमध्याग्रकाश्च ।

यस्मिन्देवे सेविते विश्वपूज्ये सर्वं तृप्तं जायते विश्वमेतत् ॥ ५० ॥

इति श्रीस्कान्दे माहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे ब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्ये पैंजवनोपाख्यानेवृक्षमहात्म्यकथनं नाम विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः

पैंजवनोपाख्यानेशिवपार्वतीसम्वादवर्णनम्

शूद्र उवाच

पार्वती कुपिता देवी कथं देवेन शूलिना ।

प्रसादिता गता शप्त्वा यत्कोपात्क्षुभ्यते जगत् ॥ १ ॥

कथं स भगवान् रुद्रो भार्याशापमवाप ह । वैकृतं रूपमासाद्य पुनर्दिव्यं वपुःश्रितः

गालव उवाच

देवारूपाण्यदृश्यानिकृत्वादेव्यामहाभयात । मनुष्यलोकेसकलेप्रतिमासुच संस्थिताः तेषामपिप्रसन्नासाऽनुग्रहंसमुपाकरोत् । विष्णुस्तुतामहाभागाविश्वमातावनाशिनी तेषां बलाच्च पार्वत्याःशापभारेणयन्त्रितः । तां नित्यमेवानुनयन्नूचे सोवाचशङ्करम् एतेदेवा विश्वपूज्याविश्वस्यचवरप्रदाः । मत्प्रसादाद्भविष्यन्तिभक्तितस्तोषितानरैः चामृतेममकर्मेदंकृतं साधुविनिन्दितम् । वेद्यांविवाहकालेच प्रत्यक्षंसर्वसाक्षिकम्

यत्सप्तमण्डलानां च गमनं च करार्पणम् ।

वह्निश्च वरुणः कृष्णो देवताश्च सवासवाः ॥ ८ ॥

चतुर्दिक्ष्वङ्गसंयुक्ता देवब्राह्मणसंयुताः । एतेषामग्रतो दिव्यं कृत्वा त्वं जनसंसदि प्रमादात्सत्त्वमापन्नो व्यभिचारंकथं कृथाः । गुरवोपिन सन्मार्गे प्रवर्त्तन्ते जनौघवत् निग्राह्यः सर्वलोकेषुप्रबुद्धःश्रूयतेतदा । पुत्रेणापिपिताशास्यःशिष्येणापिगुरुः स्वयम् क्षत्रियैर्ब्राह्मणःशास्योभार्यया च पतिस्तथा । उन्मार्गगामिनं श्रेष्ठमपिवेदान्तपारगम् प्रशासत्यधमाश्चापि श्रुतिराह सनातनी । सन्मार्ग एवसर्वत्र पूज्यतेनापथःक्वचित् येनस्वकुलजो धर्मस्त्यक्तः स पतितो भवेत् । मृतश्च नरकंप्राप्य दुःखभारेणयुज्यते धर्मं त्यजति नास्तिक्याज्ज्ञातिभेदमुपागतः । सनिग्राह्यः सर्वलोकैर्मनुधर्मपरायणैः

कुलधर्मान् ज्ञातिधर्मान् देशधर्मान् महेश्वर !।

ये त्यजन्ति जना अवश्यं कुलाच्च पतिता हि ते ॥ १६ ॥

अग्नित्यागो व्रतत्यागो वचनत्याग एवच । धर्मत्यागो नैव कार्यः कुर्वन्पतितएवहि

न पिता न च ते माता न भ्राता स्वजनोऽपिच ।

पश्यते तव वर्त्ता च अस्पृश्यस्त्वमदन्विषम् ॥ १८ ॥

अस्थिमाला चिताभस्मजटाधारी कुचैलवान् ।

चपलो मुक्तमर्यादस्तस्थं नार्हसि मेऽग्रतः ॥ १९ ॥

अब्रह्मण्यो व्रती भिक्षुर्दुष्टात्मा कपटीसदा । नार्हसित्वं मम पुरः संभाषयितुमीश्वरः एवं सा रुदती देवी बाष्पव्याकुललोचना । महादुःखयुतैवार्साद्विशेनुनयत्यपि ॥ पुनरेव प्रकुपिता हरं प्रोवाच भामिनी । तवार्जवं न हृदये काठिन्यं वेद्मि नित्यदा ब्राह्मणैस्त्वासुरैरुक्तंतन्मृषा प्रतिभाति मे । यस्मान्मयि महादुष्टभावएवकृतस्त्वया ब्राह्मणा वञ्चिता यस्माद्ब्राह्मणैस्त्वं हनिष्यसे । एवमुक्त्वाभगवतीपुनराहनकिञ्चन ईशः प्रसन्नवदनामुपचारैरथाकरोत् । शनैर्नीतिमयैर्वाक्यैर्हेतुमद्भिर्महेश्वरः ॥ २५ ॥ प्रसन्नलोचनां ज्ञात्वा किञ्चित्प्राह हरस्ततः । कोपेन कलुषं वक्त्रं पूर्णचन्द्रसमप्रभम् कस्मात्त्वं कुरुषे भद्रे युक्तमेव वचो न ते । सर्वभूतदया कार्याप्राणिनांहि हितेच्छया यद्यपीष्टोहि यस्यार्थो न कार्यं परपीडनम् । जगत्सर्वं सुतप्रायं तवास्तिवरवर्णिनि!

जगत्पूज्या त्वमेवैका सर्वरूपधारानघे । मया यदि कृतं कर्मावद्यं देवहिताय वै ॥ तथाप्येवं तव सुतो भविष्यतिनसंशयः । अथवामम सर्वेभ्यः प्राणेभ्योऽपिगरीयसी

यदिच्छसि तथा कुर्यां तथा तव मनोरथान् ।

प्रसन्नवदना भूत्वा कथयस्व वरानने !॥ ३१ ॥

इत्युक्ता सा भगवती पुनराह महेश्वरम् । चातुर्मास्ये च संप्राप्ते महाव्रतधरो यदि देवतानां च प्रत्यक्षं ताण्डवंनर्तसे यदि । पारयित्वा व्रतं सम्यग्ब्रह्मचर्यं महेश्वर! मर्त्यार्त्यै यदि देहार्द्धं वैष्णवं च प्रयच्छसि । शापस्यानुग्रहं कुर्यां प्रसन्नवदनासती

नान्यथा मम चित्तं त्वं विश्वासमनुगच्छति ।

तच्छ्रुत्वा भगवांस्तुष्टस्तथेति प्रत्युवाच ताम् ॥ ३५ ॥

सापि हृष्टा भगवती शापस्याऽनुग्रहे वृता ॥ ३६ ॥

इदं पुराणं मनुजः शृणोति श्रद्धायुक्तो भेदबुद्ध्या दृढत्वम् ॥

तस्यावश्यं जीवितं सर्वसिद्धं मर्त्याः सत्याः तच्छ्रेयत्वं प्रयान्ति ॥ ३७ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने शिवपार्वती-सम्वादवर्णनंनामैकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः

हरताण्डवनर्त्तनवर्णनम्

शूद्र उवाच

इदमाश्चर्यरूपं मे प्रतिभाति वचस्तव । यद्यपि स्यान्महाक्लेशो वदतस्तव सुव्रत तथापिमम भाग्येनमत्पुण्यैर्मद्गृहंगतः । न तृप्येत्वन्मुखाम्भोजाच्च्युतवाक्यामृतंपुनः पिबन् गौरीकथाख्यानं विशेषगुणपूरितम् । कथं महेश्वरो नृत्यं चकार सुरसंवृतः

चातुर्मास्ये कथं जातं किं ग्राह्यं व्रतमुच्यते ।
अनुग्रहं कृतवती सा कथं को ह्यनुग्रहः ॥ ४ ॥

एतद्विस्तरतो ब्रूहि! पृच्छतो मे द्विजोत्तम ! । भगवान् पूज्यतेलोकेममानुग्रहकारकः प्रसन्नवदनो भूत्वा स्वस्थः कथय सुव्रत !। गालवश्चापितच्छ्रुत्वा पुनराहप्रहृष्टवान्

गालव उवाच

इतिहासमिमं पुण्यं कथयामि तवानघ । शृणुष्वावहितो भूत्वा यज्ञायुतफलप्रदम् चातुर्मास्येऽथ सम्प्राप्ते हरो भक्तिसमन्वितः । ब्रह्मचर्यव्रतपरः प्रहृष्टवदनोऽभवत् देवतानामथाह्वानं महर्षीणां चकार ह । समागत्य ततो देवा मन्दराचलमास्थिताः

प्रणम्य ते महेशानं तस्थुः प्राञ्जलयोऽग्रतः ।
तानुवाच सुरान् सर्वान् हरो दृष्ट्वा समागतान् ॥ १० ॥
पार्वत्याभिहितं प्राह कस्मिन् कार्यान्तरे सति ।
मया नियुक्तेऽभिनयेप्यत्र साहाय्यकारिणः ॥ ११ ॥

भवन्तिवन्द्रपुरोगाश्चचातुर्मास्येसमागते । ते तथोचुश्च संहृष्टा नमस्कृत्यचशूलिनम् स्वं स्वं भवनमाजग्मुर्विमानैःसूर्यसन्निभैः । तथाऽऽषाढे शुक्लपक्षे चतुर्दश्यां महेश्वरः प्रनर्तयितुमारेभे भवानीतोषणाय च । मन्दरे पर्वतश्रेष्ठे तत्र जग्मुर्महर्षयः ॥ १४ ॥ नारदो देवलो व्यासः शुकद्वैपायनादयः । अङ्गिराश्च मरीचिश्च कर्दमश्च प्रजापतिः कश्यपो गौतमश्चात्रिर्वसिष्ठो भृगुरेव च । जमदग्निस्तथोत्तङ्को रामोभार्गव एव च अगस्त्यश्च पुलोमा च पुलस्त्यः पुलहस्तथा । प्रचेताश्चक्रतुश्चैव तथैवान्ये महर्षयः

सिद्धा यक्षाः पिशाचाश्च चारणाश्चारणैः सह ।
आदित्या गुह्यकाश्चैव साध्याश्च वसवोऽश्विनौ ॥ १८ ॥

एते सर्वे तथेन्द्राद्या ब्रह्मविष्णुपुरोगमाः । समाजग्मुर्महेशस्य नृत्यदर्शनलालसाः ॥

ततो गणा नन्दिमुखा रत्नानि प्रददुस्तथा ।
भूषणानि च वासांसि मुन्यादिभ्यो यथाक्रमम् ॥ २० ॥

ततो वाद्यसहस्रेषु वादितेषु समन्ततः । सर्वैर्जयेतिचैवोक्तो भगवान् व्रतमाविशत्

भवानी हृष्टहृदया महादेवं व्यलोकयत् । जया च विजयाचैव जयन्ती मङ्गलारुणा चतुष्टयसखीमध्ये विरराज शुभानना । तस्याः सान्निध्ययोगेन जगद्भातिगुणोत्तरम् यस्याःशरीरजाशोभावर्णितुंनैवशक्यते । ईशोऽपिगणकोटीभिर्नानावक्त्राभिरीक्षितः पिशाचभूतसङ्घैश्च वृतः परमशोभनः । स्वर्णवेत्रधरो नन्दी वभौकपिमुखोऽग्रतः विद्याधराश्च गन्धर्वाश्चित्रसेनादयस्तथा । चित्रन्यस्ताइवबभुस्तत्रनागा मुनीश्वराः श्रीरागप्रमुखा रागास्तस्य पुत्रा महौजसः । अमूर्त्ताश्चैव ते पुत्रा हरदेहसमुद्भवाः

एकैकस्य च षट् भार्याः सर्वासां च पितामहः ।
ताभिः सहैव ते रागा लीलावपुर्धरास्तथा ॥ २८ ॥

प्रादुर्बभूवुःसहसा चिन्तितास्तेन शम्भुना । तेषांनामानितेवच्मिशृणुष्वत्वंमहाघ्रन! श्रीरागः प्रथमः पुत्र ईश्वरस्य विमोहनः । आसाञ्चक्रे भ्रुवोर्मध्ये परब्रह्मप्रदायकः ॥

तन्मध्यश्चैव माहेशात्समुद्भूतो गणोत्तमः ।
द्वितीयोऽथ वसन्तोऽभूत्कटिदेशान्महायशाः ॥ ३१ ॥

महदङ्कश्च भूतानां चक्राच्चैव विशुद्धतः । पञ्चमस्तु तृतीयोभूत्सुतो विश्वविभूषणः महेश्वरहृदो जातश्चक्रं चैवमनाहतम् । नासादेशात्समुद्भूतो भैरवो भैरवः स्वयम् मणिपूरकनामेदं चक्रं तद्धि विमुक्तिदम् । पञ्चाशच्च तथा वर्णा अङ्कानाम महेश्वरात् राशयो द्वादश तथानक्षत्राणितथैवच । स्वाधिष्ठानसमुद्भूता जगद्बीजसमन्विताः अणेन वृद्धिमायान्ति ततोरेतः प्रवर्तते । रेतसस्तु जगत्सृष्टं नन्दीशजननेन्द्रियम् ॥ आधाराच्च महान्षष्ठो नटोनारायणोऽभवत् । महेशवल्लभःपुत्रो नीलो विष्णुपराक्रमः

एते मूर्तिधरा रागा जाता भार्यासहायिनः ।
भार्यास्तेषां समुद्भूताः शिरोभागात्पिनाकिनः ॥ ३८ ॥
षट्त्रिंशत्परिमाणेन ततस्तास्त्वं निशामय ।
गौरी कोलाहली धीरा द्राविडी मालकौशिकी ॥ ३९ ॥

षष्ठीस्याद्देवगान्धारी श्रीरागस्यप्रियाइमाः । आन्दोलाकौशिकीचैव तथाचरममञ्जरी गण्डगिरीदेवशाखारामगिरीवसन्तगाः । त्रिगुणास्तम्भतीर्थाच अहिरीकुङ्कुमातथा

वैराटी सामवेरी च षड्भार्या पञ्चमेमता । भैरवी गुर्जरी चैव भाषा वेलागुली तथा
कर्णाटकी रक्तहंसा षड्भार्याभैरवानुगाः । बङ्गालीमधुराचैव कामोदाचाक्षिनारिका
देवगिरिच देवाली मेघरागानुगा इमाः । त्रोटकी मोडकी चैव नरा दुम्बी तथैव च
मल्हारी सिन्धुमल्हारीनटनारायणानुगाः । एताहि गिरिशं नत्वा महेशञ्चमहेश्वरीम्

स्वमूर्त्तिवाहनोपेता स्वभर्तृसहिताः स्थिताः ।

ब्रह्मा मृदङ्गवाद्येन तोषयामास शङ्करम् ॥ ४६ ॥

चतुरक्षरवाद्येन सुवाद्यञ्चाकरोत्पुनः । तालक्रियां महेशाय दर्शयामास केशवः ॥
वायवस्तत्र वाद्यञ्च चक्रुः सुस्वरमोजसा । महेन्द्रो वंशवाद्यञ्च सुगिरं सुस्वरं बहु
वह्निः शूर्परवञ्चक्रे पणवञ्च तथाश्विनौ । उपाङ्गवादनं चक्रे सोमः सूर्य्यः समन्ततः
घण्टानां वादनं चक्रुर्गणाः शतसहस्रशः । मुनीश्वरास्तथादेव्यःपार्वतीसहितास्तथा
स्वर्णभद्रासनेष्वेते ह्युपविष्टा व्यलोकयन् । शृङ्गाणां वादनं चक्रुर्वसवः समहोरगाः

भेरीध्वनिं तथा साध्या वाद्यान्यन्ये सुरोत्तमाः ।

झर्झरीगोमुखादीनि साध्याश्चक्रुर्महोत्सवे ॥ ५२ ॥

तन्त्रीलयसमायुक्ता गन्धर्वा मधुरस्वराः । सुवर्णशृङ्गनादञ्च चक्रुः सिद्धाःसमन्ततः
ततस्तु भगवानासीन्महानटवपुर्धरः । मुकुटाः पञ्चशीर्षे तु पन्नगैरुपशोभिताः ॥५४
जटा विमुच्य सकला भस्मोद्धूलितविग्रहः । बाहुभिर्दशभिर्युक्तो हारकेयूरसंयुतः
त्रैलोक्यव्यापकं रूपं सूर्यकोटिसमप्रभम् । कृत्वा ननत भगवान् भासुरं स महानगे
ततंवीणादिकंवाद्यंकांस्यतालादिकङ्घनम् । वंशादिकंतुवादित्रंतोमरादिचनामकम्
चतुर्विधं ततो वाद्यं तुमुलं समजायत । तालानां पटहादीनां हस्तकानां तथैव च
मानानां चैव तानानांप्रत्यक्षंरूपमावभौ । सुकण्ठं सुस्वरं मुक्तं सुगम्भीरंमहास्वनम्
विश्वावसुर्नारदश्च तुम्बुरुश्चैव गायकाः । जगुर्गन्धर्वपतयोऽप्सरसो मधुरस्वराः ॥
ग्रामत्रयसमोपेतं स्वरसप्तकसंयुतम् । दिव्यं शुद्धञ्च साङ्कल्पं तत्र गेयमवर्तत ॥
पर्वतोऽपि महानादं हरपादतलाहतः । भ्रमीभिभ्रमयंस्तत्र महीं सपुरकाननाम् ॥

हस्तकांश्चतुराशीतिं स ससर्ज सदाशिवः ।

ललाटफलकस्वेदात्सूतमागधवन्दिनः ॥ ६३ ॥

महेशहृदयाज्जाता गन्धर्वा विश्वगायकाः । ते मूर्त्तादेवदेवस्य सुरङ्गालयसंयुताः
प्रेक्षकाणामृषीणाञ्च चक्रुराश्चर्यमोजसा । किन्नराःपुष्पवर्षाणिसस्रृजुः स्वैर्गुणैरिह
एवं चतुर्षु मासेषु यदा नृत्यमजायत । अतिक्रान्ताशरज्जाता निर्मलाकाशशोभिता

पद्मखण्डसमाच्छन्नसरोवरमुखाम्बुजा ।

फलवृक्षौषधीभिश्चकिञ्चित्पाण्डुमुखच्छविः ॥ ६७ ॥

ऊर्जशुक्ल चतुर्दश्यां प्रसन्ना गिरिजा तदा ।

समाप्तव्रतचर्यः स ईश्वरोऽपि तदा बभौ ॥ ६८ ॥

सा चोवाचतदा शम्भुं विकचस्वरलोचना । विप्रशापपातितंचयदालिङ्गं भविष्यति
नर्मदाजलसंभूतं विश्वपूज्यं भविष्यति । एवमुक्त्वा ततस्तुष्टा हरस्त्रोत्रं चकार ह
नमस्ते देवदेवाय महादेवाय मौलिने । जगद्धात्रे सवित्रे च शङ्कराय शिवाय च
कपर्दिनेऽजपादाय ब्रह्मगर्भाय तेनमः । हिरण्यरेतसे तुभ्यं नीलग्रीवाय ते नमः ॥
नमो ब्रह्मण्यदेवाय सितभूतिधराय च । पञ्चवक्त्राय रूपाय निरूपाय नमोनमः ॥
सहस्राक्षाय शुभ्राय नमस्ते कृत्तिवाससे । अन्धकासुरमोक्षाय पशूनां पतये नमः ॥
विप्रवह्निमुखाग्राय हराय च भवाय च । शङ्कराय महेशाय ईश्वराय नमोनमः ॥ ७५ ॥
अमूर्त्तब्रह्मरूपाय मूर्त्तानां भावनाय च । नमः शिवाय चोग्राय हराय च भवाय च
नमः कृष्णाय शर्वाय त्रिपुरान्तकहारिणे । अघोराय नमस्तेऽस्तु नमस्ते पुरुषाय ते
सद्योजाताय तुभ्यंभो वामदेवाय ते नमः । ईशानाय नमस्तुभ्यं पञ्चास्यायकपालिने
विरूपाक्षाय भावाय भगनेत्रनिपातिने । पूषदन्तनिपाताय महायज्ञनिपातिने ॥
मृगव्याधाय धर्माय कालचक्राय चक्रिणे । महापुरुषपूज्याय गणानां पतये नमः
गङ्गाधराय भवते भवानीप्रियकारिणे । जगदानन्ददात्रे च ब्रह्मरूपाय ते नमः ॥
गुणातीताय गुणिने सूक्ष्माय गुरवेऽपिच । नमो महास्वरूपाय भस्मनोजन्मकारिणे
वैराग्यरूपिणेनित्यं योगाचार्याय वै नमः । मयोक्तमप्रियं देव स्मरसंहारकारक ॥
क्षन्तुमर्हसि विश्वेश शिरसा त्वांप्रसादये । शापानुग्रह एवैष कृतस्ते वै न संशयः

ममापराधजो मन्युर्न कार्यो भवताऽनघ । एवं प्रसादितः शम्भुर्हृष्टात्मा त्रिदशैः सह तीर्णव्रतपरानन्दनिर्भरःप्राह तामुमाम् । यइमांमत्स्तुतिंभक्त्या पठिष्यतितवोद्गताम्

तस्य चेष्टवियोगश्च न भविष्यति पार्वति ! ॥ ८६ ॥

जन्मत्रयं धनैर्युक्तः सर्वव्याधिविवर्जितः ।

भुक्त्वेह विविधान् भोगानन्ते यास्यति मत्पुरम् ॥ ८७ ॥

इत्युक्त्वा तां महेशोपिस्वमङ्गं प्रददौततः । वैष्णवं वामभागं साप्रतिजग्राहपार्वती शर्वं कपालहस्तं च ग्रीवार्द्धं गरलान्वितम् । मुण्डमालार्द्धहारं चसितगौरं समन्ततः ब्रह्माण्डकोटिजनकं जटाभिर्भूषितंशिरः । सितद्युतिकलाखण्डरत्नभासावभासितम् स्वर्णाभरणसंयुक्तमेकतो भुजगाङ्गदम् । एकतः कृत्तिवसनमन्यतः पट्टकूलवत् । मत्स्यवाहनसंयुक्तमन्यतो वृषभाङ्कितम् । एकतः पार्षदैः सेव्यमन्यतःसखिसेवितम् रूपमवं विधं दृष्ट्वा ब्रह्माद्या देवतागणाः । तुष्टुवुः परयाभक्त्या तेजोभूषितलोचनम्

त्वमेको भगवान्सर्वव्यापकः सर्वदेहिनाम् ।

पितृवद्रक्षकोऽसि त्वं माता त्वं जीवसञ्ज्ञकः ॥ ६४ ॥

साक्षी विश्वस्य बीजं त्वं ब्रह्माण्डवशकारकः ।

उत्पद्यन्ते विलीयन्ते त्वयि ब्रह्माण्डकोटयः ॥ ६५ ॥

ऊर्मयः सागरे नित्यं सलिले बुद्बुदा यथा । अहंकदाचित्त्वेनेत्रात्कदाचित्तव भालतः क्वचित् सङ्गेमहादेव प्रादुर्भूत्वा सृजेजगत् । तवाज्ञाकारिणः सर्वे वयंब्रह्मादयःसुराः अनन्तवैभवोऽनन्तोऽनन्तधामास्यनन्तकः । अनन्तः सर्वभङ्गाय कुरुषे रूपमद्भुतम् ॥ भवानित्वंभयंनित्यमशिवानांपवित्रकृत् । शिवानामपि दात्रीत्वंतपसामपित्वंफलम्

यः शिवः स स्वयं विष्णुर्यो विष्णुः स सदाशिवः ।

इत्यभेदमतिर्जाता स्वल्पा न त्वत्प्रसादतः ॥ १०० ॥

यत्किञ्चिच्च जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ।

मध्ये बहिश्च तत्सर्वं त्रयं व्याप्यस्थिता सदा ॥ १०१ ॥

जगत्पूज्य सुरेशान! जगद्वन्द्ये तथाम्बिके ! । प्रसादं कुरुदेवेशि! देवेश! प्रणता वयम्

इत्युक्त्वा त्रिदशाः सर्वे हृष्टा जग्मुर्यथागतम् ॥ १०३ ॥

गालव उवाच

ते दिव्यमेतदखिलं भुवि ये मनुष्याः संसारसागरसमुत्तरणैकपोतम् ।
संचिन्तयन्ति मनसा हृतकिल्बिषास्ते ब्रह्मस्वरूपमनुयान्ति विमुक्तसङ्गाः ॥१०४

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने हरताण्डवनर्तनंनाम द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः

लक्ष्मीनारायणमहिमावर्णनम्

गालव उवाच

एवं ते लब्धशापाश्च पार्वतीशापपीडिताः ।

अनपत्या बभूवुश्च तथा च प्रतिमां गताः ॥ १ ॥

शालग्रामस्तु गण्डक्यां नर्मदायां महेश्वरः । उत्पद्यते स्वयंभूश्च तावेतौ नैवकृत्रिमौ चतुर्विंशतिभेदेनशालग्रामगतो हरिः । परीक्ष्य पुरुषो नित्यमेकरूपः सदाशिवः । शालग्रामशिला यत्रगण्डकीविमलेजले । तत्र स्नात्वाचपीत्वाचब्रह्मणःपदमाप्नुयात्

तां पूजयित्वा विधिवद्गण्डकीसंभवां शिलाम् ।

योगीश्वरो विशुद्धात्मा जायते नात्र संशयः ॥ ५ ॥

एतत्ते कथितं सर्वं यत्पृष्टोहमिह त्वया । यथा हरो विप्रशापंप्राप्तवांस्तन्निशामय ॥

यः शृणोति नरो भक्त्या वाच्यमानामिमां कथाम् ।

गिरीशनृत्यसम्बन्धामुमादेहार्धवर्णिताम् ॥ ७ ॥

ब्रह्मणः स्तुतिसंयुक्तां स गच्छेत्परमां गतिम् ।

श्लोकार्द्धं श्लोकपादं वा समस्तं श्लोकमेव वा ॥ ८ ॥

यः पठेदविरोधेन मायामानविवर्जितः । स याति परमं स्थानं यत्र गत्वा न शोचति चातुर्मास्ये विशेषेणपठन्श्रृण्वन्नरोत्तमः । लभते चिन्तितांसिद्धिं धनपुत्रादिसंवृतः यथा ब्रह्मादयो देवा शीतवाद्याभियोगतः । परां सिद्धिमवापुस्ते दुर्गाशिवसमीपतः वर्षाकाले च सम्प्राप्ते भक्तियोगेजनार्दने । महेश्वरेऽथ दुर्गायां न भूयःस्तनपोभवेत् गणेशस्यसदा कुर्याच्चातुर्मास्येविशेषतः । पूजां मनुष्योलाभार्थंयत्नो लाभप्रदोहिसः

सूर्यो निरोगतां दद्याद्भक्त्या यैः पूज्यते हि सः ।

चातुर्मास्ये समायाते विशेषफलदो नृणाम् ॥ १४ ॥

इदं हि पञ्चायतनं सेव्यते गृहमेधिभिः । चातुर्मास्ये विशेषेण सेवितंचिन्तितप्रदम्

शालग्रामगतं विष्णुं यः पूजयति नित्यदा ।

द्वारावती चक्रशिलासहितं मोक्षदायकम् ॥ १६ ॥

चातुर्मास्ये विशेषेण दर्शनादपि मुक्तिदम् ।

यस्मिन्स्तुते स्तुतंसर्वंपूजिते पूजितञ्जगत् ॥ १७ ॥

पूजितः पठितो ध्यातःस्मृतोवैकलुषापहः । शालग्रामे किं पुनर्यच्छालग्रामगतोहरिः पुनर्हि हरिर्नैवेद्यं फलञ्चापि धृतं जलम् । चातुर्मास्ये विशेषेण शालग्रामगतंशुभम् तिलाःपुनन्तिसकलंशालग्रामस्यशूद्रज । चातुर्मास्येविशेषेण नरंभक्त्यासमन्वितम् स लक्ष्मीसहितो नित्यंधनधान्यसमन्वितः । महाभाग्यवतांगेहेजायते नात्रसंशयः

स लक्ष्मीसहितो विष्णुर्विज्ञेयो नात्र संशयः ।

तं पूजयेन्महाभक्त्या स्थिरा लक्ष्मीर्गृहे भवेत् ॥ २२ ॥

तावद्दरिद्रता लोके तावद्गर्जति पातकम् ।

तावत्क्लेशाः शरीरेऽस्मिन् न यावद्ध्रियते हरिः ॥ २३ ॥

स एव पूज्यते यत्र पञ्चक्रोशं पवित्रकम् । करोति सकलं क्षेत्रंन तत्राऽशुभसम्भवः एतदेव महाभाग्यमेतदेव महातपः । एष एव परो मोक्षो यत्र लक्ष्मीशपूजनम् ॥२५ शङ्खश्च दक्षिणावर्त्तोलक्ष्मीनारायणात्मकः । तुलसीकृष्णसारोऽत्रयत्रद्वारवतीशिला

तत्र श्रीर्विजयो विष्णुर्मुक्तिरेवं चतुष्टयम् । लक्ष्मीनारायणे पूजां विधातुर्मनुजस्यतु ददातिपुण्यमतुलंमुक्तोभवतितत्क्षणात् । चातुर्मास्येविशेषेणपूज्योलक्ष्मीयुतोहरिः

कुर्वतस्तस्य देवस्य ध्यानं कल्मषनाशनम् ।

तुलसीमञ्जरीभिश्च पूजितो जन्मनाशनः ॥ २६ ॥

पूजितो विल्वपत्रेण चातुर्मास्येऽघहृत्तमः ॥ ३० ॥

सर्वप्रयत्नेन स एव सेव्यो यो व्याप्य विश्वं जगतामधीशः ।

काले सृजत्यत्ति च हेलया वा तं प्राप्य भक्तो न हि सीदतीति ॥ ३१ ॥

इति श्रीस्कान्देमहापुराण एकाशातिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने लक्ष्मीनारायणमहिमावर्णनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः

द्वादशाक्षरमहिमावर्णनम्

गालव उवाच

एकदा भगवान्रुद्रःकैलासशिखरे स्थितः । दधार परमां लक्ष्मीमुमया सहितःकिल गणानां कोटयस्तिस्रस्तं यदा पर्यवारयन् । वीरबाहुर्वीरभद्रो वीरसेनश्च भृङ्गिराट् रुचिस्तुण्डिस्तथानन्दीपुष्पदन्तस्तथोत्कटः । विकटःकण्टकश्चैवहरःकेशोविघण्टकः मालाधरः पाशधरः शृङ्गी च नरनस्तथा । पुण्योत्कटःशालिभद्रो महाभद्रोविभद्रकः कणपः कालपः कालोधनपोरक्तलोचनः । विकटास्यो भद्रकश्च दीर्घजङ्घोविरोचनः पारदो धनदो ध्वांक्षी हंसकोनरकस्तथा । पञ्चशीर्षस्त्रिशीर्षश्च क्रोडदंष्ट्रोमहाद्भुतः सिंहवक्त्रो वृषहनुः प्रचण्डस्तुण्डिरेव च । एते चान्ये च बहवस्तदाभवसमीपगाः महादेव जयेत्युच्चर्भद्रकालीसमन्विताः । भूतप्रेतपिशाचानां समूहा यस्य वल्लभाः

अस्तुवंस्तं समीपस्था वसन्तेसमुपागते । वनराजिर्विभातिस्म नवकोरकशोभिता

दक्षिणानीलसंस्पर्शः कर्वानां सुखकृद्बभौ ।

वियोगिहृदयाकर्षी किंशुकः पुष्पशोभितः ॥ १० ॥

द्वन्द्वादिविक्रियाभावंचिक्रीडुश्चसमन्ततः । तस्मिन्विगाढेसमये मनस्युन्मादकेतथा

नन्दी दण्डधरः सञ्ज्ञांदृष्ट्वाचक्रे हरोपरः । अलं चापलदोषेण तपः कुर्वन्तु भो गणाः

तदा सर्वेवनमपिभूकाण्डजमगुः पुनः । गणास्तेतप आतस्थुर्दृष्ट्वा कान्तिवसन्तजाम्

ततः सा विश्वजननी पार्वती प्राह शङ्करम् । इयं ते करगा नित्यमक्षमाला महेश्वर

त्वया किं जप्यतेदेव सन्देहयति मे मनः । त्वमेकः सर्वभूतानामादिकृत्सकलेश्वरः ॥

न माता न पिता बन्धुस्तव जातिर्नकश्चन ।

अहं तव परं किञ्चिद्वेद्मि नास्तीति किञ्चन ॥ १६ ॥

श्रमेणत्वंसमायुक्तोश्वासोच्छ्वासपरायणः । जपन्नपि महाभक्त्या दृश्यसेत्वंमयासदा

त्वत्तः परतरं किञ्चिद्यत्त्वं ध्यायसिचेतसा । तन्मे कथय देवेश यद्यहं दयिता तव

इति पृष्टस्तदा शम्भुरुवाच हरिसेवकः । हरेर्नामसहस्राणांसारं ध्यायामि नित्यशः

जपामिरामनामाङ्कमवतारं तु सत्तमम् । चतुर्शितिसंख्याकान् प्रादुर्भावान्हरेर्गुणान्

एतेषामपि यत्सारं प्रणवाख्यं महत्फलम् । द्वादशाक्षरसंयुक्तं ब्रह्मरूपं सनातनम् ॥

अक्षरत्रयसम्बद्धं ग्रामत्रयसमन्वितम् । सविन्दुं प्रणवं शश्वज्जपामि जपमालया ॥

वेदसारमिदं नित्यं ह्यक्षरं सततोद्यतम् । निर्मलं ह्यमृतंशान्तं सद्रूपममृतोपमम् ॥

कलातीतंनिर्वशगंनिर्व्यापारंमहत्परम् । विश्वाधारंजगन्मध्यं कोटिब्रह्माण्डबीजकम्

जडं शुद्धक्रियं वाऽपि निरञ्जनं नियामकम् ।

यज्ज्ञात्वा मुच्यते क्षिप्रं घोरसंसारबन्धनात् ॥ २५ ॥

ॐकारसहितं यच्च द्वादशाक्षरबीजकम् । जपतः पापकोटीनां दावाग्नित्वं प्रजायते

एतदेव परं गुह्यमेतदेव परं महः । एतद्धि दुर्लभं लोके लोकत्रयविभूषणम् ॥ २७ ॥

प्राप्यते जन्मकोटीभिः शुभाशुभविनाशकम् । एतदेव परंज्ञानं द्वादशाक्षरचिन्तनम्

चातुर्मास्ये विशेषेण ब्रह्मदं चिन्तितप्रदम् । एतदक्षरजं स्तोत्रं यः समाश्रयते सदा

मनसा कर्मणावाचा तस्य नास्ति पुनर्भवः । द्वादशाक्षरसंयुक्तं चक्रद्वादशभूषितम्

मासद्वादशनामानिविष्णोर्योभक्तितत्परः । शालग्रामेषुतान्युक्त्वा न्यसेदघहराणिच

दिवसे दिवसे तस्य द्वादशाहफलं भवेत् । द्वादशाक्षरमाहात्म्यं वर्णितुं नैव शक्यते

जिह्वासहस्रैरपि च ब्रह्मणापिन वर्ण्यते । महामन्त्रोह्ययंलोकेजप्तो ध्यातःस्तुतस्तथा

पापहा सर्वमासेषु चातुर्मास्ये विशेषतः । इदं रहस्यं वेदानां पुराणानामनेकशः ॥

स्मृतीनामपि सर्वासां द्वादशाक्षरचिन्तनम् ।

चिन्तनादेव मर्त्यानां सिद्धिर्भवति हीप्सिता ॥ ३५ ॥

पुण्यदानेन जाप्येन मुक्तिर्भवति शाश्वती । वर्णैस्तथाश्रमैरेव प्रणवेन समन्वितैः ॥

जपैर्ध्यानैःशमपरैर्मोक्षंयास्यतिनिश्चितम् । शूद्राणाञ्चापि नारीणां प्रणवेनविवर्जितः

प्रकृतीनां च सर्वासां न मन्त्रो द्वादशाक्षरः ।

न जपो न तपः कार्यं कायक्लेशाद्विशुद्धिता ॥ ३८ ॥

विप्रभक्त्या च दानेन विष्णुध्यायेन सिध्यति ।

तासां मन्त्रो रामनाम ध्येयः कोट्यधिको भवेत् ॥ ३९ ॥

रामेति द्व्यक्षरजपःसर्वपापापनोदकः । गच्छंस्तिष्ठञ्छयानो वा मनुजोरामकीर्तनात्

इहनिर्वृतिमायातिप्रान्तेहरिगणोभवेत् । रामेतिद्व्यक्षरोमन्त्रोमन्त्रकोटिशताधिकः

सर्वासांप्रकृतीनांचकथितः पापनाशकः । चातुर्मास्येऽथसम्प्राप्ते सोप्यनन्तफलप्रदः

चातुर्मास्ये महापुण्ये जप्यते भक्तितत्परैः । देववन्निष्फलं तेषां यमलोकस्यसेवनम्

न रामादधिकं किञ्चित्पठनं जगतीतले । रामनामाश्रया ये वै न तेषां यमयातना ॥

ये च दोषा विघ्नकरा मृतका विग्रहाश्रये । रामनाम्नैव विलयं यान्तिनात्रविचारणा

रमते सर्वभूतेषु स्थावरेषु चरेषु च । अन्तरात्मस्वरूपेण यच्च रामेति कथ्यते ॥

रामेति मन्त्रराजोऽयं भयव्याधिविषूदकः । रणे विजयदश्चापि सर्वकार्यार्थसाधकः

सर्वतीर्थफलप्रोक्तो विप्राणामपि कामदः । रामचन्द्रेति रामेति रामेति समुदाहृतः

द्व्यक्षरो मन्त्रराजोऽयं सर्वकार्यकरो भुवि । देवाअपि प्रगायन्तिरामनामगुणाकरम्

तस्मात्त्वमपि देवेशिरामनाम सदा वद । रामनाम जपेद्यो वै मुच्यते सर्वकिल्बिषैः

सहस्रनामजं पुण्यं रामनाम्नैव जायते। चातुर्मास्ये विशेषेण तत्पुण्यं दशधोत्तरम्
हीनजातिप्रजातानां महद्दह्यति पातकम् ॥ ५२ ॥
रामो ह्ययं विश्वमिदं समग्रं स्वतेजसा व्याप्य जनान्तरात्मना।
पुनाति जन्मान्तरपातकानि स्थूलानि सूक्ष्माणि क्षणाच्च दग्ध्वा ॥ ५३ ॥
इतिश्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने द्वादशाक्षर-महिमावर्णनपूर्वकरामनाममहिमावर्णनंनाम चतुर्विशोऽध्यायः॥ २४ ॥

पञ्चविंशोऽध्यायः

ॐकारप्राप्त्यर्थपार्वतीतपोवर्णनम्

पार्वत्युवाच

द्वादशाक्षरमाहात्म्यं मम विस्तरतोवद। यथावर्णं यत्फलं च यथा च क्रियतेमया

श्रीमहादेव उवाच

द्विजातीनां सहङ्कारः सहितो द्वादशाक्षरः। स्त्रीशूद्राणां नमस्कारपूर्वकः समुदाहृतः प्रकृतीनां रामनामसंमतो वा षडक्षरः। सोपि प्रणवहीनःस्यात्पुराणस्मृतिनिर्णयः क्रमोऽयं सर्ववर्णानां प्रकृतीनां सदैव हि। क्रमेण रहितो यस्तु करोतिमनुजोजपम्
तस्य प्रकुप्यति विभुर्नरकादीनां प्रदायकः।

पार्वत्युवाच

मया त्रिमात्रया स्वामिन् सेव्यते जगदीश्वरः ॥ ५ ॥
रूपमस्य कथं जाने वचसामप्यगोचरम्।

ईश्वर उवाच

प्रणवस्याधिकारो न तवास्ति वरवर्णिनि !। नमो भगवते वासुदेवायेति जपः सदा

पार्वत्युवाच

यदि सप्रणवं दद्याद्द्वादशाक्षरचिन्तनम्। प्रणवेनाधिकारो मे कथं भवति धूर्जटे!

ईश्वर उवाच

प्रणवः सर्वदेवानामादिरेष प्रकीर्तितः। ब्रह्मा विष्णुः शिवश्चैव वसन्तिदयितायुताः तत्र सर्वाणि भूतानि सर्वतीर्थानि भागशः। तिष्ठन्ति सर्वतीर्थानि कैवल्यंब्रह्मएवयः तस्ययोग्यातदादेविभविष्यसि यदातपः। चातुर्मास्येहरिप्रीत्यैकरिष्यसि शुभानने तपसा प्राप्यतेकामस्तपसा च महत्फलम्। तपसा जायते सर्वं तत्तपः सुलभंनरैः यशः सौभाग्यमतुलं क्षमासत्यादयो गुणाः। सुलभं तपसा नित्यं तपश्चर्त्तुं नशक्यते
यदा हि तपसो वृद्धिस्तदा भक्तिर्हरौ भवेत्।
तदा हि तपसो हानिर्यदा भक्ति विना कृतम् ॥ १३ ॥
तावत्तपांसि गर्जन्ति देहेऽस्मिन् सततं नृणाम्।
यदा विष्णुं स्मरेन्नित्यं जिह्वाग्रं पावनं भवेत् ॥ १४ ॥

यथा प्रदीपेज्वलिते प्रणश्यति महत्तमः। तथा हरेः कथायां च याति पापमनेकधा तस्मात्पार्वतियत्नेन हरौ सुप्ते तपः कुरु। चातुर्मास्येऽथ संप्राप्ते प्रणवेनसमन्वितम् विशुद्धहृदया भूत्वा मन्त्रराजमिमं जप। स एव भागवांस्तुष्टो द्वादशाक्षरसंयुतम् प्रदास्यति परं ज्ञानं ब्रह्मरूपमखण्डितम्। ब्रह्मकल्पान्तकोटीषु जपत्वं द्वादशाक्षरम् मन्त्रराजं सप्रणवं ध्यायेत्सोपि न नश्यति। इत्युक्ता सा तपोनिष्ठातपश्चरितुमागता हिमाचलस्य शिखरे चातुर्मास्ये समागते। ब्रह्मचर्यव्रतपरा वसनत्रयसंयुता ॥ २० प्रातर्मध्ये पराह्णे च ध्यायन्ती हरिशङ्करम्। वपुर्यथा पुराकृष्टं पूजने शङ्करस्य च सखीजनसमायुक्ता पितुः शृङ्गे मनोहरे। अतपत्सा विशालाक्षी क्षमादिगुणसंयुता

गालव उवाच

या हि योगेश्वरा ध्येया या वन्द्या विश्ववन्दिता।
जननी या च विश्वस्य साऽपि कास्मात्तपोगता ॥ २३ ॥

याहि प्रकृतिसद्रूपा तडित्कोटिसमप्रभा। विरजा या स्वयं वन्द्यागुणतीताचरत्तपः

पृथ्व्यम्बुतेजोवायुश्च गगनं यन्मयं विदुः । मूलप्रकृतिरूपाया सा चकारोत्तमं तपः

या स्थावरं जङ्गममाशु विश्वं व्याप्य स्थिता या प्रकृतेः पुराऽपि ।

स्पृहादिरूपेण च तृप्तिदात्री देवे प्रसुप्ते तपसाऽऽप शुद्धिम् ॥ २६ ॥

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्यानेपार्वतीतपोवर्णनंनाम पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः

हरशापवार्त्तावर्णनम्

गालव उवाच

प्रवृत्तायां शैलपुत्र्यां महत्तपसि दारुणे । कन्दर्पेण पराभूतो विचचार महीं हरः ॥ १

वृक्षच्छायासु तीर्थेषु नदीषु च नदेषु च । जलेन सिञ्चन्स्ववपुः सर्वत्रापि महेश्वरः

तथापि कामाकुलितो न लेभे शर्मकर्हिचित् । एकदायमुनांदृष्ट्वाजलकल्लोलमालिनीम्

विगाहितुं मनश्चक्रे तापार्त्ति शमयन्निव । कृष्णं बभूव तन्नीरं हरकामाग्निवह्निना

दग्धं विगाहनेनाशु म ीप्रायंतदा बभौ । सापि दिव्यवपुः पूर्वं श्यामा भूता हराद्यतः

स्तुत्वा नत्वा महेशानमुवाच पुनरेव सा । प्रसादं कुरुदेवेश वशगाऽस्मि सदा तव

ईश्वर उवाच

अस्मिंस्तीर्थवरे पुण्ये यः स्नास्यति नरो भुवि ।

तस्य पापसहस्राणि यास्यन्ति विलयं ध्रुवम् ॥ ७ ॥

हरतीर्थमितिख्यातंपुण्यंलोकेभविष्यति । इत्युक्त्वा तां प्रणम्याथतत्रैवान्तरधीयत

तस्यास्तीरेमहेशोऽपि कृत्वारूपं मनोहरम् । कामालयं वाद्यहस्तं कृतपुण्ड्रंजटाधरम्

स्वेच्छया मुनिगेहेषुदर्शयत्यङ्गचापलम् । कचिद्गायन्तिगीतानिकचिन्नृत्यतिछन्दतः

स च क्रुद्ध्यति हसतिस्त्रीणां मध्यगतः कचित् ।

एवं विचरतस्तस्य ऋषिपत्न्यः समन्ततः ॥ ११ ॥

चक्रुः शुश्रूषणं गेहे कार्याण्यपि च तत्क्षणात् । तमेवमनसाचक्रुस्तस्यरूपेणमोहिता

भ्रमत्यश्चैव हास्यानि चक्रुस्ता अपि योषितः ।

ततस्तु मुनयो दृष्ट्वा तासां दुःशीलभावनाम् ॥ १३ ॥

चुक्रुधुर्मुनयः सर्वे रूपं तस्य मनोहरम् । गृह्यतां हन्यतामेष कोऽयं दुष्ट उपागतः ॥

इति ते गृह्यकाष्ठानि यदोपस्थे ययुस्तदा । पलायितःसबहुधाभयात्तेषांमहात्मनाम्

योजीवकलयाविश्वं व्याप्य तिष्ठति देहिनाम् । नज्ञायतेनचग्राह्योनभेद्यश्चापिजायते

न शेकुस्ते यदासर्वे गृहीतुं तं महेश्वरम् । तदा शिवं प्रकुपिताः शेपुरित्थंद्विजातयः

यस्माल्लिङ्गार्थमागत्य ह्याश्रमाश्चोरवत्कृतम् । परदारापहरणं तल्लिङ्गं पततांभुवि ॥

सद्य एवहि शापं त्वं दुष्टं प्राप्नुहितापस । एवमुक्ते सशापाग्निर्वज्ररूपधरो महान्

तल्लिङ्गंधूर्जटेश्छित्त्वा पातयामास भूतले । रुधिरौघपरिव्याप्तो मुमोहभगवान्विभुः

वेदनार्त्तो ज्वलवपुर्महाशापाभिभूतधीः । तं तथापतितं दृष्ट्वा त आजग्मुर्महर्षयः ॥

आकाशेसवभूतानि त्रेसुर्विश्वं चचाल ह । देवाश्च व्याकुला जातामहाभयमुपागताः

ज्ञात्वा विप्रा महेशानं पीडिताहृदयेऽभवन् । शुशुचुर्भृशदुःखार्त्तादैवं हि बलवत्तरम्

किं कृतं भगवानेवदेवैरपि स सेव्यते । साक्षीसर्वस्य जगतोऽस्माभिर्नैवोपलक्षितः

वयं मूढधियः पापाः परमज्ञानदुर्बलाः । कथमस्माभिर्यस्यात्माश्रुतश्च ननिवेदितः

मयेदृशो गृहस्थायआत्मा यं च निवेदितः । निर्विकारोनिर्विषयोनिरीहोनिरुपद्रवः

निर्ममो निरहंकारो यः शम्भुर्नोपलक्षितः । यस्य लोकाइमेसर्वेदेहेतिष्ठन्तिमध्यगाः

स एष जगतां स्वामी हरोऽस्माभिर्न वीक्षितः ।

इत्युक्त्वा ते ह्युपविष्टा यावत्तत्र समागताः ॥ २८ ॥

तान्दृष्ट्वा सहसात्रस्तः पुनरेव महेश्वरः । विप्रशापभयान्नष्टस्त्रिपुरारिर्दिवं ययौ ॥

सुरभिं गां चगोलोकेतांतुष्टावसुसंयतः । सृष्टिस्थितिविनाशानांकर्त्र्यैमात्रेनमोनमः

यात्वं रसमयैर्भावैराप्यायसि भूतलम् । देवानां च तथासंघान्पितृणामपिवै गणान्
सर्वज्ञाता रसाभिज्ञैर्मधुरास्वाददायिनि !। त्वया विश्वमिदं सर्वंबलस्नेहसमन्वितम्

त्वं माता सर्वरुद्राणां वसूनां दुहिता तथा ।
आदित्यानां स्वसा चैव तुष्टा वाञ्छितसिद्धिदा ॥ ३३ ॥
त्वं धृतिस्त्वं तथा पुष्टिस्त्वं स्वाहा त्वं स्वधा तथा ।
ऋद्धिः सिद्धिस्तथा लक्ष्मीर्धृतिः कीर्तिस्तथा मतिः ॥ ३४ ॥
कान्तिर्लज्जा महामाया श्रद्धा सर्वार्थसाधिनी ।
त्वया विरहितं किञ्चिन्नास्ति त्रिभुवनेष्वपि ॥ ३५ ॥

वह्नेस्तृप्तिप्रदात्री च देवादीनां च तृप्तिदा । त्वयासर्वमिदंव्याप्तंजगत्स्थावरजङ्गमम्
पादास्तेवेदाश्चत्वारःसमुद्राःस्तनतांययुः । चन्द्रार्कौ लोचनेयस्यारोमाग्रेषुचदेवताः
शृङ्गयोः पर्वताः सर्वे कर्णयोर्वायवस्तथा । नाभौचैवामृतंदेविपातालानिखुरास्तथा

स्कन्धे च भगवान् ब्रह्मा मस्तकस्थः सदाशिवः ।
हृद्देशेच स्थितो विष्णुः पुच्छाग्रे पन्नगास्तथा ॥ ३६ ॥
शकृत्स्था वसवः सर्वे साध्या मूत्रस्थितास्तव ।
सर्वे यज्ञा ह्यस्थिदेशे किन्नरा गुह्यसंस्थिताः ॥ ४० ॥

पितृणां चगणाःसर्वेपुरःस्थाभान्तिसर्वदा । सर्वे यक्षाभालदेशेकिन्नराश्चकपोलयोः
सर्वदेवमयी त्वं हि सर्वभूतविवृद्धिदा। सर्वलोकहिता नित्यं मम देहहिता भव
प्रणतस्तव देवेशि! पूजये त्वांसदानघे !। स्तौमिविश्वार्तिहन्त्रींत्वांप्रसन्नावरदाभव
विप्रशापाग्निनादग्धंशरीरंममशोभने ! । स्वतेजसापुनःकर्त्तुमर्हस्यमृतसंभवे !॥ ४४
इत्युक्त्वा तां परिक्रम्य तस्या देहेलयंगतः । सापिगर्भंदधाराथसुरभिस्तदनन्तरम्
कालातिक्रमयोगेन सर्वो व्याकुलतां ययौ । तस्मिन्प्रणष्टेदेवेशे विप्रशापभयावृते
देवा महार्ति प्रययुश्चचाल पृथिवीतथा । चन्द्रार्कौ निष्प्रभौ चैव वायुश्चण्डएवच

समुद्राः क्षोभमगमंस्तस्मिन्काले द्विजोत्तम !॥ ४८ ॥
यस्मिञ्जगत्स्थावरजङ्गमादिकं काले लयं प्राप्य पुनः प्ररोहति ।

तस्मिन्प्रणष्टे द्विजशापपीडिते जगद्धतप्रायमवर्तत क्षणात् ॥ ४६ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे
ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये हरशापोनाम
षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः

वृषस्तुतिवर्णनम्

गालव उवाच

तस्मिंस्तु पतिते लिङ्गे योजनायामविस्तृते ।
विषादार्त्ता ऋषिगणास्तत्रजग्मुः सहस्रशः ॥ १ ॥

व्यलोकयन्त सर्वत्र द्रष्टुं तत्र महेश्वरम् । नासौ दृष्टिपथे तेषां बभूव भयविह्वलः
वीर्यं वर्षसहस्राणिबहून्यपिसुसञ्चितम् । पृथिवींसकलांव्याप्यस्थितंददृशिरेद्विजाः
तद्दृष्ट्वा सुमहल्लिङ्गं रुधिराक्तं जलैः प्लुतम् । ब्राह्मणाःसंशयगतादह्यमाना वसुन्धरा
तल्लिङ्गं तत्र संस्थाप्य चक्रुस्तां नर्मदां नदीम् । तज्जलंनर्मदारूपंतल्लिङ्गममरकण्टकम्
नरकं वारयत्येतत्सेवितं नरकापहम् । भूतग्रहाश्च सर्वेऽपि यास्यन्ति विलयंध्रुवम्

तत्र स्नात्वा जलं पीत्वा सन्तर्प्य च पितॄंस्तथा ।
सर्वान्कामानवाप्नोति मनुष्यो भुवि दुर्लभान् ॥ ७ ॥

लिङ्गानि नार्मदेयानि पूजयिष्यन्ति ये नरा । तेषां रुद्रमयो देहो भविष्यतिनसंशयः
चातुर्मास्ये विशेषेण लिङ्गपूजा महाफला । चातुर्मास्ये रुद्रजपं हरपूजा शिवे रतिः
पञ्चामृतेन स्नपनं न तेषां गर्भवेदना । ये करिष्यन्ति मधुना सेचनं लिङ्गमस्तके
तेषां दुःखसहस्राणि यास्यन्तिविलयं ध्रुवम् । दीपदानंकृतंयेनचातुर्मास्येशिवाग्रतः
कुलकोटिं समुद्धृत्य स्वेच्छया शिवलोकभाक् । चन्दनागुरुधूपैश्चसुश्वेतकुसुमैरपि

नर्मदाजललिङ्गं ये ह्यर्चयिष्यन्तितेशिवाः । शिलाहरत्वमापन्नाःप्राणिनामपिकाकथा
तत्सम्भूतं महालिङ्गं जलधारणसंयुतम् । पूजयित्वाविधानेनचातुर्मास्येशिवोभवेत्
चातुर्मास्ये ये मनुजा नर्मदामरकण्टके । तीर्थेस्नाष्यन्तिनियतास्तेषांवासस्त्रिविष्टपे

ब्रह्मोवाच

इत्युक्त्वा ते द्विजास्तत्र स्थाप्य लिङ्गं यथाविधि ।
अमरकण्टकतीर्थे च नर्मदां च महानदीम् ॥ १६ ॥

पुनश्चिन्ता पराजाताविश्वस्यक्षोभकारणे । पद्मासन गताभूत्वाप्राणायामपरायणाः
चिन्तयामासुरव्यग्रंहृदयस्थंमहेश्वरम् । ततो देवा महेन्द्राद्याःसम्प्राप्यामरकण्टकम्

ब्राह्मणानां स्तुतिं चक्रुर्विनयानतकन्धराः ।
नमोऽस्तु वो द्विजातिभ्यो ब्रह्मविद्भ्यो महेश्वराः ॥ १९ ॥

भूसुरेभ्यो गुरुभ्यश्चविमुक्तेभ्यश्च बन्धनात् । यूयं गुणत्रयातीता गुणरूपागुणाकराः
गुणत्रयमयैर्भावैः सततं प्राणबुद्बुदाः । येषांवाक्यजलेनैव पापिष्ठा अपि शुद्धताम्

प्रयान्ति पापपुञ्जाश्च भस्मसाद्यान्ति पापिनाम् ।
शस्त्रं लोहमयं येषां वागेव तत्समन्विताः ॥ २२ ॥

पापैः परा विभूतानांतेषांलोकोत्तरंबलम् । क्षमयापृथिवीतुल्याः कोपेवैश्वानरप्रभाः
पातनेऽनेकशक्तीनां समर्था यूयमेव हि । स्वर्गादीनां तथा याने भवन्तोगतयोध्रुवम्
सत्कर्मकारकाश्चैव सत्कर्मनिरताः सदा । सत्कर्मफलदातारः सत्कर्मभ्यो मुमुक्षवः
सावित्रीमन्त्रनिरता ये भवन्तोघनाशनाः । आत्मानं यजमानं च तारयन्ति न संशयः
वह्नयश्चतथाविप्रास्तर्पिताःकार्यसाधकाः । चातुर्मास्येविशेषेण तेषां पूजामहाफला
कोपिताः सर्वदेहस्य नाशनाय भवन्तिहि । तावन्नवज्रमिन्द्रस्यशूलं नैव पिनाकिनः

दण्डो यमस्य तावन्नो यावच्छापो द्विजोद्भवः ।
अग्निना ज्वाल्यते दृश्यं शापोऽदृष्टानपि स्वयम् ॥ २९ ॥

हन्ति जातानजातांश्चतस्माद्विप्रंनकोपयेत् । विप्रकोपाग्निना दग्धोनरकान्नैवमुच्यते
शस्त्रक्षतोऽपि नरकान्मुच्यते नात्र संशयः । देवानामपिसर्वेषां सामर्थ्यं भेदने न हि

वाङ्मात्रेण हि विप्रस्य भिद्यते सकलञ्जगत् ।
ते यूयं गुरवोऽस्माकं विश्वकारणकारकाः ॥ ३२ ॥

प्रसादपरमा नित्यं भवन्तु भुवनेश्वराः । ईश्वरेण विना सर्वे वयं लोकाश्चदुःखिताः

तत्कथ्यतां स भगवान् कुत्रास्ते परमेश्वरः ।

गालव उवाच

ज्ञात्वा मुनिभयत्रस्तं देवेशं शूलपाणिनम् ॥ ३४ ॥

सुरभीगर्भसम्भूतं देवानूचुर्महर्षयः । स्वागतं देवदेवेभ्यो ज्ञातो वै स महेश्वरः ॥
तत्र गच्छन्तु देवेशा यत्र देवः सनातनः । इत्युक्त्वा ते महात्मानः सहदेवैर्ययुस्तदा
गोलोकं देवमार्गेण यत्र पायसकर्दमः । घृतनद्यो मधुह्रदा नदीनां यत्र सङ्कुशः ॥३७
पूर्वजानां गणाः सर्वे दधिपीयूषपाणयः । मरीचिपाः सोमपाश्च सिद्धसङ्घास्तथापरे
घृतपाश्चैवसाध्याश्च यत्र देवाः सनातनाः । ते तत्र गत्वा मुनयोददृशुः सुरभीसुतम्
तेजसाभास्करञ्चैवनीलनामेतिविश्रुतम् । इतस्ततोभिधावन्तं गवां सङ्घातमध्यगम्
नन्दा सुमनसाचैव सुरूपा च सुशीलका । कामिनीनन्दिनीचैव मेध्या चैवहिरण्यदा
धनदा धर्मदा चैव नर्मदासकलप्रिया । वामना लम्बिकाकृष्णादीर्घशृङ्गासुपिच्छिका

तारा तरेयिका शान्ता दुर्विषह्या मनोरमा ।
सुनासा दीर्घनासा च गौरा गौरमुखी हया ॥ ४३ ॥

हरिद्रवर्णानीला च शङ्खिनी पञ्चवर्णका । विनताभिनता चैव भिन्नवर्णा सुपत्रिका

जयाऽरुणा च कुण्डोध्नी सुदती चारुचम्पका ।
एतासां मध्यगं नीलं दृष्ट्वा ता मुनिदेवताः ॥ ४५ ॥

विचरन्तिसुरूपंतंसञ्जातंविस्मयोन्मुखाः । मुनीश्वराःकृपाविष्टा इन्द्राद्याहृष्टमानसाः

स्तुतिमारेभिरे कर्त्तुं तेजसा तस्य तोषिताः ।

शूद्र उवाच

कथं नालेति नामासौ जातोऽयमद्भुताकृतिः ॥ ४७ ॥
किमस्तुवन् प्रसन्नास्ते ब्राह्मणा विश्वकारणम् ।

गालव उवाच

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ॥ ४८ ॥

श्वेतः खुरविषाणेषु स नीलोवृषभः स्मृतः । चतुष्पादोधर्मरूपोनीललोहितचिह्नकः
कपिलः खुरचिह्नेषु स नीलोवृषभःस्मृतः । योऽसौ महेश्वरोदेवो वृषश्चापिसएवहि
चतुष्पादो धर्मरूपो नालः पञ्चमुखो हरः । यस्य सन्दर्शनादेव वाजपेयफलं लभेत्
नीलेच पूजितेयस्मिन् पूजितंसकलञ्जगत् । स्निग्धग्रासप्रदानेनजगदाव्यापितम्भवेत्

यस्य देहे सदा श्रीमान् विश्वव्यापी जनार्दनः ।
नित्यमभ्यच्चर्यते योऽसौ वेदमन्त्रैः सनातनैः ॥ ५२ ॥

ऋषय ऊचुः

त्वं देवः सर्वगोप्तृणां विश्वगोप्तासनातनः । विघ्नहर्ता ज्ञानदश्चधर्मरूपश्च मोक्षदः
त्वमेव धनदःश्रीदः सर्वव्याधिनिषूदनः । जगतां शर्मकरणे प्रवृत्तः कनकप्रदः ॥५५॥
तेजसां धाम सर्वेषां सौरभेय महाबल !। शृङ्गे धृतश्च कैलासःपार्वतीसहितस्त्वया
वेदस्तुत्यो वेदमयो वेदात्मा वेदवित्तमः । वेदवेद्यो वेदयानो वेदरूपो गुणाकरः ॥

गुणत्रयेभ्योऽपि परो याथात्म्यं वेदकस्तव ।
वृषस्त्वं भगवन् देवं यस्तुभ्यं कुरुते त्वघम् ॥ ५८ ॥

वृषलः स तु विज्ञेयो रौरवादिषु पच्यते । पदा स्पृष्ट्वा स तु नरो नरकादिषुयातनाः
सेव्यते पापनिचयैर्निगाढप्रायबन्धनैः । क्षुत्क्षामंच तृषाऽऽक्रान्तंमहाभारसमन्वितम्
निर्दयायेप्रशोष्यन्तिमतिस्तेषांनशाश्वती । चतुर्भिःसहितंमर्त्या विवाहविधिनातुये
विवाहं नीलरूपस्य येकरिष्यन्तिमानवाः । पितृनुद्दिश्यतेषां वै कुलेनैवास्तिनारकी
त्वं गतिःसर्वलोकानां त्वंपितापरमेश्वरः । त्वयाविना जगत्सर्वं तत्क्षणादेवनश्यति
परा चैवतु पश्यन्तीमध्यमावैखरीतथा । चतुर्विधानां वचसामीश्वरंत्वांविदुर्बुधाः
चतुः शृङ्गं चतुष्पादं द्विशीर्षं सप्तहस्तकम् । त्रिधाबद्धं धर्ममयं त्वामेव वृषभंविदुः
तृप्तिदं सर्वभूतानां विश्वव्यापकमोजसा । ब्रह्मधर्ममयंनित्यं त्वामात्मानं विदुर्जनाः

अच्छेद्यस्त्वमभेद्यस्त्वमप्रमेयो महायशाः ।

अशोष्यस्त्वमदाह्योऽसि विदुः पौराणिका जनाः ॥ ६७ ॥
त्वदाधारमिदं सर्वं त्वदाधारमिदञ्जगत् ।
त्वदाधाराश्च देवाश्च त्वदाधारं तथाऽमृतम् ॥ ६८ ॥
जीवरूपेण लोकांस्त्रीन् व्याप्य तिष्ठसि नित्यदा ।
एवं स संस्तुतो नीलो विप्रैस्तैः सोमपायिभिः ॥ ६६ ॥

प्रसन्नवदनोभूत्वा विप्रान्प्रणतितत्परः । पुनरेव वचः प्रोचुर्विप्रा कृतशिवागसः ॥
वरं दत्तुमहेशस्य नीलरूपस्य धर्मतः । एकादशाहे प्रेतस्य यस्य नोत्सृज्यते वृषः ॥
प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि । पुनरेवतु सर्पन्तं दृष्ट्वा नीलं महावृषम् ॥

स्वल्पक्रोधसमाविष्टं द्विजाश्चक्रुस्तमङ्कितम् ।
चक्रञ्च वामभागेषु शूलं पार्श्वे च दक्षिणे ॥ ७३ ॥

उत्ससृजुर्गवां मध्ये तं देवैर्गोपितं तदा । ततो देवगणाः सर्वे महर्षीणां गणाः पुनः
स्वानि स्थानानि ते जग्मुर्मुनयो वीतमत्सराः ॥ ७४ ॥

एवं ऋषीणां दयितासु सक्तः कामार्त्तचित्तो मुनिपुङ्गवानाम् ।
शापं समासाद्य शिवोपि भक्त्या रेवाजलेऽगात्सुशिलामयत्वम् ॥ ७५ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांतृतीये ब्रह्मखण्डे
ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्यानेवृषस्तुतिर्नाम
सप्तविंशोऽध्यायः ॥ २७ ॥

अष्टाविंशोऽध्यायः

पैजवनोपाख्यानफलवर्णनम्

गालव उवाच

इति ते कथितं सर्वं शालग्रामकथानकम् । महेश्वरस्यचोत्पत्तिर्यथालिङ्गत्वमापसः
तस्माद्धरं लिङ्गरूपं शालग्रामगतं हरिम् । येऽर्चयन्तिनराभक्त्यानतेषां दुःखयातनाः
चातुर्मास्ये समायाते विशेषात्पूजयेच्चतौ । अर्चितौ यावभेदेन स्वर्गमोक्षप्रदायकौ
देवौ हरिहरौ भक्त्या विप्रवह्निगवाङ्गतौ । येऽर्चयन्तिमहाशूद्र! तेषांमोक्ष प्रदोहरिः
वेदोक्तं कारयेत्कर्म पूर्तेष्टं वेदतत्परः । पञ्चायतनपूजा च सत्यवादोह्यलोलता ॥ ५ ॥
विवेकादिगुणैर्युक्तः स शूद्रो याति सद्गतिम् ।
ब्रह्मचर्यं तपो नाऽन्यद्द्वादशाक्षरचिन्तनात् ॥ ६ ॥
मन्त्रैर्विना षोडशसोपचारैः कार्या सुपूजानरकादिहन्तुः ।
यथा तथा वै गिरिजापतेश्च कार्या महाशूद्र! महाघहन्त्री ॥ ७ ॥

ब्रह्मोवाच

एवं कथयतोरेषा रजनी क्षयमाययौ । सच्छूद्रो गालवश्चैव शिष्यैश्च परिवारितः ॥
स तेन पूजितो विप्रो ययौ शीघ्रं निजाश्रमम् ॥ ६ ॥
य इमं शृणुयान्मर्त्यो वाचयेच्छ्रावयेच्चवा । श्लोकंवासर्वमपिचतस्यपुण्यक्षयोन हि
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे
ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्यानफल
वर्णनं नामाष्टाविंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः

कार्त्तिकेयोत्पत्तिवर्णनपूर्वकध्यानयोगवर्णनम्

नारद उवाच

कथं नित्या भगवती हरपत्नी यशस्विनी ! योगसिद्धिं सुमहतीं प्राप मासचतुष्टये
मन्त्रराजमिमं जप्त्वा द्वादशाक्षरसंभवम् । एतन्मे विस्तरेण त्वंकथयस्वयथातथम्

ब्रह्मोवाच

चातुर्मास्ये हरौ सुप्ते पार्वती नियतव्रता । मनसाकर्मणा वाचा हरिभक्तिपरायणा
चारुशृङ्गे पितुर्नित्यं तिष्ठन्ती तपसि स्थिता ।
देवद्विजाग्निगोश्वत्थातिथिपूजापरायणा ॥ ४ ॥
चातुर्मास्येऽथ संप्राप्तेविमलेहरिवासरे । जजाप परमं मन्त्रं यथादिष्टं पिनाकिना
शङ्खचक्रधरो विष्णुश्चतुर्हस्तः किरीटधृक् । मेघश्यामोम्बुजाक्षश्चसूर्यकोटिसमप्रभः
गरुडाधिष्ठितो हृष्टो वसन् व्याप्य जगत्त्रयम् ।
श्रीवत्सकौस्तुभयुतः पीतकौशेयवस्त्रकः ॥ ७ ॥
सर्वाभरणशोभाभिरभिदीप्तमहावपुः । बभाषे पार्वतीं विष्णुः प्रसन्नवदनः शुभाम्
देवि! तुष्टोऽस्मि भद्रन्ते कथयस्व त्वमीप्सितम् ॥ ८ ॥

पार्वत्युवाच

तज्ज्ञानममलं देहि येन नावर्त्तनं भवेत् । इत्युक्तः समहाविष्णुः प्रत्युवाचहरप्रियाम्
स एव देवदेवेशस्तव वक्ष्यत्यसंशयम् । सएवभगवान्साक्षी देहान्तरबहिःस्थितः
विश्वस्रष्टा चगोप्ताचपवित्राणांचपावनः। अनादिनिधनो धर्माधर्मादीनांप्रभुर्हि सः
अक्षरत्रयसेव्यं यत्सकलं ब्रह्म एव सः । मूर्त्तामूर्त्तस्वरूपेण यो योजन्मधरो हि सः
ममाधिकारो नैवास्तिवक्तुं तवनसंशयः । इत्युक्त्वाभगवानीशोविररामप्रहृष्टवान्
एतस्मिन्नन्तरे शम्भुर्गिरिजाश्रममभ्यगात् । सर्वभूतगणैर्युवतोविमानेसार्वकामिके

तथा वै भगवान् देवः पूजितः परमेश्वरः । सखीनामपि प्रत्यक्षमाश्चर्यं समजायत
स्तुत्वाऽथ तं महादेवं विष्णुर्देहे लयं ययौ । अथोवाचमहेशानः पार्वतीं परमेश्वरः
विमानवरमारोह तुष्टोऽहं तव सुव्रते !। गत्वैकान्तप्रदेशन्ते कथये परमं महः ॥ १७॥
एवमुक्त्वाभगवतीं करे गृह्य मुदान्वितः । विमानवरमारोप्य लीलया प्रययौ तदा

नानाधातुमयानद्रीन् नानारत्नविचित्रितान् ।
नदीनिर्भरकुञ्जांश्च नदान्कोकिलकूजितान् ॥ १८ ॥
अखातान् देवखातांश्च गङ्गाद्याःसरितस्तथा ।
सौगन्धिकांश्च कह्लारान् सहस्रदलपिञ्जरान् ॥ २० ॥
दर्शयन् कर्णिकारांश्च कोविदारान् महाद्रुमान् ।
तालांस्तमालान् हिन्तालान् प्रियङ्गून् पनसानपि ॥ २१ ॥

तिलकान् बकुलांश्चैवबहूनपिचपुष्पितान् । क्षेत्राणिपद्मनाभस्यपिञ्जराणिविदर्शयन्
ययौ देवनदीतीरे गतं शरवणं महत् । फुल्लकाशं स्वर्णमयंशरस्तम्बगणान्वितम्
हेमभूमिविभागस्थं वह्निकान्तिमृगद्विजम् । तत्र तीरगतानांचमुनीनामूर्ध्वरेतसाम्
आश्रमान्सविमानाग्रेतिष्ठन्पत्न्यैह्यदर्शयत् । षट्कृत्तिकाश्चददृशेपार्वत्यावनसन्निधौ

स्नाताः स्वलङ्कृताश्चन्द्रपत्न्यस्ता विरजाम्बराः ।
ऊचुस्ता योजितकराः क्व त्वं पुत्राय गच्छसि ॥ २६ ॥
तत्कथ्यतां महाभागे! स च ते दर्शनं गतः ।

पार्वत्युवाच

मम भाग्यवशात्पुत्रः कथमुत्सङ्गमाहरेत् ॥ २७ ॥
नह्यभाग्यवशात्पुंसां क्वापि सौख्यं निरन्तरम् ॥ २८ ॥

सुतनाम्नाप्यहं पृष्टा भवतीनांचदर्शनात् । किमर्थमिहसंप्राप्ताःकथ्यतामविलम्बितम्

कृत्तिका ऊचुः

वयं तव सुतं न्यस्तं प्रदातुमिह सुन्दरि । चातुर्मास्यैरवौस्नातुमागतादेवनिम्नगाम्

पार्वत्युवाच

नहास्यावसरःसख्यःसत्यमेवहिकथ्यताम् । एकान्तावसरेहास्यंजायते चेतरेतरम्

कृत्तिका ऊचुः

सत्यं वदामहे देवि! तवत्रैलोक्यशोभिते !। अस्यस्तम्बसमूहस्यमध्यस्थंबालकंवृणु
कृत्तिकानां वचःश्रुत्वाशङ्किता पार्वतीतदा । ददर्श बालं दीप्ताभं षण्मुखंदीप्तवर्चसम्
तडित्कोटिप्रतीकाशंरूपदिव्यश्रियायुतम् । वह्निपुत्रं च गाङ्गेयं कार्त्तिकेयंमहाबलम्
सावत्सेतिगृहीत्वातंकुमारंपाणिनामुदा । विमानमध्यमादायकृत्वोत्सङ्गेह्यवाचह

चिरं जीव चिरं नन्द चिरं नन्दय बान्धवान् ।
इत्युक्त्वा गाढमालिङ्ग्य मूर्ध्नि चाऽऽघ्राय तं सुतम् ॥ ३६ ॥

संहृष्टा परमोदारं भास्वरंहृष्टमानसम् । कार्त्तिकेयो महाप्रेम्णा प्रणिपत्य महेश्वरम्
ततः प्राञ्जलिरव्यग्रः प्रहृष्टेनान्तरात्मना । तद्विमानं ययौ शीघ्रं तीर्त्वा नदनदीपर्तान्
जम्बूद्वीपमतिक्रम्य लक्षयोजनमायतम् । ततः समुद्रं द्विगुणंलवणोदं तथैवच
उत्तरांश्च कुरून्नीत्वाविमानेनार्कतेजसा । समुद्राद्द्विगुणं द्वीपं कुशनामेतिकीर्तितम्
दिव्यलोकसमाक्रान्तंदिव्यपर्वतसङ्कुलम् । इक्षूदाद्द्विगुणंद्वीपंतद्द्वीपाद्द्विगुणंपुनः

तमतिक्रम्य तत्सिन्धोर्द्विगुणं क्रौञ्चसञ्ज्ञितम् ।
ततोऽपि द्विगुणं सिन्धुः सुरोदो यक्षसेवितः ॥ ४२ ॥

ततोऽपिद्विगुणंद्वीपंशाकद्वीपेतिसंज्ञितम् । अर्णवद्विगुणंतस्मादाज्यरूपंसुनिर्मितम्
परमस्वादुसम्पूर्णं यत्र सिद्धाःसमन्ततः । तस्माच्चद्विगुणंद्वीपंशाल्मलीवृक्षसंज्ञितम्
समुद्रो द्विगुणस्तत्रदधिमण्डोदसंभवः । साध्यावसन्तिनियतंमहत्तपसिसंस्थिताः
ततोऽपि द्विगुणंद्वीपंप्लक्षनामेति विश्रुतम् । क्षीरोदोद्विगुणस्तत्रयत्रसन्तिमहर्षयः
षडिमानिसुदिव्यानिभौमाःस्वर्गाउदाहृताः । तत्रस्वर्णमयीभूमिस्तथारजतसंयुता
वृक्षैर्मधूपमस्वादैः सर्वकामप्रदायिका । यत्र स्त्रीपुरुषाणां च कल्पवृक्षागृहेस्थिताः
वासांसिभूषणानां च समूहान् वर्षयन्तिच । एतानिदृष्टचिह्नानिद्वीपानिमुनिसत्तम
महेश्वरो विमानेनन्यत्यक्रामद्विहायसा । प्लक्षद्वीपस्यचप्रान्ते द्विगुणः क्षीरसागरः
तन्मध्ये सुमहद्द्वीपं श्वेतं नामसुनिश्चितम् । रम्यकःपर्वतस्तत्रशतशृङ्गोऽमितद्रुमः

तस्य शृङ्गेमहद्दिव्यैविमानंस्थापितंयदा । तदामृतफलैर्वृक्षैः सेवितेहैमबालुके क्षीरस्कन्देन विहृते शिलातलसुसंवृते । विविक्ते सर्वसुभगे मणिरत्नसमन्विते उमायै कथयामास देवदेवः पिनाकधृक् । कार्त्तिकेयोऽपिशुश्राव गुह्याद्गुह्यतरंमहत् ध्यानयोगं मन्त्ररूपंद्वदशाक्षरसंज्ञितम् । प्रणवेन युतंसाग्रयं सरहस्यं श्रुतेः परम्

ईश्वर उवाच

अक्षरत्रयसंयुक्तो मन्त्रोऽयंसकृदक्षरः । माघमासहितश्चायममायो विश्वपावनः

विष्णुरूपो विष्णुमध्यो मन्त्रत्रयसमन्वितः ।

तुरीयकलयाशेषब्रह्माण्डगणसेवितः ॥ ५७ ॥

निष्कामैर्मुनिभिः सेव्यो महाविद्यादिसेवितः ।

नाभितः शिरसि व्याप्त अखण्डसुखदायकः ॥ ५८ ॥

ओङ्कारेति प्रियोक्तिस्ते महादुःखविनाशनः । तंपूर्वंप्रणवंध्यात्वाज्ञानरूपंसुखाश्रयम् ज्ञात्वा सर्वगतं ब्रह्म देहशोधनतत्परः । पद्मासनपरो भूत्वा संपूज्य ज्ञानलोचनः ॥ नेत्रेमुकुलिते कृत्वाकरौकृत्वा तु संहतौ । चेतसि ध्यानरूपेणचिन्तयेच्छिवमङ्गलम्

तडित्कोटिप्रतीकाशं सूर्यकोटिसमच्छविम् ।

चन्द्रलक्षसमाच्छन्नं पुरुषं द्योतिताखिलम् ॥ ६२ ॥

मूर्त्तामूर्त्तविराजन्तं सदसद्रूपमव्ययम् । चिन्तयित्वा विराड्रूपं न भूयःस्तनपोभवेत्

चातुर्मास्ये सकृदपि ध्यानात्कल्मषसंक्षयः ॥ ६३ ॥

एवं च मद्रूपमिदं मुरारेरमोघवीर्यं गुणतोऽप्यपारम् ।

विलोकयेद्योऽघविनाशनाय क्षणं प्रभुर्जन्मशतोद्भवाय ॥ ६४ ॥

इतिश्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये कार्त्तिकेयोत्पत्तिवर्णनपूर्वक-ध्यानयोगोनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

———

त्रिंशोऽध्यायः

ज्ञानयोगवर्णनम्

पार्वत्युवाच

ध्यानयोगमहं प्राप्यज्ञानयोगमवाप्नुयाम् । तथाकुरुष्वदेवेश! यथाऽहममरीभवे ॥ १

ईश्वर उवाच

प्रत्युक्तोऽयं मन्त्रराजोद्वादशाक्षरसञ्ज्ञितः । जप्तव्यः सुकुमाराङ्गि वेदेसारःसनातनः प्रणवः सर्ववेदाद्यःसर्वब्रह्माण्डयाजकः । प्रथमःसर्वकार्येषुसर्वसिद्धिप्रदायकः ॥ ३ ॥ सितवर्णो मधुच्छन्दा ऋषिर्ब्रह्मा तु देवता । परमात्मा तु गायत्रीनियोगःसर्वकर्मसु एतद्ब्रह्ममयं बीजंविश्वमत्रसमन्वितम् । वेदवेदाङ्गतत्त्वाख्यंसदसद्रूपमव्ययम् ॥ ५॥ नकारः पीतवर्णस्तु जलबीजः सनातनः । बीजंपृथ्वीमनश्छन्दोविषहाविनियोगतः

मोकारः पृथिवीर्बीजो विश्वामित्रसमन्वितः ।

रक्तवर्णो महातेजा धनदो विनियोजितः ॥ ७ ॥

भकारः पञ्चवर्णस्तु जलबीजः सनातनः । मरीचिना समायुक्तः पूजितःसर्वभोगदः गकारो हेमरक्ताभोभरद्वाजसमन्वितः । वायुर्बीजोविनियोगं कुर्वतां सर्वभोगदः वकारः कुन्दधवलोव्योमबीजोमहाबलः । ऋषिमन्त्रिपुरस्कृतययोजितोमोक्षदायकः

तेकारो विद्युद्धिकारः सोमबीजं महत्स्मृतम् ।

अङ्गिरा मुनिशार्दूलो वर्जितं कर्मकामिकम् ॥ ११ ॥

वाकारो धूम्रवर्णश्च सूर्यबीजं मनोजवम् । पुलस्त्यर्षिसमायुक्तं नियुक्तंसर्वसौख्यदम् सुकारश्चाक्षरोनित्यं जपाकुसुमभास्वरः । मनोबीजं दुर्विषह्यं पुलहाश्रितमर्थदम् ॥ देकाराक्षरकंवर्णं हंसरूपं च कर्बुरम् । सिद्धिबीजं महासत्त्वं क्रतौ कृतनियोजितम्

वाकारो निर्मलो नित्यं यजमानस्तु बीजभृत् ।

प्रचेताऋषिमाश्रेयं मोक्षे मोक्षप्रदायकम् ॥ १५ ॥

यकारस्य महाबीजं पिङ्गवर्णश्च खेचरी । भूचरी च महासिद्धिः सर्वदाभवचिन्तनम्
भृगुयन्त्रे समाभ्यर्च्य नियोगे सर्वकर्मकृत् । गायत्रीच्छन्दएतेषांदेहन्यासक्रमोभवेत्
ॐकारं सर्वदा न्यस्यन्नकारं पादयोर्द्वयोः । मोकारं गुह्यदेशे ते भकारं नाभिपङ्कजे
गकारं हृदये न्यस्य वकारः कण्ठमध्यगः । तेकारंदक्षिणे हस्तेवाकारोवामहस्तकः

सुकारं मुखजिह्वायां देकारः कर्णयोर्द्वयोः ।
वाकारश्चक्षुषोर्द्वन्द्वे यकारं मस्तकंन्यसेत् ॥ २० ॥

लिङ्गमुद्रा योनिमुद्रा धेनुमुद्रा तथा त्रयम् । सकलं कृतमेतद्धि मन्त्ररूपे विनाक्षरम्
योजपेत्प्रत्यहं देवि न स पापैः प्रलिप्यते । एतद्द्वादशलिङ्गारं कर्मस्थं द्वादशाक्षरम्
शालग्रामशिलाश्चैव द्वादशैवहि पूजिताः । ताभिः सहाक्षरैरेभिः प्रत्यक्षैःसहसम्पदि
यथावर्णमनुध्यानैर्मुनिबीजसमन्वितैः । विनियोगेन सहितैश्छन्दोभिः समलङ्कृतैः
ध्यानैर्जपैः पूजितैश्च भक्तानां मुनिसत्तम !। मोक्षोभवतिवन्धेभ्यःकर्मजेभ्योनसंशयः

अयं हि ध्यानकर्माख्यो योगो दुष्प्राप्य एव हि ।
ध्यानयोगं पुनर्वच्मि शृणुष्वैकाग्रमानसः ॥ २६ ॥

ध्यानयोगे न पापानां क्षयो भवति नान्यथा । जपध्यानमयोयोगःकर्मयोगोनसंशयः
शब्दब्रह्मसमुद्भूतो वेदेन द्वादशाक्षरः । ध्यानेन सर्वमाप्नोतिध्यानेनाप्नोतिशुद्धताम्
ध्यानेन परमं ब्रह्ममूर्त्तौ योगस्तुध्यानजः । सावलम्बोध्यानयोगोयन्नारायणदर्शनम्
द्वितीयोनिखिलालम्बो ज्ञानयोगेन कीर्त्तितः । अरूपमप्रमेयं यत्सर्वकायं महः सदा

तडित्कोटिसमप्रख्यं सदोदितमखण्डितम् ।
निष्कलं सकलं वापि निरञ्जनमयं वियत् ॥ ३१ ॥

तत्स्वरूपं भोगरूपं तुर्यातीतमनूपमम् । विभ्रान्तकरणं मूर्त्तं प्रकृतिस्थं च शाश्वतम्
दृश्यादृश्यमजं चैव वैराजं सन्ततोज्ज्वलम् । बहुलं सर्वजं धर्म्यंनिर्विकल्पमनीश्वरम्
अगोत्रं निर्मलं वापि ब्रह्माण्डशतकारणम् । निरीहंनिर्ममं बुद्धिशून्यरूपं च निर्मलम्
तदीशरूपं निर्देहंनिर्द्वन्द्वंसाक्षिमात्रकम् । शुद्धस्फटिकसङ्काशंध्यातृध्येयविवर्जितम्

नोपमेयमगाधं त्वं स्वीकुरुष्व स्वतेजसा ।

पार्वत्युवाच

तत्कथं प्राप्यते सम्यग्ज्ञानयोगस्वरूपकम् ॥ ३६ ॥
नारायणममूर्त्तश्च स्थानं तस्य वद प्रभो !।

ईश्वर उवाच

शिरःप्रधानं गोत्रेषु शिरसा धार्यते महान् ॥ ३७ ॥

शिरसा पूजितो देवः पूजितं सकलं जगत् । शिरसाधार्यतेयोगःशिरसाध्रियतेबलम्

शिरसा ध्रियते तेजो जीवितं शिरसि स्थितम् ।
सूर्यः शिरो ह्यमूर्त्तस्य मूर्त्तस्यापि तथैव च ॥ ३६ ॥

उरस्तुपृथिवीलोकः पादश्चैव रसातलम् । अयं ब्रह्माण्डरूपे च मूर्त्तामूर्त्तस्वरूपतः
विष्णुरेव ब्रह्मरूपो ज्ञानयोगाश्रयः स्वयम् । सृजते सर्वभूतानि पालयत्यपि सर्वशः
विनाशयति सर्वं हि सर्वदेवमयोह्ययम् । सर्वमासेष्वाधिपत्यंयेनविष्णोःसनातनम्
तस्मात्सर्वेषु मासेषु सर्वेषु दिवसेष्वपि । सर्वेषुयामकालेषुसंस्मरन् मुच्यतेहरिम्
चातुर्मास्ये विशेषेण ध्यानमात्रात्प्रमुच्यते । अमूर्त्तसेवनंगङ्गातीर्थध्यानाद्वरं परम्
सर्वदानोत्तरश्चैव चातुर्मास्ये न संशयः । सर्वमेवकृतंपापं चातुर्मास्ये शुभाशुभम् ॥
अक्षय्यं तद्भवेद्देवि! नात्र कार्या विचारणा । तस्मात्सर्वप्रयत्नेन ज्ञानयोगो बहूत्तमः
सेवितो विष्णुरूपेण ब्रह्ममोक्षप्रदायकः । शृणुष्वावहिताभूत्वामूर्त्तामूर्त्तेस्थितिंशुभे

न कथ्यं यस्य कस्य सुतस्याऽप्यवशस्य च ।
अदान्तायाथ दुष्टाय चलचित्ताय दाम्भिके ॥ ४८ ॥
स्ववाक्च्युताय निन्द्याय न वाच्या योगजाकथा ।
नित्यभक्ताय दान्ताय शमादिगुणिने तथा ॥ ४६ ॥

विष्णुभक्ताय दातव्या शूद्रायापि द्विजन्मने । अभक्तायाप्यशुचये ब्रह्मस्थानंनकथ्यते
मद्भक्त्यायोगसिद्धित्वं गृहाणाशुतपोधने !। अभूतं ज्ञानगम्यं तं विद्धिनारायणंपरम्
नादरूपेण शिरसि तिष्ठन्तं सर्वदेहिनाम् । स एव जीवशिरसिवर्त्तते सूर्यबिम्बवत्
सदोदितः सूक्ष्मरूपोमूर्त्तोमूर्त्याप्रणीयते । अभ्यासेनसदा देवि! प्राप्यते परमात्मकः

शरीरे सकलादेवायोगिनोनिवसन्तिहि । कर्णे तु दक्षिणे नद्यो निवसन्तितथापराः
हृदये चेश्वरः शम्भुर्नाभौ ब्रह्मा सनातनः । पृथ्वीपादतलाग्रे तु जलं सर्वगतं तथा॥
तेजो वायुस्तथाकाशंविद्यतेभालमध्यतः । हस्ते च पञ्चतीर्थानिदक्षिणेनात्रसंशयः
सूर्यो यद्दक्षिणं नेत्रं चन्द्रो वाममुदाहृतम् ।
भौमश्चैव बुधश्चैव नासिके द्वे उदाहृते ॥ ५७ ॥
गुरुश्च दक्षिणे कर्णे वामकर्णे तथा भृगुः । मुखे शनैश्चरः प्रोक्तो गुदे राहुः प्रकीर्तितः
केतुरिन्द्रियगः प्रोक्तो ग्रहाः सर्वे शरीरगाः । योगिनो देहमासाद्य भुवनानि चतुर्दश
प्रवर्त्तन्ते सदा देवी तस्माद्योगं सदाऽभ्यसेत् ।
चातुर्मास्ये विशेषेण योगी पापं निकृन्तति ॥ ६० ॥
मुहूर्त्तमपियोयोगीमस्तकेधारयेन्मनः । कर्णौ पिधाय पापेभ्यो मुच्यतेऽसौनसंशयः
अन्तरं नैव पश्यामि बिष्णोर्योगपरस्यवा । एकोपियोगीयद्गेहे ग्रासमात्रंभुनक्तिच
कुलानि त्रीणि सोऽवश्यं तारयेदात्मना सह ।
यदि विप्रो भवेद्योगी सोऽवश्यं दर्शनादपि ॥ ६३ ॥
सर्वेषां प्राणिनां देविपापराशिनिषूदकः । सक्रियोयोगनिरतः सच्छूद्रोयोगभाग्यदि
भवेत्सद्गुरुभक्तोवासोप्यमूर्त्तफलंलभेत् । यो योगीनियताहारः परब्रह्मसमाधिमान्
चातुर्मास्ये विशेषेण हरौ सलयभाग्भवेत् ।
यथा सिद्धकरस्पर्शाल्लोहं भवति काञ्चनम् ॥ ६६ ॥
तथा मूर्त्तं हरिप्रीत्या मनुष्योलयमाव्रजेत् । यथा मार्गजलं गङ्गापतितं त्रिदशैरपि
सेवितं सर्वफलदं तथा योगी विमुक्तिदः । यथा गोमयमात्रेण वह्निर्दीप्यति सर्वदा
देवतानांमुखंतद्धिकीर्त्यतेयाज्ञिकैःसदा । एवं योगी सदाभ्यासाज्जायतेमोक्षभाजनम्
योगोऽयं सेव्यते देवि ! ज्ञानसिद्धिप्रदः सदा ।
सनकादिभिराचार्यैर्मुमुक्षुभिरधीश्वरैः ॥ ७० ॥
प्रथमं ज्ञानसम्पत्तिर्जायते योगिनां सदा । तेषां गृहीतमात्रस्तु योगी भवतिपार्वति
ततस्तु सिद्धयस्तस्य त्वणिमाद्याःपुरोगताः ।

भवन्ति तत्राऽपि मनो न दद्याद्योगिनाम्वरः ॥ ७२ ॥
सर्वदानक्रतुभवं पुण्यं भवति योगतः । योगात्सकलकामाप्तिर्न योगाद्भुवि प्राप्यते
गात्र हृदयग्रन्थिर्न योगान्ममतारिपुः । न योगसिद्धस्य मनोहर्तुं केनाऽपि शक्यते
स एव विमलो योगी यच्चित्तं शिरसि स्थितम् ।
स्थिरीभूतव्यथं नित्यं दशमद्वारसम्पुटे ॥ ७५ ॥
कर्णौ पिधाय मर्त्यस्य नादरूपं विचिन्वतः । तदेवप्रणवस्याग्रं तदेव ब्रह्म शाश्वतम्
तदेवाऽनन्तरूपाख्यं तदेवामृतमुत्तमम् ।
घ्राणवायौ प्रघोषोऽयं जठराग्नेर्महत्पदम् ॥ ७७ ॥
पञ्चभूतं निवासं यज्ज्ञानरूपमिदं पदम् । पदं प्राप्यविमुक्तिःस्याज्जन्मसंसारबन्धनात्
पदाप्तिर्दुर्लभा लोके योगसिद्धिप्रदायिका ॥ ७९ ॥
एवं ब्रह्ममयं विभाति सकलं विश्वं चरं स्थावरं
विज्ञानाख्यमिदं पदं स भगवान् विष्णुः स्वयं व्यापकः ।
ज्ञात्वा तं शिरसि स्थितं बहुवरं योगेश्वराणां परं
प्राणी मुञ्चति सर्पवज्जगतिजां निर्मोकमायाकृतिम् ॥ ८० ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे
ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये ज्ञानयोगकथनं नाम
त्रिंशोऽध्यायः ॥ ३० ॥

एकत्रिंशोऽध्यायः

मत्स्येन्द्रनाथोत्पत्तिवर्णनम्

ईश्वर उवाच

यदा चित्तामसं कर्म त्यक्त्वा कर्मसुजायते । तदाज्ञानमयोयोगीर्जीवतांमोक्षदायकः
यदानिर्ममता देहे यदा चित्तं सुनिर्मलम् । यदा हरौभक्तिस्तदा बन्धो न कर्मणा
कुर्वन्नेवहिकर्माणिमनः शान्तं नृणां यदा । तदा योगमयी सिद्धिर्जायतेनात्रसंशयः
गुरुत्वं स्थानमसकृदनुभूय महामतिः । जीवन्विष्णुत्वमासाद्य कर्मसङ्गात्प्रमुच्यते
कर्माणिनित्यजातानिनित्यनैमित्तिकानि च । इच्छयानैवसेव्यानिदुःखतापविवृद्धये

कर्मणामीशितारश्च विष्णुं विद्धि महेश्वरि !।

तस्मिन्संत्यज्य सर्वाणि संसारान्मुच्यतेऽखिलात् ॥ ६ ॥

एतदेव परं ज्ञानमेतदेव परन्तपः । एतदेव परं श्रेयो यत्कृष्णे कर्मणोर्पणम् ॥ ७ ॥
अयं हि निर्मलो योगोनिर्गुणःसउदाहृतः । तद्विष्णोःकर्मजनितंशुभत्वप्रतिपादनम्
तावद्भ्रमन्ति संसारे पितरः पिण्डतत्पराः । यावत्कुले भक्तियुतः सुतोनैवप्रजायते

तावद् द्विजाश्च गर्जन्ति तावद्गर्जति पातकम् ।

तावत्तीर्थान्यनेकानि यावद्भक्तिं न विन्दति ॥ १० ॥

स एव ज्ञानवाँल्लोकेयोगिनांप्रथमो हि सः । महाक्रतूनामाहर्त्ता हरिभक्तियुतोहिसः
निमिषं निर्जयन्मेषं योगः समभिजायते । वाणीजये योगिनस्तुगोमेधश्चप्रकीर्तितः
मनसो विजये नित्यमश्वमेधफलं लभेत् । कल्पनाविजयान्नित्यंयज्ञं सौत्रमणिलभेत्
देहस्योत्सर्जनान्नित्यं नरयज्ञःप्रकीर्तितः । पञ्चेन्द्रियपशून्हत्वाऽनग्नौ शीर्षेच कुण्डके
गुरूपदेशविधिना ब्रह्मभूतत्वमश्नुते । स योगी नियताहारो दण्डत्रितयधारकः ॥

त्रिदण्डी स तु विज्ञेयो ज्ञाते देवे निरञ्जने ।

मनोदण्डः कर्मदण्डो वाग्दण्डो यस्य योगिनः ॥ १६ ॥

स योगी ब्रह्मरूपेण जीवन्नेव समाप्यते । अज्ञानी बध्यतेनित्यं कर्मभिर्बन्धनात्मकैः

कुर्वन्नेव हि कर्माणि ज्ञानी मुक्तिं प्रयाति हि ।

यदा हि गुरुभिः स्थानं ब्रह्मणः प्रतिपाद्यते ॥ १८ ॥

तदैव मुक्तिमाप्नोति देहस्तिष्ठति केवलम् । यावद्ब्रह्मफलावाप्त्यै प्रयातिपुरुषोत्तमः
तावत्कर्ममयी वृत्तिर्ब्रह्मप्रक्षान्तराभवेत् । अवान्तराणिपर्वाणि ज्ञेयानिमुनिभिः सदा

मोक्षमार्गो द्विजानां च श्रुतिस्मृतिसमुच्चयात् ।

मोक्षोऽयं नगराकारश्चतुर्द्वारसमाकुलः ॥ २१ ॥

द्वारपालास्तत्र नित्यं चत्वारस्तु शमादयः । तएव प्रथमं सेव्या मनुजैर्मोक्षदायकाः
शमश्च सद्विचारश्च सन्तोषः साधुसङ्गमः । एते वैहस्तगा यस्य तस्य सिद्धिर्नदूरतः
योगसिद्धिर्विष्णुभक्त्या सद्धर्माचरणेन च । प्राप्यते मनुजैर्देवि! एतज्ज्ञानमलं विदुः
ज्ञानार्थश्च भ्रमन्मर्त्यो विद्यास्थानेषुसर्वशः । सद्योज्ञानंसद्गुरुतो दीपार्चिरिव निर्मला

मुहूर्तमात्रमपि यो लयं चिन्तयति ध्रुवम् ।

तस्य पापसहस्राणि विलयं यान्ति तत्क्षणात् ॥ २६ ॥

रागद्वेषौ परित्यज्य क्रोधलोभविवर्जितः । सर्वत्र समदर्शी च विष्णुभक्तस्यदर्शनम्
सर्वेषामपिजीवानां दयायस्यहृदिस्थिरा । शौचाचारसमायुक्तोयोगीदुःखंनविन्दति
मायादिपटलैर्हीनो मिथ्यावस्तुविरागवान् । कुसंसर्गविहीनश्च योगसिद्धेश्चलक्षणम्
ममतावह्निसंयोगो नराणां तापदायकः । उत्पन्नंशमनं तस्ययोगिनः शान्तिचारणम्
इन्द्रियाणामथोद्धृत्यमनसैव निषेधयेत् । यथा लोहेन लोहं च घर्षितंतीक्ष्णतांव्रजेत्
बुद्धिर्हि द्विविधादेहे हेया ग्राह्याविशुद्धिदा । संसारविषयात्याज्या परब्रह्मणिसाशुभा
अहंकारो यथा देवि पापपुण्यप्रदायकः । ज्ञाते तत्त्वे शुभफलकृते संधाय नान्यथा ॥

श्यामलं च उपस्थं च रूपातीतान्नराः शिवम् ।

हृदिस्थं शिरसिस्थं च द्वयं बद्धविमुक्तये ॥ ३४ ॥

एतदक्षरमव्यक्तममृतं सकलं तव । रूपारूपविष्णुरूपरूपे मूर्त्तं निवेदितम् ॥ ३५ ॥
एवंज्ञात्वाविमुच्येतयोगीसंसारबन्धनात् । गुरूपदेशाद्गृहस्थो लभतेनान्यथाक्वचित्

यदा गुरुः प्रसन्नात्मा तस्य विश्वंप्रसीदति । गुरुश्च तोषितोयेन संतुष्टः पितृदेवताः
गुरूपदेशःप्रतिमा सद्विचारः शमेमनः । क्रिया च ज्ञानसहिता मोक्षसिद्धं हिलक्षणम्
क्रियापतिर्विष्णुरेव स्वयमेव हि निष्क्रियः ।
स च प्राणचिरूपाय द्वादशाक्षरबीजकः ॥ ३६ ॥
द्वादशाक्षरकं चक्रं सर्वपापनिवर्हणम् । दुष्टानां दमनं चैव परब्रह्मप्रदायकम् ॥ ४० ॥
एतदेव परं ब्रह्म द्वादशाक्षररूपधृक् । मया प्रकाशितं देवि! स्वयं हि विमलंतव ॥
एतल्लोके योगिनां ध्यानरूपं भक्तिग्राह्यं श्रद्धया चिन्तयेच्च ।
चातुर्मास्ये जन्मकोट्यां च जातं पापं दग्ध्वा मुक्तिदः कैटभारिः ॥ ४२ ॥

ब्रह्मोवाच

तस्मिन्नवसरे तत्र क्षीरसागरमध्यतः । निर्गतश्च विमानाग्रे तेजोभाराभिपीडितः
उरोबाहुकृतिंकुर्वन्सान्निध्यंसमुपागतः । महामत्स्योऽज्ञातपूर्वः सन्निधानेऽनहंकृतिः
हुङ्कारगर्भे मत्स्यं च दृष्ट्वा तं स महेश्वरः । तेजसा स्तम्भयामास वाक्यमेतदुवाचह
कस्त्वंमत्स्योदरस्थश्च देवो यक्षोऽथमानुषः । कथंजीवस्यदेहान्तर्गतोममवद प्रभो

मत्स्य उवाच

अहंमत्स्योदरे क्षिप्तः समुद्रेक्षीरसम्भवे । मात्रातु पितृवाक्येन नायं ममकुलान्वितः
कुलक्षयभयात्तेन जातंस्वकुलनाशनम् । गण्डान्तयोगजनितो बालो न गृहकर्मकृत्
इति मात्रा दुःखितया निरस्तः शृणु वंशजः ।
झषेणाऽपि गृहीतोऽस्मि कालो मेऽत्र महानभूत् ॥ ४६॥
तव वाक्यामृतैरेभिर्ज्ञानयोगोमहानभूत् । तेन त्वं सकलो ज्ञातो मया मूर्त्तोथ मूर्त्तगः
अनुज्ञां मम देवेश! देहि निष्क्रमणाय च । यथाहं पितृपो ब्रह्मन् भवाम्याशु विवृद्धये

हर उवाच

विप्रोऽसि सुतरूपोऽसि पूज्योऽस्यपि स्वभावतः ।
बहिर्निष्क्रमवेगेन स्तम्भितोऽसि महाझषः ॥ ५२ ॥
ततोऽसौ शिरसा जात उत्क्लेशान्मत्स्ययोजितः

ततो हि विकृतं वक्त्रं क्षणाद्द वहिरुपागतः ॥ ५३ ॥
रूपवान् प्रतिमायुक्तो मत्स्यगन्धेन संयुतः ।
सोमकान्तिसमस्तत्र अभवद्दिव्यगन्धभाक् ॥ ५४ ॥
उमापि प्रणतं चामुं सुतं स्वोत्सङ्गभाजनम् । चकार तस्य नामापि हरः परमहर्षितः
यस्मान्मत्स्योदराज्जातो योगिनां प्रवरो ह्ययम् ।
तस्मात्त्वं मत्स्यना थेति लोके ख्यातो भविष्यसि ॥ ५६ ॥
अच्छेद्यः स्यान्नरतनुर्ज्ञानयोगस्यपारगः । निर्मत्सरोऽपिनिर्द्वन्द्वो निराशोब्रह्मसेवकः
जीवन्मुक्तश्च भविता भुवनानि चतुर्दश । इत्युक्तश्च महेशानं प्रणमंश्च पुनःपुनः ॥
महेश्वरेण सहितो मन्दराचलमाययौ ।

ब्रह्मोवाच

कृत्वा प्रदक्षिणं देवीं स्कन्दमालिङ्ग्य सोऽगमत् ॥ ५६ ॥
ततःसा पार्वतीहृष्टा प्राप्य ज्ञानमनुत्तमम् । एवंसा परमां सिद्धिं प्रणवस्यप्रभाजनम्
संप्राप्यजगतांमाताद्वादशाक्षरजामुमा । इमांमत्स्येन्द्रनाथस्य चोत्पत्तियःशृणोतिच
चातुर्मास्ये विशेषेण सोऽश्वमेधफलं लभेत् ॥ ६२ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे
ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये मत्स्येन्द्रनाथोत्पत्तिकथनं
नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

———

द्वात्रिंशोऽध्यायः

तारकासुरवधवर्णनम्

ब्रह्मोवाच

कार्त्तिकेयश्च पार्वत्याः प्राणेभ्यश्चातिवल्लभः ।
संक्रीडति समीपस्थो नानाचेष्टाभिरुद्यतः ॥ १ ॥
रक्तकान्तिर्महातेजाः षण्मुखोऽद्भुतविक्रमः ।
क्वचिद्गायति चात्यर्थं क्वचिन्नृत्यति स्वेच्छया ॥ २ ॥

मातरं पितरं दृष्ट्वा विनयावनतः क्वचित् । क्वचिच्च गङ्गापुलिने सिकतालेपनारुचिः
गणैः सहविचिन्वानोविविधान्वनभूरुहान् । एवंप्रक्रीडतस्तस्य दिवसाःपञ्चवैगताः
ततो देवा महेन्द्राद्यास्तारकत्रासविद्रुताः । स्तुवन्तः शङ्करंसर्वे तारकस्यजिघांसया
चक्रुः कुमारं सेनान्यं जाह्नव्याः स्वगणैः सुराः । सस्वनुर्देववाद्यानि पुष्पवर्षंपपातह
वह्निस्तुस्वां ददौ शक्तिं हिमवान् वाहनं ददौ । सर्वदेवसमुद्भूतगणकोटिसमावृतः
प्रणम्य मुनिसङ्घेभ्यः प्रययौ रिपुपत्तने । ताम्रवत्यां नगर्यां च शङ्खंदध्मौप्रतापवान्
ततस्तारकसैन्यस्य दैत्यदानवकोटयः । समाजग्मुस्तस्य पुराच्छङ्खनादभयातुराः

स्ववाहनसमारूढाः संयता बलदर्पिताः ।
देवाः सर्वेऽपि युयुधुः स्कन्दतेजोपबृंहिताः ॥ १० ॥

तदा दानवसैन्यानि निजघान च सर्वशः । विष्णुचक्रेण ते छिन्नाःपेतुरुर्व्यांसहस्रशः
ततो भग्नाश्च शतशो दानवानिहतास्तदा । नद्यःशोणितसम्भूताजाताबहुविधामुने
तद्भग्नं दानवबलं दृष्ट्वा स युयुधे रणे । बभञ्ज सद्योदेवेशोबाणजालैरनेकधा ॥ १३ ॥
शक्तिनायुध्य गाङ्गेयश्चिक्षेपकृष्णप्रेरितः । तारकं च सयन्तारंचक्रे तंभस्मसात्क्षणत्
शेषाः पातालमगमन् हतं दृष्ट्वाथ तारकम् । ततोदेवगणाःसर्वेशशंसुस्तस्यविक्रमम्
देवदुन्दुभयोनेदुः पुष्पवृष्टिस्तथाऽभवत् । ते लब्धविजयाः सर्वे महेश्वरपुरोगमाः

सिषिचुः सर्वदेवानां सेनापत्येषडाननम् । ततः स्कन्दंसमालिङ्ग्य पार्वतीहर्षगद्गदा
माङ्गल्यानि तदा चक्रेस्वसखीभिःसमावृता । एवं चतारकं हत्वा सप्तमेऽहनिबालकः
मन्दराचलमासाद्यपितरौसंप्रहर्षयन् । उवाचसकलंस्कन्दः परमानन्दनिर्भरः ॥ १६ ॥
काले दारक्रियां तस्यचिन्तयामासशङ्करः । सउवाचप्रसन्नात्मागाङ्गेयममितद्युतिम्

प्राप्तकालस्तव विभो पाणिग्रहणसम्मतः ।
कुरु दारान् समासाद्य धर्मस्ताभिस्ससम्मतः ॥ २१ ॥
क्रीडस्व विविधैर्भोगैर्विमानैः सह कामिकैः ।
तच्छ्रुत्वा भगवान् स्कन्दः पितरं वाक्यमब्रवीत् ॥ २२ ॥

अहमेव हि सर्वत्र दृश्यः सर्वगणेषु च । दृश्यादृश्यपदार्थेषु किंगृह्णामित्यजामिकिम्

याः स्त्रियः सकला विश्वे पार्वत्या ताः समा हि मे ।
नराः सर्वेऽपि देवेश! भवद्वृत्तान् विलोकये ॥ २४ ॥

त्वं गुरुर्मां च रक्षस्व पुनर्नरकमज्जनात् । येन ज्ञातमिदं ज्ञानंत्वत्प्रसादादखण्डितम्
पुनरेव महाघोरसंसाराब्धौ न मज्जये । दीपहस्तो यथा वस्तु दृष्ट्वातत्करणंत्यजेत्
तथाज्ञानमवाप्य योगीत्यजतिसंसृतिम् । ज्ञात्वासर्वगतंब्रह्मसर्वज्ञ! परमेश्वर ! ॥२७

निवर्त्तन्ते क्रियाः सर्वा यस्य तं योगिनं विदुः ।
विषये लुब्धचित्तानां वनेऽपि जायते रतिः ॥ २८ ॥

सर्वत्र समदृष्टीनां गेहे मुक्तिर्हि शाश्वती । ज्ञानमेव महेशान मनुष्याणां सुदुर्लभम्
लब्धं ज्ञानं कथमपि पण्डितोनैवपातयेत् । नाहमस्मि न मातामेनपिता न च बान्धवः
ज्ञानं प्राप्यपृथग्भावमापन्नो भुवनेष्वहम् । प्राप्यं भागमिदं दैवात् प्रभावात्तवनार्हसि
वक्तुमेवंविधं वाक्यं मुमुक्षोर्मे नसंशयः । यदाऽऽग्रहपरा देवी पुनःपुनरभाषत ॥ ३२
तदातौपितरौनत्वागतोऽसौक्रौञ्चपर्वतम् । तत्राऽऽश्रमे महापुण्ये चचार परमंतपः
जजाप परमं ब्रह्म द्वादशाक्षरबीजकम् । पूर्वं ध्यानेन सर्वाणिवशीकृत्येन्द्रियाणि च

मनोमासं प्रयुज्याऽथ ज्ञानयोगमवाप्तवान् ।
सिद्धयस्तस्य निर्विघ्ना अणिमाद्या यदा गताः ॥ ३५ ॥

तदा तासां गुहः क्रुद्धोवाक्यमेतदुवाच ह । ममापि दुष्टभावेन यदि यूयमुपागताः
तदास्मत्समशान्तानां नाभिभूतं करिष्यथ । एवंज्ञात्वामहेशोपियतोज्ञानमहोदयम्
मत्तोपिज्ञानयोगेनस्कन्दोप्यधिकभावभृत् । विस्मयाविष्टहृदयःपार्वतीमनुशिष्टवान्
पुत्रशोकपरां चोमां शुभैर्वाक्यामृतैर्हरः । चातुर्मास्यमाहात्म्यंसर्वपापप्रणाशनम्

महेश्वरो वा मधुकैटभारिर्द्वयाश्रितोध्यानमयोऽद्वितीयः ।
अभेदबुद्ध्या परमार्त्तिहन्ता रिपुः स एवाऽतिप्रियो भवेत्ततः ॥ ४० ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे
ब्रह्मनारदसम्वादे चातुर्मास्यमाहात्म्ये तारकासुरवधो नाम
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

---

† समाप्तमिदंचातुर्मास्यमाहात्म्यम् ॥

---

† इदं चातुर्मास्यमाहात्म्यं वेङ्कटेशमुद्रितपुस्तके बङ्गाक्षरमुद्रिते च नास्ति लक्ष्मणपुर (लखनऊ) मुद्रितपुस्तकादुद्धृतोऽयमिति ।

* श्रीगणेशायनमः *

स्कन्दपुराणस्थब्रह्मखण्डान्तर्गत ब्रह्मोत्तरखण्डम्

प्रथमोऽध्यायः

पञ्चाक्षरमन्त्रमाहात्म्यवर्णनम्

ज्योतिर्मात्रस्वरूपाय निर्मलज्ञानचक्षुषे । नमः शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्त्तये

ऋषय ऊचुः

आख्यातं भवता सूत विष्णोर्माहात्म्यमुत्तमम् । समस्तावहरं पुण्यंसमासेनश्रुतञ्चनः
इदानीं श्रोतुमिच्छामोमाहात्म्यंत्रिपुरद्विषः । तद्भक्तानाञ्च माहात्म्यमशेषाघहरम्परम्
तन्मन्त्राणाञ्च माहात्म्यं तथैव द्विजसत्तम ।। तत्कथायाश्चतद्भक्तेः प्रभावमनुवर्णनम्

सूत उवाच

एतावदेव मर्त्यानां परं श्रेयः सनातनम् । यदीश्वरकथायां वै जाता भक्तिरहैतुकी

अतस्तद्भक्तिलेशस्य माहात्म्यं वर्ण्यते मया ।
अपि कल्पायुषा नाऽलं वक्तुं विस्तरतः क्वचित् ॥ ६ ॥

सर्वेषामपि पुण्यानां सर्वेषां श्रेयसामपि । सर्वेषामपि यज्ञानां जपयज्ञः परः स्मृतः
तत्रादौ जपयज्ञस्य फलं स्वस्त्ययनंमहत् । शैवं षडक्षरं दिव्यं मन्त्रमाहुर्महर्षयः ॥

देवानां परमोदेवो यथा वै त्रिपुरान्तकः । मन्त्राणां परमो मन्त्रस्तथाशैवः षडक्षरः
एष पञ्चाक्षरो मन्त्रो जप्तृणां मुक्तिदायकः ।
संसेव्यते मुनिश्रेष्ठैरशेषैः सिद्धिकाङ्क्षिभिः ॥ १० ॥
अस्यैवाक्षरमाहात्म्यं नालम्वक्तुंचतुर्मुखः । श्रुतयो यत्र सिद्धान्तंगताःपरमनिर्वृताः
सर्वज्ञः परिपूर्णश्च सच्चिदानन्दलक्षणः । स शिवो यत्र रमते शैवे पञ्चाक्षरे शुभे ॥
एतेन मन्त्रराजेन सर्वोपनिषदात्मना । लेभिरे मुनयः सर्वे परमब्रह्म निरामयम् ॥१३
नमस्कारेण जीवत्वं शिवेऽत्र परमात्मनि । ऐक्यङ्गतमतोमन्त्रः परब्रह्ममयो ह्यसौ
भवपाशनिबद्धानांदेहिनांहितकाम्यया । आहोंनमः शिवायेतिमन्त्रमाद्यंशिवःस्वयम्
किं तस्य बहुभिर्मन्त्रैः किं तीर्थैः किं तपोऽध्वरैः ।
यस्योंनमः शिवायेति मन्त्रो हृदयगोचरः ॥ १६ ॥
तावद्भ्रमन्ति संसारे दारुणे दुःखसङ्कुले । यावन्नोच्चारयन्तीमं मन्त्रं देहभृतः सकृत्
मन्त्राधिराजराजोऽयं सर्ववेदान्तशेखरः । सर्वज्ञाननिधानश्च सोऽयञ्चैव षडक्षरः ॥
कैवल्यमार्गदीपोऽयमविद्या सिन्धुवाडवः । महापातकदावाग्निःसोऽयंमन्त्रःषडक्षरः
तस्मात्सर्वप्रदो मन्त्रः सोऽयं पञ्चाक्षरः स्मृतः ।
स्त्रीभिः शूद्रैश्च सङ्कीर्णैर्धार्यते मुक्तिकाङ्क्षिभिः ॥ २० ॥
नास्य दीक्षान होमश्च न संस्कारो न तर्पणम् । नकालोनोपदेशश्च सदाशुचिरयंमनुः
महापातकविच्छित्त्यै शिवइत्यक्षरद्वयम् । अलं नमस्क्रियायुक्तो मुक्तये परिकल्पते
उपदिष्टः सद्गुरुणाजप्तःक्षेत्रेच पावने । सद्योयथेप्सितांसिद्धिं ददातीतिकिमद्भुतम्
अतःसद्गुरुमाश्रित्यग्राह्योऽयंमन्त्रनायकः । पुण्यक्षेत्रेषु जप्तव्यःसद्यःसिद्धिंप्रयच्छति
गुरवो निर्मलाः शान्ता साधवो मितभाषिणः ।
कामक्रोधविनिर्मुक्ताः सदाचारा जितेन्द्रियाः ॥ २५ ॥
एतैः कारुण्यतो दत्तो मन्त्रः क्षिप्रं प्रसिद्ध्यति ।
क्षेत्राणि जपयोग्यानि समासात्कथयाम्यहम् ॥ २६ ॥
प्रयागं पुष्करं रम्यं केदारं सेतुबन्धनम् । गोकर्णं नैमिषारण्यंसद्यःसिद्धिकरंनृणाम्

अत्रानुवर्ण्यते सद्भिरितिहासः पुरातनः । असकृद्वा सकृद्वापि शृण्वतां मङ्गलप्रदः ॥
मथुरायां यदुश्रेष्ठो दाशार्ह इति विश्रुतः । बभूव राजा मतिमान्महोत्साहोमहाबलः
शास्त्रज्ञो नयवाञ्छूरोधैर्यवानमितद्युतिः । अप्रधृष्यःसुगम्भीरःसङ्ग्रामेष्वनिवर्त्तितः
महारथो महेष्वासोनानाशास्त्रार्थकोविदः । वदान्यो रूपसम्पन्नोयुवा लक्षणसंयुतः
स काशिराजतनयामुपयेमे वराननाम् । कान्तां कलावतींनाम रूपशीलगुणान्विताम्
कृतोद्वाहः स राजेन्द्रः सम्प्राप्य निजमन्दिरम् ।
रात्रौ तां शयनारूढां सङ्गमाय समाह्वयत् ॥ ३३ ॥
साऽस्वभर्त्रासमाहूताबहुशःप्रार्थितासती । नबबन्ध मनस्तस्मिन्नचागच्छत्तदन्तिकम्
सङ्गमाय यदाहूता नागता निजवल्लभा । बलादाहर्तुकामस्तामुदतिष्ठन्महीपतिः ॥३५

राज्युवाच

मा मां स्पृश महाराज! कारणज्ञां व्रतेऽस्थिताम् ।
धर्माधर्मौ विजानासि मा कार्षीः साहसं मयिः ॥ ३६ ॥
क्वचित्प्रियेण भुङ्क्तं यद्रोचते तु मनाषिणाम् ।
दम्पत्योः प्रीतियोगेन सङ्गमः प्रीतिवर्द्धनः ॥ ३७ ॥
प्रियं यदा मे जायेत तदा सङ्गस्तु ते मयि ।
का प्रीतिः किं सुखं पुंसां बलाद्भोगेन योषिताम् ॥ ३८ ॥
अप्रीतां रोगिणीं नारीमन्तर्वत्नीं धृतव्रताम् ।
रजस्वलामकामाञ्च न कामेत बलात्पुमान् ॥ ३९ ॥
प्रीणनं लालनं पोषं रञ्जनं मार्दवं दयाम् । कृत्वा वधूमुपगमेद्युवतीं प्रेमवान्पतिः ॥
युवतौ कुसुमे चैव विधेयं सुखमिच्छता ॥ ४० ॥
इत्युक्तोऽपितयासाध्व्यासराजास्मरविह्वलः । बलादाकृष्यतां हस्तेपरिरेभेरिरंसया
तांस्पृष्टमात्रांसहसातप्तायःपिण्डसन्निभाम् । निर्दहन्तीमिवात्मानंतत्याजभयविह्वलः

राजोवाच

अहो सुमहदाश्चर्यमिदं दृष्टं तव प्रिये । कथमग्निसमं जातं वपुः पल्लवकोमलम् ॥

इत्थं सुविस्मितो राजा भीतः सा राजवल्लभा ।
प्रत्युवाच विहस्यैनं विनयेन शुचिस्मिता ॥ ४४ ॥

राज्ञ्युवाच

राजन्ममपुरा बाल्ये दुर्वासामुनिपुङ्गवः । शैवीं पञ्चाक्षरीं विद्यां कारुण्येनोपदिष्टवान्
तेनमन्त्रानुभावेनममाङ्गंकलुषोज्झितम् । स्प्रष्टुं न शक्यतेपुम्भिः सपापैर्दववर्जितैः
त्वया राजन्प्रकृतिनाकुलटागणिकादयः । मदिरास्वादनिरता निषेव्यन्तेसदास्त्रियः
न स्नानं क्रियते नित्यं न मन्त्रो जप्यते शुचिः ।
नाराध्यते त्वयेशानः कथं मांस्प्रष्टुमर्हसि ॥ ४८ ॥

राजोवाच

तां समाख्याहि सुश्रोणि! शैवीं पञ्चाक्षरीं शुभाम् ।
विद्याविध्वस्तपापोऽहं त्वयीच्छामि रतिं प्रिये ॥ ४९ ॥

राज्ञ्युवाच

नाहं तवोपदेशं वै कुर्यां मम गुरुर्भवान् । उपातिष्ठ गुरुं राजन्गर्गं मन्त्रविदांवरम्

सूत उवाच

इतिसम्भाषमाणौतौदम्पतीगर्गसन्निधिम् । प्राप्यतच्चरणौमूर्ध्नाववन्दातेकृताञ्जली
अथ राजागुरुं प्रीतमभिपूज्य पुनः पुनः । समाचष्ट विनीतात्मा रहस्यात्ममनोरथम्

राजोवाच

कृतार्थं मां कुरु गुरो संप्राप्तं करुणार्द्रधीः । शैवीं पञ्चाक्षरीं विद्यामुपदेष्टुं त्वमर्हसि
अनाज्ञातं यदाज्ञातं यत्कृतं राजकर्मणा । तत्पापं येन शुद्ध्येत तन्मन्त्रं देहि मे गुरो
एवमभ्यर्थितो राज्ञागर्गो ब्राह्मणपुङ्गवः । तौ निनायमहापुण्यंकालिन्द्यास्तटमुत्तमम्
तत्र पुण्यतरोर्मूले निषण्णोऽथ गुरुः स्वयम् ।
पुण्यतीर्थजले स्नातं राजानं समुपोषितम् ॥ ५६ ॥
प्राङ्मुखं चोपवेश्याथ नत्वा शिवपदाम्बुजम् ।
तन्मस्तके करं न्यस्य ददौ मन्त्रं शिवात्मकम् ॥ ५७ ॥

तन्मन्त्रधारणादेव तद्गुरोर्हस्तसङ्गमात् । निर्ययुस्तस्य वपुषो वायसाःशतकोटयः
ते दग्धपक्षाःक्रोशंतोनिपतन्तोमहीतले । भस्मीभूतास्ततःसर्वेदृश्यन्तेस्मसहस्रशः
दृष्ट्वा तद्वायसकुलं दह्यमानंसुविस्मितौ । राजा च राजमहिषी तं गुरुं पर्यपृच्छताम्
भगवन्निदमाश्चर्यं कथं जातं शरीरतः । वायसानां कुलं दृष्टं किमेतत्साधु भण्यताम्

श्रीगुरुरुवाच

राजन्भवसहस्रेषु भवता परिधावता । सञ्चितानि दुरन्तानि सन्ति पापान्यनेकशः
तेषु जन्मसहस्रेषु यानि पुण्यानिसन्तिते । तेषामाधिक्यतःक्वापिजायतेपुण्ययोनिषु
तथा पापीयसीं योनिं क्वचित्पापेन गच्छति ।
साम्ये पुण्यान्ययोश्चैव मानुषीं योनिमाप्तवान् ॥ ६४ ॥
शैवी पञ्चाक्षरी विद्यायदा ते हृदयं गता । अघानांकोटयस्त्वत्तःकाकरूपेणनिर्गताः
कोटयो ब्रह्महत्यानामगम्यागम्यकोटयः । स्वर्णस्तेयसुरापानभ्रूणहत्यादिकोटयः
भवकोटिसहस्रेषु येऽन्ये पातकराशयः ॥ ६६ ॥
क्षणाद्भस्मीभवन्त्येव शैवेपञ्चाक्षरे धृते । आसंस्तवाद्य राजेन्द्र! दग्धाःपातककोटयः
अनया सह पूतात्माविहरस्वयथासुखम् । इत्याभाष्यमुनिश्रेष्ठस्तंमन्त्रमुपदिश्य च ॥
ताभ्यां विस्मितचित्ताभ्यां सहितः स्वगृहं ययौ ।
गुरुवर्यमनुज्ञाप्य मुदितौ तौ च दम्पती ॥ ६९ ॥
ततः स्वभवनं प्राप्यरेजतुःस्ममहाद्युती । राजादृढं समाश्लिष्यपत्नींचन्दनशीतलाम्
सन्तोषं परमं लेभे निःस्वः प्राप्य यथा धनम् ॥ ७१ ॥
अशेषवेदोपनिषत्पुराणशास्त्रावतंसोऽयमघान्तकारी ।
पञ्चाक्षरस्यैव महाप्रभावो मया समासात्कथितो वरिष्ठः ॥ ७२ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे
पञ्चाक्षरमन्त्रमाहात्म्यवर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

गोकर्णक्षेत्रमहिमानुवर्णनम्

सूत उवाच

अथान्यदपि वक्ष्यामिमाहात्म्यंत्रिपुरद्विषः । श्रुतमात्रेणयेनाशुच्छिद्यन्तेसर्वसंशयाः
अतःपरतरंनास्ति किञ्चित्पापविशोधनम् । सर्वानन्दकरंश्रीमत्सर्वकामार्थसाधकम्
दीर्घायुर्विजयारोग्यभुक्तिमुक्तिफलप्रदम् । यदनन्येनभावेन महेशाराधनं परम् ॥ २॥
आर्द्राणामपि शुष्काणामल्पानां महतामपि । एतदेव विनिर्दिष्टंप्रायश्चित्तमथोत्तमम्
सर्वकालेऽप्यभेद्यानामघानां क्षयकारणम् । महामुनिविनिर्दिष्टैः प्रायश्चित्तैरथोत्तमैः
इदमेव परं श्रेयः सर्वशास्त्रविनिश्चितम् । यद्भक्त्यापरमेशस्यपूजनंपरमोदयम् ॥ ५ ॥
जानताऽजानता वापि येनकेनापि हेतुना । यत्किञ्चिदपि देवाय कृतं कर्मविमुक्तिदम्
माघे कृष्णचतुर्दश्यामुपवासोऽतिदुर्लभः । तत्रापि दुर्लभं मन्ये रात्रौ जागरणंनृणाम्
अतीव दुर्लभं मन्ये शिवलिङ्गस्य दर्शनम् । सुदुर्लभतरं मन्ये पूजनं परमेशितुः ॥ ८॥
भवकोटिशतोत्पन्नपुण्यराशिविपाकतः । लभ्यते वा पुनस्तत्र बिल्वपत्रार्चनं विभोः
वर्षाणामयुतं येनस्नातंगङ्गासरिज्जले । सकृद्बिल्वार्चनेनैवतत्फलंलभतेनरः ॥ १० ॥
यानियानितु पुण्यानिलीनानीहयुगेयुगे । माघेऽसितचतुर्दश्यांतानितिष्ठन्तिकृत्स्नशः
एतामेव प्रशंसन्ति लोके ब्रह्मादयः सुराः । मुनयश्च वशिष्ठाद्या माघेऽसितचतुर्दशीम्
अत्रोपवासःकेनापिकृतःक्रतुशताधिकः । रात्रौजागरणंपुण्यंकल्पकोटितपोऽधिकम्
एकेनबिल्वपत्रेणशिवलिङ्गार्चनंकृतम् । त्रैलोक्येतस्यपुण्यस्यकोवासःदृश्यमिच्छति
अत्रानुवर्ण्यते गाथा पुण्या परमशोभना । गोपनीयापि कारुण्याद्गौतमेन प्रकाशिता
इक्ष्वाकुवंशजःश्रीमान्राजापरमधार्मिकः । आसीन्मित्रसहोनामश्रेष्ठः सर्वधनुर्भृताम्

स राजा सकलास्त्रज्ञः शास्त्रज्ञः श्रुतिपारगः ।
वीरोऽत्यन्तबलोत्साहो नित्योद्योगी दयानिधिः ॥ १७ ॥

पुण्यानामिव सङ्घातस्तेजसामिव पञ्जरः । आश्चर्याणामिव क्षेत्रंयस्य मूर्त्तिर्विराजते
हृदयं दययाक्रान्तं श्रियाक्रान्तं च तद्वपुः । चरणौ यस्यसामन्तचूडामणिमरीचिभिः
एकदा मृगयाकेलिलोलुपः स महीपतिः । विवेश गह्वरं घोरंबलेनमहतावृतः ॥ २० ॥

तत्र विव्याध विशिखैः शार्दूलान्गवयान्मृगान् ।
रुरून्वराहान्महिषान्मृगेन्द्रानपि भूरिशः ॥ २१ ॥

स रथी मृगयासक्तो गहनं दंशितश्चरन् । कमपि ज्वलनाकरं निजघान निशाचरम्
तस्यानुजः शुचाविष्टो दृष्ट्वा दूरे तिरोहितः । भ्रातरं निहतं दृष्ट्वाचिन्तयामासचेतसा
नन्वेष राजा दुर्द्धर्षो देवानां रक्षसामपि । छद्मनैव प्रजेतव्यो मम शत्रुर्न चान्यथा
इति व्यवसितः पापो राक्षसोमनुजाकृतिः । आससाद नृपश्रेष्ठमुत्पात इवमूर्त्तिमान्
तं विनम्राकृतिं दृष्ट्वा भृत्यतां कर्तुमागतम् । चक्रे महानसाध्यक्षमज्ञानात्समहीपतिः

अथ तस्मिन्वने राजा किञ्चित्कालं विहृत्य सः ।
निवृत्तो मृगयां हित्वा स्वपुरीं पुनराययौ ॥ २७ ॥

तस्य राजेन्द्रमुख्यस्यमदयन्तीतिनामतः । दमयन्ती नलस्येवविदिता वल्लभा सती

एतस्मिन्समये राजा निमन्त्र्य मुनिपुङ्गवम् ।
वशिष्ठं गृहमानिन्ये सम्प्राप्ते पितृवासरे ॥ २९ ॥

रक्षसा सूदरूपेण सम्मिश्रितनरामिषम् । शाकामिषं पुरः क्षिप्तं दृष्ट्वा गुरुरथाब्रवीत्
धिग्धिङ्नरामिषंराजंस्त्वयैतच्छद्मकारिणा । खलेनोपहृतंमेऽद्यअतोरक्षोभविष्यसि
रक्षः कृतमविज्ञाय शप्त्वैवं स गुरुस्ततः । पुनर्विमृश्य तं शापं चकारद्वादशाब्दिकम्
राजापि कोपितः प्राह यदिदं मे न चेष्टितम् । न ज्ञातंचवृथाशप्तोगुरुश्चैवशपाम्यहम्
इत्यपोञ्जलिनादायगुरुं शप्तुं समुद्यतः । पतित्वा पादयोस्तस्यमदयन्ती न्यवारयत्
ततो निवृत्तः शापाच्चतस्यावचनगौरवात् । तत्याजपादयोरम्भःपादौकल्मषतां गतौ

कल्माषांघ्रिरिति ख्यातस्ततः प्रभृति पार्थिवः ।
बभूव गुरुशापेन राक्षसो वनगोचरः ॥ ३६ ॥

स बिभ्रद्राक्षसंरूपं घोरंकालान्तकोपमम् । चखादविविधाञ्जन्तून्मानुषादीन्वनेचरः

स कदाचिद्वने क्वापि रममाणौ किशोरकौ । अपश्यदन्तकाकारोनवोढौमुनिदम्पती
राक्षसो मानुषाहारःकिशोरं मुनिनन्दनम् । जग्धुंजग्राहशापार्तोव्याघ्रोमृगशिशुं यथा
रक्षोगृहीतं भर्त्तारं दृष्ट्वा भीताथ तत्प्रिया । उवाच करुणं बालाक्रंदन्ती भृशवेपिता
भोभो मामा कृथाः पापं सूर्यवंशयशोधर ! । मदयन्तीपतिस्त्वंहिराजेन्द्रोनतु राक्षसः
नखाद मम भर्त्तारं प्राणात्प्रियतमं प्रभो । आर्त्तानां शरणार्त्तानांत्वमेवहियतोगतिः
पापतामिव सञ्जातैः किं मे दुष्टैर्जडासुभिः । देहेनचास्थिभारेण विना भर्त्रामहात्मना
मलीमसेनपापेनपाञ्चभौतेन किंसुखम् । बालोयंवेदविच्छान्तस्तपस्वीबहुशास्त्रवित्
अतोऽस्य प्राणदानेन जगद्रक्षात्वयाकृता । कृपांकुरुमहाराजबालायांब्राह्मणस्त्रियाम्
अनाथकृपणार्त्तेषु सघृणाः खलुसाधवः । इत्थमभ्यर्थितःसोऽपिपुरुषादः स निर्घृणः
चखाद शिर उत्कृत्यविप्रपुत्रंदुराशयः । अथसाध्वीकृशादीनाविलप्य भृशदुःखिता

आहृत्य भर्तुरस्थीनि चितां चक्रे तथोल्बणाम् ।
भर्तारमनुगच्छन्ती सम्विशन्ती हुताशनम् ॥ ४८ ॥

राजानंराक्षसाकारंशापास्त्रेण जघान तम् । रेरे पार्थिवपापात्मं स्त्वयामेभक्षितःपतिः
अतः पतिव्रतायास्त्वंशापं भुङ्क्ष्वयथोल्बणम् । अद्यप्रभृतिनारीषुयदात्वमपिसङ्गतः

तदा मृतिस्तवेत्युक्त्वा विवेश ज्वलनं सती ॥ ५० ॥
सोऽपि राजा गुरोः शापमुपभुज्य कृतावधिम् ।
पुनः स्वरूपमादाय स्वगृहं मुदितो ययौ ॥ ५१ ॥
ज्ञात्वा विप्रसतीशापं तत्पत्नी रतिलालसम् ।
पतिं निवारयामास वैधव्यादतिबिभ्यती ॥ ५२ ॥
अनपत्यः सनिर्विण्णो राज्यभोगेषु पार्थिवः ।
विसृज्य सकलां लक्ष्मीं ययौ भूयोऽपि काननम् ॥ ५३ ॥

सूर्यवंशप्रतिष्ठित्यै वशिष्ठो मुनिसत्तमः । तस्यामुत्पादयामासमदयन्त्यांसुतोत्तमम्

विसृष्टराज्यो राजाऽपि विचरन्सकलां महीम् ।
आयान्तीं पृष्ठतोऽपश्यत्पिशाचीं घोररूपिणीम् ॥ ५५ ॥

सा हि मूर्तिमती घोरा ब्रह्महत्या दुरत्यया । यदासौ शापविभ्रष्टोमुनिपुत्रमभक्षयत्
तेनात्मकर्मणा यान्तीं ब्रह्महत्यां स पृष्ठतः । बुबुधे मुनिवर्याणामुपदेशेन भूपतिः

तस्या निर्वेशमन्विच्छन्राजा निर्विण्णमानसः ।
नानाक्षेत्राणि तीर्थानि चचार बहुवत्सरम् ॥ ५८ ॥

यदा सर्वेषु तीर्थेषु स्नात्वाऽपि चमुहुर्मुहुः । न निवृत्ताब्रह्महत्यामिथिलामाययौतदा

बाह्योद्यानगतस्तस्याश्चिन्तया परयाऽर्दितः ॥ ५९ ॥

ददर्श मुनिमायान्तं गौतमं विमलाशयम् । हुताशनमिवाशेषतपस्विजनसेवितम्
विवस्वन्तमिवात्यन्तं घनदोषतमोनुदम् । शशाङ्कमिव निःशङ्कमवदातगुणोदयम्
महेश्वरमिव श्रीमद्द्विजराजकलाधरम् । शान्तं शिष्यगणोपेतं तपसामेकभाजनम्

उपसृत्य स राजेन्द्रः प्रणनाम मुहुर्मुहुः ।
गौतमोऽपि मुनिश्रेष्ठो राजानंरविवंशजम् ॥ ६४ ॥
अभिनन्द्य मुनिः प्रीत्या सस्मितं समभाषत ।

गौतम उवाच

कच्चित्ते कुशलं राजन्कच्चित्ते पदमव्ययम् ॥ ६५ ॥

कुशलिन्यःप्रजाःकच्चिदवरोधजनोपिवा । किमर्थमिहसम्प्राप्तोविसृज्यसकलांश्रियम्

किं च ध्यायसि भो राजन्दीर्घमुष्णं च निःश्वसन् ॥ ६७ ॥

राजोवाच

सर्वे कुशलिनो ब्रह्मन्वयं त्वदनुकम्पया । राज्ञामुत्तमवंश्यानां ब्रह्मायत्ता हि सम्पदः

किं नु मां बाधते त्वेषा पिशाची घोररूपिणी ॥ ६८ ॥

अलक्षिता मदपरैर्भर्त्सयन्तीपदेपदे । यन्मया शापदग्धेनकृतमंहोदुरत्ययम् ।

न शान्तिर्जायते तस्य प्रायश्चित्तसहस्रकैः ॥ ६९ ॥
इष्टाश्च विविधा यज्ञाः कोशसर्वस्वदक्षिणाः ।
सरित्सरांसि स्नातानि यानि पुण्यानि भूतले ।
निषेवितानि सर्वाणि क्षेत्राणि भ्रमता मया ॥ ७० ॥

जप्तान्यखिलमन्त्राणि ध्याताः सकलदेवताः ।
महाव्रतानि चीर्णानि पर्णमूलफलाशिना ॥ ७१ ॥
तानि सर्वाणि कुर्वन्ति स्वस्थं मां न कदाचन ।
अद्य मे जन्मसाफल्यं सम्प्राप्तमिव लक्ष्यते ॥ ७२ ॥

यतस्त्वद्दर्शनादेव ममात्मानन्दभागभूत् । अन्विच्छँल्लभते क्वापि वर्षपूगैर्मनोरथम्

इत्येवञ्जनवादोऽपि सम्प्राप्तो मयि सत्यताम् ।
आजन्मसञ्चितानां तु पुण्यानामुदयोदये ॥ ७४ ॥

यद्भवान्भवभीतानां त्राता नयनगोचरः । कस्माद्देशादिहायातो भवान्भवभयापहः दूरभ्रमणविश्रान्तं शङ्के त्वामिहचागतम् । दृष्ट्वाश्चर्यमिवात्यर्थं मुदितोसिमुखश्रिया आनन्दयसि मे चेतः प्रेम्णा सम्भाषणादिव । अद्य मे तवपादाब्जशरणस्य कृतैनसः

शान्तिं कुरु महाभाग! येनाहं सुखमाप्नुयाम् ॥ ७७ ॥

इति तेनसमादिष्टोगौतमःकरुणानिधिः । समादिदेशघोराणामघानांसाधुनिष्कृतिम्

गौतम उवाच

साधु राजेन्द्र! धन्योऽसि महाघेभ्यो भयं त्यज ॥ ७९ ॥

शिवे त्रातरिभक्तानां क्व भयंशरणैषिणाम् । शृणुराजन्महाभागक्षेत्रमन्यत्प्रतिष्ठितम् महापातकसंहारि गोकर्णाख्यं मनोरमम् । यत्र स्थितिर्न पापानांमहद्भ्योमहतामपि स्मृतो ह्यशेषपापघ्नो यत्र सन्निहितः शिवः । यथाकैलासशिखरेयथा मन्दारमूर्द्धनि

निवासो निश्चितः शम्भोस्तथा गोकर्णमण्डले ।
नाऽग्निना न शशाङ्केन न ताराग्रहनायकैः ॥ ८३ ॥

तमो निस्तीर्यते सम्यग्यथा सवितृदर्शनात् । तथैव नेतरैस्तीर्थैर्न च क्षेत्रैर्मनोरमैः सद्यः पापविशुद्धिः स्याद्यथा गोकर्णदर्शनात् । अपिपापशतंकृत्वाब्रह्महत्यादिमानवः सकृत्प्रविश्यगोकर्णंनबिभेतिह्यघात्कचित् । तत्रसर्वेमहात्मानस्तपसाशान्तिमागताः

इन्द्रोपेन्द्रविरिञ्चाद्यैःसेव्यते सिद्धिकाङ्क्षिभिः ।
तत्रैकेन दिनेनापि यत्कृतं व्रतमुत्तमम् ॥ ८७ ॥

तदन्यत्राब्दलक्षेण कृतं भवति तत्समम् । यत्रेन्द्रब्रह्मविष्ण्वादिदेवानांहितकाम्यया महाबलाभिधानेन देवः सन्निहितः स्वयम् । घोरेणतपसा लब्धंरावणाख्येनरक्षसा तल्लिङ्गं स्थापयामासगोकर्णे गणनायकः । इन्द्रो ब्रह्मामुकुन्दश्चविश्वेदेवामरुद्गणाः आदित्या वसवो दस्रौ शशाङ्कश्च दिवाकरः । एते विमानगतयोदेवास्ते सह पार्षदैः पूर्वद्वारं निषेवन्ते देवदेवस्य शूलिनः । योऽन्योमृत्युःस्वयंसाक्षाच्चित्रगुप्तश्चपावकः पितृभिः सह रुद्रैश्चदक्षिणद्वारमाश्रितः । वरुणः सरितांनाथोगङ्गादिसरितां गणैः आसेवते महादेवं पश्चिमद्वारमाश्रितः । तथा वायुः कुबेरश्च देवेशी भद्रकर्णिका मातृभिश्चण्डिकाद्याभिरुत्तरद्वारमाश्रिता । विश्वावसुश्चित्ररथश्चित्रसेनो महाबलः सह गन्धर्ववर्गैश्च पूजयन्ति महाबलम् । रम्भाघृताचीमेना च पूर्वचित्तिस्तिलोत्तमा

नृत्यन्ति पुरतः शम्भोरुर्वश्याद्याः सुरस्त्रियः ।
वशिष्ठः कश्यपः कण्वो विश्वामित्रो महातपाः ॥ ९८ ॥

जैमिनिश्च भरद्वाजो जाबालिः क्रतुरङ्गिराः । एते वयं च राजेन्द्रसर्वेब्रह्मर्षयोऽमलाः देवं महाबलं भक्त्या समन्तात्पर्युपास्महे । मरीचिनासहात्रिश्चदक्षाद्याश्चमुनीश्वराः सनकाद्या महात्मान उपविष्टा उपासते । तथैव मुनयः साध्या अजिनाम्बरधारिणः

दण्डिनो व्रतमुण्डाश्च स्नातका ब्रह्मचारिणः ।
त्वगस्थिमात्रावयवास्तपसा दग्धकिल्बिषाः ॥ १०२ ॥

सेवन्ते परया भक्त्यादेवदेवम्पिनाकिनम् । तथादेवाःसगन्धर्वाःपितरःसिद्धचारणाः

विद्याधराः किम्पुरुषाः किन्नरा गुह्यकाः खगाः ।
नागाः पिशाचा वेताला दैतेयाश्च महाबलाः ॥ १०४ ॥

नानाविभवसम्पन्ना नानाभूषणवाहनाः । विमानैः सूर्यसङ्काशैरग्निवर्णैःशशिप्रभैः ॥

विद्युत्पुञ्जनिभैरन्यैः समन्तात्परिवारितम् ।
प्रस्तुवन्ति प्रगायन्ति पठन्ति प्रणमन्ति च ॥ १०६ ॥
प्रनृत्यन्ति प्रहृष्यन्ति गोकर्णे पृथिवीपते !।
लभन्तेऽभीप्सितान्कामान् रमन्ते च यथासुखम् ॥ १०७ ॥

गोकर्णसदृशं क्षेत्रं नास्ति ब्रह्माण्डगोलके। तत्रघोरं तपस्तप्तमगस्त्येन महात्मना तथा सनत्कुमारेण प्रियव्रतसुतैरपि । अग्निनादेववर्येण कन्दर्पेण च पार्थिव !॥ तथा देव्या भद्रकाल्या शिशुमारेणधीमता। दुर्मुखेन फणीन्द्रेण मणिनागाह्वयेन च इलावर्तादिभिर्नागैर्गरुडेन बलीयसा । रक्षसा रावणेनापि कुम्भकर्णाह्वयेन तु ॥ विभीषणेन पुण्येन तपस्तप्तं महात्मना । एते चान्येच गीर्वाणाः सिद्धदानवमानवाः

गोकर्णे देवदेवेशं शिवमाराध्य भक्तितः ।

स्वनामाङ्कानि लिङ्गानि स्थापयित्वा सहस्रशः ॥ ११३ ॥

लेभिरे परमां सिद्धिंतथातीर्थानि चक्रिरे। अत्रस्थानानिसर्वेषांदेवानांसन्तिपार्थिव विष्णोश्च देवदेवस्य ब्रह्मणः परमेष्ठिनः। कार्त्तिकेयस्य वीरस्य गजवक्त्रस्यचानघ धर्मस्यक्षेत्रपालस्यदुर्गायाश्चमहामते । गोकर्णेशिवलिङ्गानिविद्यन्तेकोटिकोटिशः असङ्ख्यातानि तीर्थानि तिष्ठन्ति च पदेपदे । बहुनात्रकिमुक्तेनगोकर्णस्थानिपार्थिव

सर्वाण्यश्मानि लिङ्गानि तीर्थान्यम्भांसि सर्वशः ।

गोकर्णे शिवलिङ्गानां तीर्थानामपि भूरिशः ॥ ११८ ॥

गीयते महिमा राजन्पुराणेषुमहर्षिभिः। गोकर्णेकोटितीर्थेच तीर्थानांमुख्यतांगतम् सर्वेषां शिवलिङ्गानां सार्वभौमोमहाबलः। कृतेमहाबलः श्वेतस्त्रेतायामतिलोहितः द्वापरे पीतवर्णश्च कलौश्यामो भविष्यति। आक्रान्तं सप्तपातालं कुर्वन्नपि महाबलः प्राप्ते कलियुगे घोरे मृदुतामुपयास्यति। पश्चिमाम्बुधितीरस्थं गोकर्णक्षेत्रमुत्तमम् ब्रह्महत्यादिपापानि दहतीति किमद्भुतम्। ये चात्र ब्रह्महन्तारो ये च भूतद्रुहः शठाः ये सर्वगुणहीनाश्च परदाररताश्च ये। ये दुर्वृत्ता दुराचारा दुःशीलाः कृपणाश्च ये

लुब्धाः क्रूराः खला मूढाः स्तेनाश्चैवातिकामिनः ।

ते सर्वे प्राप्य गोकर्णं स्नात्वा तीर्थजलेषु च ॥ १२५ ॥

देवं महाबलं दृष्ट्वा प्रयाताः शाङ्करं पदम्। तत्र पुण्यासु तिथिषु पुण्यर्क्षे पुण्यवासरे

येऽर्चयन्ति महेशानं ते रुद्राःस्युर्न संशयः ।

यदा कदाचिद्गोकर्णं यो वा को वाऽपि मानवः ॥ १२७ ॥

प्रविश्य पूजयेदीशं स गच्छेद्ब्रह्मणः पदम्। रवान्दुसौम्यवारेषुयदादर्शोभविष्यति तदा जलनिधौ स्नानं दानञ्च पितृतर्पणम्। शिवपूजा जपो होमोव्रतचर्याद्विजार्चनम् यत्किञ्चिद्वाकृतं कर्म तदनन्तफलप्रदम्। व्यतीपातादियोगेषु रविसंक्रमणेषु च ॥ महाप्रदोषवेलासुशिवपूजाविमुक्तिदा। अथैकां ते प्रवक्ष्यामितिथिपार्थिवमुक्तिदाम्

यस्यां किल महाव्याधो लेभे शम्भोः परं पदम् ।

माघमासे महापुण्या या सा कृष्णचतुर्दशी ॥ १३२ ॥

शिवलिङ्गं बिल्वपत्रं दुर्लभं हि चतुष्टयम्। अहोबलवतीमाया यया शैवीमहातिथिः नोपोष्यते जनै मूर्ढैर्महामूकैरिव त्रयी। उपवासो जागरणं सन्निधिः परमेशितुः गोकर्णं शिवलोकस्य नृणां सोपानपद्धति। शृणु राजन्नहमपि गोकर्णादधुनागतः

उपास्यैनां शिवतिथिं विलोक्य च महोत्सवम् ।

अस्यां शिवतिथौ सर्वे महोत्सवदिदृक्षवः ॥ १३६ ॥

आगताः सर्वदेशेभ्यश्चातुवर्ण्यामहाजनाः । स्त्रियो वृद्धाश्चबालाश्चचतुराश्रमवासिनः आगत्य दृष्ट्वा देवेशं लेभिरे कृतकृत्यताम्। अथाहमप्यमी शिष्या ऋषयश्चतथाऽपरे राजर्षयश्च राजेन्द्र! सनकाद्याः सुरर्षयः। स्नात्वा सर्वेषु तीर्थेषु समुपास्य महाबलम् लब्ध्वा च जन्मसाफल्यं प्रयाता सर्वतोदिशम्। अमुनाऽद्यनरेन्द्रेणजनकेनयियक्षुणा

निमन्त्रितोऽहं सम्प्राप्तो गोकर्णाच्छिवमन्दिरात् ।

प्रत्यागमं किमप्यङ्ग दृष्ट्वाऽऽश्चर्यमहं पथि ।

महानन्देन मनसा कृतार्थोऽस्मि महीपते !॥ १४१ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे गोकर्णक्षेत्रमहिमानुवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

शिवचतुर्दशीगोकर्णक्षेत्रमाहात्म्यवर्णनम्

राजोवाच

किं दृष्टं भवताब्रह्मन्नाश्चर्यंपथि कुत्र वा । तन्ममाख्याहियेनाहं कृतकृत्यत्वमाप्नुयात्

गौतम उवाच

गोकर्णादहमागच्छन्क्वापि देशे विशाम्पते । जातेमध्याह्नसमये लब्धवान्विमलं सरः

तत्रोपस्पृश्यसलिलंविनीयचपथिश्रमम् । सुस्निग्धशीतलच्छायंन्यग्रोधंसमुपाश्रयम्

अथाऽविदूरे चाण्डालीं वृद्धामन्धां कृशाकृतिम् ।

शुष्यन्मुखीं निराहारां बहुरोगनिपीडिताम् ॥ ४ ॥

कुष्ठव्रणपरीताङ्गीमुद्यत्कृमिकुलाकुलाम् । पूयशोणितसंसक्तजरत्पटलसत्कटीम् ॥

महायक्ष्मगलस्थेन कण्ठसंरोधविह्वलाम् । विनष्टदन्तामव्यक्तां विलुठन्तीं मुहुर्मुहुः

चण्डार्ककिरणस्पृष्टखरोष्णरजसाप्लुताम् ।

विण्मूत्रपूयदिग्धाङ्गीमसृग्गन्धदुरासदाम् ॥ ७ ॥

कफरोगबहुश्वासश्लथन्नाडीबहुव्यथाम् । विध्वस्तकेशावयवामपश्यं मरणोन्मुखीम्

तादृग्व्यथांच तांवीक्ष्यकृपयाहंपरिप्लुतः । प्रतीक्षन्मरणं तस्याःक्षणंतत्रैवसंस्थितः

अथान्तरीक्षपदवीं सिञ्चन्तमिवरश्मिभिः । दिव्यं विमानमानीतमद्राक्षंशिवकिङ्करैः

तस्मिन्नर्वीन्दुवह्नीनां तेजसामिव पञ्जरे । विमानेसूर्यसङ्काशानपश्यं शिवकिङ्करान्

ते वै त्रिशूलखट्वाङ्गटङ्कचर्मासिपाणयः । चन्द्रार्धभूषणाः सान्द्रचन्द्रकुन्दोरुवर्चसः

किरीटकुण्डलभ्राजन्महाहिबलयोज्ज्वलाः । शिवानुगामयादृष्टाश्चत्वारःशुभलक्षणाः

तानापतत आलोक्य विमानस्थान् सुविस्मितः ।

उपसृत्याऽन्तिके वेगादपृच्छं गगने स्थितान् ॥ १४ ॥

नमो नमो वस्त्रिदशोत्तमेभ्यस्त्रिलोचनश्रीचरणानुगेभ्यः ।

त्रिलोकरक्षाविधिमावहद्भ्यस्त्रिशूलचर्मासिगदाधरेभ्यः ॥ १५ ॥

विदिता हि मया यूयं महेश्वरपदानुगाः । इयं यो लोकरक्षार्था गतिराहो विनोदजा

उत सर्वजनाघौघविजयाय कृतोद्यमाः । ब्रूत कारुण्यतो मह्यं यस्माद्यूयमिहागताः

शिवदूता ऊचुः

एषाग्रेदृश्यते वृद्धाचाण्डालीमरणोन्मुखी । एतामानेतुमायाताःसन्दिष्टाःप्रभुणावयम्

इत्युक्ते शिवदूतैस्तैरपृच्छंपुनरप्यहम् । विस्मयाविष्टचित्तस्तान्कृताञ्जलिरवस्थितः

अहो पापीयसी घोरा चाण्डाली कथमर्हति ।

दिव्यं विमानमारोढुं शुनीवाऽध्वरमण्डलम् ॥ २० ॥

आजन्मतोऽशुचिप्रायां पापां पापानुगामिनीम् ।

कथमेनां दुराचारां शिवलोकं निनीषथ ॥ २१ ॥

अभ्यानास्तिशिवज्ञानंनास्तिघोरतरंतपः । सत्यंनास्तिदयानास्तिकथमेनांनिनीषथ

पशुमांसकृताहारां वारुणीपूरितोदराम् । जीवहिंसारतां नित्यं कथमेनां निनीषथ

न चपञ्चाक्षरी जप्ता नकृतं शिवपूजनम् । नध्यातो भगवाञ्छम्भुः कथमेनां निनीषथ

नोपोषिता शिवतिथिर्नकृतंशिवपूजनम् । भूतसौहृदंनजानातिनचबिल्वशिवार्पणम्

नेष्टापूर्तादिकं वापि कथमेनां निनीषथ ॥ २५ ॥

न च स्नातानि तीर्थानिनदानानिकृतानि च । न चव्रतानिचीर्णानिकथमेनांनिनीषथ

ईक्षणे परिहर्त्तव्या किमु सम्भाषणादिषु । सत्संगरहितां चण्डां कथमेनां निनीषथ

जन्मान्तरार्जितं किञ्चिदस्याः सुकृतमस्तिवा । तत्कथंकुष्ठरोगणकृमिभिःपरिभूयते

अहोईश्वरचर्येयंदुर्विभाव्याशरीरिणाम् । पापात्मानोऽपिनायन्तेकारुण्यात्परमंपदम्

इत्युक्तास्ते मया दूता देवदेवस्य शूलिनः । प्रत्यूचुर्मामथ प्रीत्या सर्वसंशयभेदिनः

शिवदूता ऊचुः

ब्रह्मन्सुमहदाश्चर्यंश्रृणुकौतूहलंयदि । इमामुद्दिश्यचाण्डालींयदुक्तंभवताऽधुना ॥

आसीदियंपूर्वभवे काचिद्ब्राह्मणकन्यका । सुमित्रानाम सम्पूर्णसोमबिम्बसमानना

उत्फुल्लमल्लिकादामसुकुमाराङ्गलक्षणा । कैकेयद्विजमुख्यस्य कस्यचित्तनयासती

तां सर्वलक्षणोपेतां रतेर्मूर्त्तिमिवाऽपराम् ।
वर्द्धमानां पितुर्गेहे वीक्ष्याऽऽसन्विस्मिता जनाः ॥ ३४ ॥

दिनेदिने वर्धमाना बन्धुभिर्लालिताभृशम् । साशनैर्यौवनं भेजे स्मरस्येव महाधनुः
अथ सा बन्धुवर्गैश्च समेतेन कुमारिका । पित्रा प्रदत्ता कस्मैचिद्विधिनाद्विजसूनवे
सा भर्त्तारमनुप्राप्य नवयौवनशालिनी । कञ्चित्कालं शुभाचारा रेमे बन्धुभिरावृता
अथ कालवशात्तस्याः पतिस्तीव्ररुजार्दितः । रूपयौवनकान्तोऽपिपञ्चत्वमगमन्मुने

मृते भर्त्तरि दुःखेन विदग्धहृदया सती ।
उवास कतिचिन्मासान्सुशीला विजितेन्द्रिया ॥ ३६ ॥

अथ यौवनभारेण जृम्भमाणेन नित्यशः । बभूव हृदयं तस्याः कन्दर्पपरिकम्पितम्
सागुप्ता बन्धुवर्गेण शासितापि महोत्तमैः । नशशाक मनो रोद्धुं मदनाकृष्टमङ्गना
सातीव्रमन्मथाविष्टारूपयौवनशालिनी । विधवापि विशेषेण जारमार्गरताभवत्
नज्ञाता केनचिदपि जारिणीतिविचक्षणा । जुगूहात्मदुराचारं कञ्चित्कालमसत्तमा
तां दोहदसमाक्रान्तां घननीलमुखस्तनीम् । कालेन बन्धुवर्गोपिबुबोधविटदूषिताम्

इति भीतो महाक्लेशाच्चिन्तां लेभे दुरत्ययाम् ।
स्त्रियः कामेन नश्यन्ति ब्राह्मणा हीनसेवया ॥ ४५ ॥

राजानो ब्रह्मदण्डेन यतयो भोगसंग्रहात् । लीढं शुना तथैवान्नं सुरया वार्पितं पयः
रूपं कुष्ठरुजाविष्टं कुलं नश्यति कुस्त्रिया । इति सर्वे समालोच्यसमेताःपतिसोदराः
तत्यजुर्गात्रतो दूरं गृहीत्वा सकचग्रहम् । सघटोत्सर्गमुत्सृष्टा सानारीसर्वबन्धुभिः
विचरन्तीचशूद्रेणरममाणा रतिप्रिया । सा ययौ स्त्री बहिर्ग्रामाद्दृष्टाशूद्रेणकेनचित्
स तां दृष्ट्वा वरारोहां पीनोन्नतपयोधराम् । गृहंनिनाय साम्नाचविधवांशूद्रनायकः

सा नारी तस्य महिर्षी भूत्वा तेन दिवानिशम् ॥ ५० ॥

रममाणा क्वचिद्देशे न्यवसद्गृहवल्लभा । तत्रसापिशिताहारा नित्यमापीतवारुणी
लेभेसुतं च शूद्रेण रममाणा रतिप्रिया । कदाचिद्भर्तरि क्वापि यातेपीतसुरा तुसा
इयेषपिशिताहारं मदिरामदविह्वला । अथ मेषेषु बद्धेषु गोभिः सह बहिर्व्रजे ॥ ५३॥

ययौकृपाणमादायसातमोऽन्धे निशामुखे । अविमृश्यमदावेशान्मेषबुद्ध्यामिषप्रिया
एकं जघान गोवत्सं क्रोशंतं निशि दुर्भगा । निहतं गृहमानीय ज्ञात्वागोवत्समङ्गना

भीता शिवशिवेत्याह केनचित्पुण्यकर्मणा ।
सा मुहूर्त्तमिति ध्यात्वा पिशितासवलालसा ॥ ५६ ॥

छित्त्वातमेवगोवत्संचकाराहारमीप्सितम् । गोवत्सार्धशरीरेण कृताहाराथ सा पुनः
तदर्धदेहं निक्षिप्यबहिश्चुक्रोशकैतवात् । अहोव्याघ्रेणभग्नोऽयंजग्धोगोवत्सकोव्रजे
इति तस्याःसमाक्रन्दः सर्वगेहेषु शुश्रुवे । अथ सर्वेशूद्रजनाःसमागम्यान्तिकेस्थिताः
हतं गोवत्समालोक्यव्याघ्रेणेति शुचंययुः । गतेषु तेषुसर्वेषु व्युष्टायां च ततोनिशि
तद्भर्ता गृहमागत्यदृष्टवान्गृहविड्नरम् । एवं बहुतिथेकाले गतेसाशूद्रवल्लभा ॥ ६१
कालस्य वशमापन्नाजगामयममन्दिरम् । यमोपिधर्ममालोक्यतस्याःकर्मचपौर्विकम्

निर्वर्त्य निरयावासाच्चक्रे चण्डालजातिकाम् ।
साऽपि भ्रष्टा यमपुराच्चाण्डालीगर्भमाश्रिता ॥ ६३ ॥
ततो बभूव जात्यन्धा प्रशान्ताङ्गारमेचका ।
तत्पिता कोऽपि चाण्डालो देशे कुत्रचिदास्थितः ॥ ६४ ॥

तां तादृशीमपि सुतां कृपया पर्यपोषयत् । अभोज्येन कदन्नेन शुनालीढेनपूतिना
अपेयैश्च रसैर्मात्रापोषितासादिनेदिने । जात्यन्धासापिकालेन बाल्ये कुष्ठरुजार्दिता
ऊढा नकेनचिद्वापिचाण्डालेनातिदुर्भगा । अतीतबाल्येसाकालेविध्वस्तपितृमातृका
दुर्भगेति परित्यक्ता बन्धुभिश्च सहोदरैः । ततःक्षुधार्दिता दीनाशोचन्तीविगतेक्षणा
गृहीतयष्टिः कृच्छ्रेण सञ्चचालसलोष्टिका । पत्तनेष्वपि सर्वेषु याचमाना दिनेदिने
चाण्डालोच्छिष्टपिण्डेन जठराग्निमतर्पयत् । एवं कृच्छ्रेणमहता नीत्वा सुबहुलंवयः
जरया ग्रस्तसर्वाङ्गी दुःखमाप दुरत्ययम् । निरन्नपानवसना साकदाचिन्महाजनान्

आयास्यन्त्यां शिवतिथौ गच्छतो बुबुधेऽध्वगान् ।
तस्यां तु देवयात्रायां देशदेशान्तयायिनाम् ॥ ७२ ॥
विप्राणां साग्निहोत्राणां सस्त्रीकाणां महात्मनाम् ।

राज्ञां च सावरोधानां सहस्तिरथवाजिनाम् ॥ ७३ ॥
सपरीवारघोषाणां यानच्छत्रादिशोभिनाम् ।
तथान्येषां च विट्शूद्रसंकीर्णानां सहस्रशः ॥ ७४ ॥
हसतांगायतांकापिनृत्यतामथधावताम् । जिघ्रतांपिबतांकामाद्गच्छतांप्रतिगर्जताम्
सम्प्रयाणेमनुष्याणां संभ्रमःसुमहानभूत् । इतिसर्वेषुगच्छत्सुगोकर्णं शिवमन्दिरम्
पश्यन्ति दिविजाः सर्वे विमानस्थाःसकौतुकाः ।
अथेयमपि चाण्डाली वसनाशनतृष्णया ॥ ७७ ॥
महाजनान्याचयितुं चचालच शनैःशनैः । करावलम्बेनान्यस्याःप्राग्जन्मार्जितकर्मणा
दिनैः कतिपयैर्यान्ती गोकर्णं क्षेत्रमाययौ ॥ ७८ ॥
ततो विदूरे मार्गस्य निषण्णाविवृताञ्जलिः । याचमानामुहुःपान्थान्बभाषेकृपणंवचः
प्राग्जन्मार्जितपापौघैः पीडितायाश्चिरंमम ।
आहारमात्रदानेन दयां कुरुत भो जनाः ॥ ८० ॥
त्रातारः परमार्तानां दातारः परमाशिषाम् । कर्तारो बहुपुण्यानांदयांकुरुतभोजनाः
वसनाशनहीनायां स्वपितायां महीतले । महापांसुनिमग्नायां दयां कुरुत भोजनाः
महाशीतातपार्त्तायां पीडितायां महारुजा ।
अन्धायां मयि वृद्धायां दयां कुरुत भो जनाः ॥ ८३ ॥
चिरोपवासदीप्तायां जठराग्निविवर्धनैः । संदह्यमानसर्वाङ्ग्यां दयां कुरुत भोजनाः
अनुपार्जितपुण्यायां जन्मान्तरशतेष्वपि । पापायांमन्दभाग्यायांदयांकुरुतभोजनाः
एवमभ्यर्थयन्त्यास्तु चाण्डाल्याः प्रसृतेऽञ्जलौ ।
एकः पुण्यतमः पान्थः प्राक्षिपद्बिल्वमञ्जरीम् ॥ ८६ ॥
तामञ्जलौ निपतितां सा विमृश्य पुनः पुनः । अभक्ष्येत्येवमत्वाथदूरेप्राक्षिपदातुरा
तस्याः करेण निर्मुक्ता रात्रौ सा बिल्वमञ्जरी ।
पपात कस्यचिद्दिष्ट्या शिवलिङ्गस्य मस्तके ॥ ८८ ॥
सैवं शिवचतुर्दश्यां रात्रौ पान्थजनान्मुहुः । याचमानापियत्किञ्चिन्न लेभेदैवयोगतः

तत्रोषिताऽनया रात्रिर्भद्रकाल्यास्तु पृष्ठतः ।
किञ्चिदुत्तरतः स्थानं तदर्धेनातिदूरतः ॥ ९० ॥
ततः प्रभाते भ्रष्टाशा शोकेन महताप्लुता । शनैर्निववृते दीना स्वदेशायैवकेवला
श्रान्ता चिरोपवासेन निपतन्ती पदे पदे ।
क्रन्दन्ती बहुरोगार्ता वेपमाना भृशातुरा ॥ ९२ ॥
दह्यमानार्कतापेन नग्नदेहा सयष्टिका । अतीत्यैतावतीं भूमिं निपपात विचेतना ॥
अथ विश्वेश्वरः शम्भुःकरुणामृतवारिधिः । एनामानयतेत्यस्मान्युयुजेसविमानकान्
एषा प्रवृत्तिश्चाण्डाल्यास्तवेहपरिकीर्त्तिता । तथा संदर्शिताशम्भोःकृपणेपुकृपालुता
कर्मणः परिपाकोत्थां गतिंपश्यमहामते । अधमापि परं स्थानमारोहति निरामयम्
यदेतयापूर्वभवेनाऽन्नदानादिकंकृतम् । क्षुत्पिपासादिभिःक्लेशैस्तस्मादिहनिपीड्यते
यदेषा मदवेगांधा चक्रे पापं महोल्बणम् । कर्मणा तेन जात्यन्धाबभूवात्रैव जन्मनि
अपि विज्ञाय गोवत्सं यदेषाऽभक्षयत्पुरा ।
कर्मणा तेन चाण्डाली बभूवेह विगर्हिता ॥ ९९ ॥
यदेषार्यपथं हित्वा जारमार्गरता पुरा । तेन पापेन केनापि दुर्वृत्ता दुर्भगापि वा
यदाश्लिक्षन् मदाविष्टा जारेण विधवा पुरा । तेन पापेन महता बहुकुष्ठव्रणान्विता
कामार्त्ता यदियं स्वैरं शूद्रेण रमिता पुरा । महासृक्पूयकृमिभिःपीड्यतेतेनपाप्मना
सुव्रतानि न चीर्णानि नेष्टापूर्तादिकं कृतम् ।
सर्वभोगविहीनेयं दूयते तेन पाप्मना ॥ १०३ ॥
यदेतया पूर्वभवे सुरा पीता विमूढया । महायक्ष्मार्तिहृच्छूलैः पीडयते तेन पाप्मना
अत्रैव सर्वमर्त्येषु पापचिह्नानि कृत्स्नशः । लक्ष्यन्ते मुनिशार्दूलसविवेकैर्महात्मभिः
अत्र ये बहुरोगार्त्ता ये पुत्रधनवर्जिताः ॥ १०६ ॥
ये च दुर्लक्षणक्लिष्टा याचका विगतह्रियः । वासोन्नपानशयनभूषणाभ्यञ्जनादिभिः
हीनाविरूपानिर्विद्याविकलाङ्गाःकुभोजनाः । येदुर्भाग्यानिन्दिताश्चयेचान्येपरसेवकाः
एते पूर्वभवे सर्वे सुमहत्पापकारिणः । एवं विमृश्य यत्नेनदृष्ट्वा लोकजनस्थितिम्

बुधो न कुरुते पापं यदि कुर्यात्सआत्महा । देहोऽयंमानुषो जन्तोर्बहुकर्मैकभाजनम्
सदा सत्कर्म सेवेत दुष्कर्मसततंत्यजेत् । पुण्यं सुखार्थीकुर्वीतदुःखार्थीपापमाचरेत्

द्वयोरेकतरे लोके गृहीते कुशलो जनः ।

इमं मानुषमाश्रित्य देहं परमदुर्लभम् ॥ ११२ ॥

य आत्महितवान्कश्चिद्देवमेकंसमाश्रयेत् । अथ पापानि सर्वाणि कुर्वन्नपिसदानरः
शिवमेकमतिर्ध्यायेत्स संतरति पातकम् । मृता पूर्वभवे त्वेषायदा प्राप्ता यमालये
तदा वितर्कः सुमहानासीद्यमसभासदाम् । यद्यपि ब्राह्मणीत्वेषासत्कुलाचारदूषिता

अतोऽस्माभिरिहानीता निरयं यातु वा न वा ।

अनया साधितो बाल्ये पुण्यलेशोऽस्ति वा न वा ॥ ११६ ॥

अथापि सुविमृश्यैवंधार्योदण्डोऽत्रनान्यथा । बहुजन्मसहस्रेषु कृतपुण्यविपाकतः
नृणां ब्रह्मकुलेजन्मलभ्यते हि कथञ्चन । अतोऽस्याः पूर्वपूर्वेषुकृताघं नास्तिजन्मसु
अन्यथा सत्कुले जन्म कथमेषा प्रपद्यते । अत्रैव जन्मन्यनया कृतमंहो दुरत्ययम्
अथापि नरकावासं प्रायशो नेयमर्हति । किं तुगोवत्सकंहत्वाविमृश्यागतसाध्वसा
एषा शिवशिवेत्याह प्राग्जन्मार्जितकर्मणा । यदेषापापविच्छित्त्यैसकृदप्युरुमंगलम्

शिवनाम वदेद्भक्त्या तर्हि गच्छेत्परंपदम् ।

एकजन्मकृतस्यास्य दारुणस्यापि यत्फलम् ॥ १२२ ॥

क्रमेणाऽनुभवत्वेषा भूत्वा चाण्डालजातिका ।

अस्मादन्यतमः को वा नरकोऽस्ति नृणामिह ॥ १२३ ॥

अनेकक्लेशसंघातैर्यन्मुहुः परिपीडनम् । दुष्कुलेजन्मदारिद्र्यं महाव्याधिविमूढता
एकैक एव नरकःसर्वे वा चाथकिम्पुनः । प्राग्जन्मपुण्यभारेण यन्नाम विवशाऽब्रवीत्
तेनैषाऽन्यभवे भूरि पुण्यमन्ते करिष्यति । तेन पुण्येन महता निस्तीर्याघौघयातनाः
नीता तत्पुरुषैरन्ते प्रयास्यतिपरंपदम् । एतादृशानां मर्त्यानांशास्तारोनवयं क्वचित्

विचार्य स्वयमेवेशो यद्युक्तं तत्करोतु सः ।

एवं वैवस्वतपुरे सर्वैर्यमपुरोगमैः । विमृश्य चित्रगुप्ताद्यैरियं मुक्ताऽपतद्भुवि ॥

आदौ यदेषा शिवनाम नारी प्रमादतो वाऽप्यसती जगाद ।

तेनेह भूयः सुकृतेन शम्भोर्बिल्वाङ्कुराराधनपुण्यमाप ॥ १२६ ॥

श्रीगोकर्णे शिवतिथावुपोष्य शिवमस्तके । कृत्वाजागरणं ह्येषाचक्रेबिल्वार्पणंनिशि
अकामतः कृतस्यास्यपुण्यस्यैवचयत्फलम् । अद्यैव भोक्ष्यतेसेयंपश्यतस्तवनोमृषा

गौतम उवाच

इत्युक्त्वाशिवदूतास्तेतस्याश्चाण्डालयोनितः । जीवलेशंसमाकृष्ययुयुजुर्दिव्यतेजसा

तां दिव्यदेहसंक्रान्तां तेजोराशिसमुज्ज्वलाम् ।

विमाने स्थापयामासुः प्रीतास्ते शिवकिङ्कराः ॥ १३३ ॥

अथ सा परमोदाररूपलावण्यशालिनी । दिव्यभूषणदीप्ताङ्गीदिव्याम्बरविधारिणी ॥
देहेन दिव्यगन्धेन दिव्यतेजोविकाशिना । दिव्यमाल्यावतंसेन विरराज विमानगा
रत्नच्छत्रपताकाद्यैर्गीतवादित्रनिस्वनैः । मध्ये सा शिवदूतानां मोदमाना वरानना

अनुभूतानि जन्मानि स्मृत्वा स्मृत्वा पुनः पुनः ।

भीता त्रस्ता दृढाश्चर्यं दृष्ट्वा स्वप्नमिवोत्थिता ॥ १३७ ॥

काहंकेऽमीमहासिद्धाःकोयंलोकोमनोरमः । क्वगतंमेवपुःकष्टं चण्डचाण्डालगोत्रजम्
अहोसुमहदाश्चर्यं दृष्टं मायाविलासजम् । यन्मे भवसहस्रेषु भ्रान्तंभ्रान्तं पुनःपुनः ॥
अहो ईश्वरपूजाया माहात्म्यंविस्मयावहम् । पत्रमात्रेण संतुष्टो यो ददातिनिजंपदम्
इतितां जातनिर्वेदां स्मरन्तींभगवत्पदम् । दिव्यं विमानमारोप्य ते महेश्वरकिङ्कराः
आलोकयत्सुसर्वेषुलोकेशेषुसविस्मयम् । आमन्त्र्य तामथानिन्युःपरमेश्वरसन्निधिम्
राजन्सुमहदाश्चर्यमाख्यातं गिरिजापतेः । माहात्म्यंभक्तिलेशस्यसर्वाघौघविनाशनम्

राजोवाच

भगवन्परमेशस्य कीदृशो लोक उत्तमः । तस्य मे लक्षणं ब्रूहि यद्यस्तिमयितेदयाः

गौतम उवाच

ब्रह्मादिसुरनाथानां लोकेष्वपि सुदुर्लभः । य आनन्दः सदायत्र स लोकःपारमेश्वरः
सर्वातिगमनंयत्र ज्योतिर्यत्र प्रतिष्ठितम् । क्वापि नास्तितमोयोगःसलोकपारमेश्वरः

गुणवृत्तिं विनिस्तीर्य संप्राप्ता यत्र योगिनः ।
न पतेयुः पुनः सर्वे स लोकः पारमेश्वरः ॥ १४७ ॥

यत्रवासं न कुर्वन्ति क्रोधलोभमदादयः । यत्रावस्थानजन्माद्याःस लोकःपारमेश्वरः सर्वेषां निगमानां च यदेकं क्षेत्रमुच्यते । यस्मान्नास्ति परं वित्तंतत्पदं पारमेश्वरम् प्रत्याहारासनध्यानप्राणसंयमनादिभिः । यत्र योगपथैः प्राप्तुं यतन्ते योगिनः सदा यत्र देवः सदानन्दनिर्मलज्ञानरूपया । अस्ति देव्या सहक्रीडन्स लोकः पारमेश्वरः जन्मानेकसहस्रेषु सम्भूतैः पुण्यराशिभिः । आरूढाः पुरुषा नार्यःक्रीडन्ते यत्रसंगताः तेजोराशौ समालीनादुर्विभाव्येमनोरमे । अहोरात्रादिसंस्थानं न विन्दन्ति कदाचन स लोकः परमेशस्य दुर्लभो हि कुयोगिनः । एतद्भक्तिसुपूर्णा ये तैरेव प्रतिपद्यते
ये तत्कथाश्रवणकीर्तनजातहर्षा ये सर्वभूतसुहृदः प्रशमैकनिष्ठाः ।
संसारचक्रमतिवाह्य निरस्तमोहास्ते शाङ्करं पदमवाप्य सुखं रमन्ते ॥ १५५ ॥

तथा त्वमपिराजेन्द्रगोकर्णगिरिशालयम् । गत्वाप्रशमिताघौघः कृतकृत्यत्वमाप्नुहि तत्र सर्वेषुकालेषुस्नात्वाभ्यर्च्यमहाबलम् । कृत्वा शिवचतुर्दश्यामुपवासंसमाहितः
कृत्वा जागरणं रात्रौ बिल्वैरभ्यर्च्य शङ्करम् ।
सर्वपापविनिर्मुक्तः शिवलोकमवाप्स्यसि ॥ १५८ ॥
एष ते विमलो राजन्नुपदेशो मया कृतः ।
स्वस्ति तेऽस्तु गमिष्यामि मिथिलाधिपतेः पुरीम् ॥ १५९ ॥
इत्यामन्त्र्य मुनिः प्रीत्या गौतमो मिथिलां ययौ ।
सोऽपि हृष्टमना राजा गोकर्णं प्रत्यपद्यत ॥ १६० ॥

तत्रदृष्ट्वामहादेवं स्नात्वाऽभ्यर्च्य महाबलम् । निर्धूताशेषपापौघो लेभेशम्भोःपरंपदम् यइमांशृणुयान्नित्यंकथांशैवींमनोहराम् । श्रावयेद्वाजनोभक्त्यासयातिपरमां गतिम्
श्रद्दधानः सकृद्वापि य इमां शृणुयात्कथाम् ।
त्रिःसप्तकुलजैः सार्धं शिवलोकमवाप्नुयात् ॥ १६३ ॥
इति कथितमशेषं श्रेयसामादिबीजं भवशतदुरितघ्नं ध्वस्तमोहान्धकारम् ।

चरितममरगेयं मन्मथारेरुदारं सततमपि निषेव्यं स्वस्तिमद्भिश्च लोकैः ॥
इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे शिवचतुर्दशीगोकर्णक्षेत्रमाहात्म्यवर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

चतुर्दशीमाहात्म्यवर्णनम्

सूत उवाच

भूयोपिशिवमाहात्म्यंवक्ष्यामिपरमाद्भुतम् । शृण्वतांसर्वपापघ्नं भवपाशविमोचनम्
दुस्तरे दुरिताम्भोधौ मज्जतां विषयात्मनाम् ।
शिवपूजां विना कश्चित्प्लवो नास्ति निरूपितः ॥ २ ॥

शिवपूजां सदाकुर्याद्बुद्धिमानिहमानवः । अशक्तश्चेत्कृतां पूजां पश्येद्भक्तिविनम्रधीः अश्रद्धयापियःकुर्याच्छिवपूजां विमुक्तिदाम् । पश्येद्वा सोपिकालेनप्रयातिपरमंपदम् आसीत्किरातदेशेषु नाम्ना राजा विमर्दनः । शूरः परमदुर्द्धर्षो जितशत्रुः प्रतापवान् सर्वदा मृगयासक्तः कृपणो निर्घृणोबली । सर्वमांसाशनः क्रूरः सर्ववर्णाङ्गनावृतः तथापि कुरुतेशम्भोःपूजां नित्यमतन्द्रितः । चतुर्दश्यांविशेषेणपक्षयोः शुक्लकृष्णयोः महाविभवसम्पन्नां पूजां कृत्वासमोदते । हर्षेण महताविष्टो नृत्यतिस्तौतिगायति तस्यैवं वर्तमानस्य नृपतेः सर्वभक्षिणः । दुराचारस्य महिषी चेष्टितेनान्वतप्यत ॥ सा वै कुमुद्वतीनाम राज्ञी शीलगुणान्विता । एकदा पतिमासाद्य रहस्ये तदपृच्छत एतत्ते चरितं राजन्महदाश्चर्यकारणम् । क्व ते महान्दुराचारः क्व भक्तिः परमेश्वरे ॥ सर्वदा सर्वभक्षस्त्वं सर्वस्त्रीजनलालसः । सर्वहिंसापरः क्रूरः कथं भक्तिस्तवेश्वरे इति पृष्टः स भूपालो विमृश्य सुचिरंततः । त्रिकालज्ञः प्रहस्यैनां प्रोवाचसुकुतूहलः

राजोवाच

अहं पूर्वभवे कश्चित्सारमेयो वरानने !। पम्पानगरमाश्रित्य पर्यटामि समन्ततः ॥१४
एवं कालेषु गच्छत्सु तत्रैव नगरोत्तमे । कदाचिदागतः सोऽहं मनोज्ञं शिवमन्दिरम्
पूजायांवर्त्तमानायां चतुर्दश्यां महातिथौ । अपश्यमुत्सवं दूराद्बहिर्द्वारंसमाश्रितः
अथाहं परमक्रुद्धैर्दण्डहस्तैः प्रधावितः । तस्माद्देशादपक्रान्तः प्राणरक्षापरायणः ॥

ततः प्रदक्षिणीकृत्य मनोज्ञं शिवमन्दिरम् ।
द्वारदेशं पुनः प्राप्य पुनश्चैव निवारितः ॥ १८ ॥

पुनः प्रदक्षिणीकृत्य तदेव शिवमन्दिरम् । बलिपिण्डादिलोभेन पुनर्द्वारमुपागतः ॥
एवं पुनःपुनस्तत्र कृत्वा कृत्वा प्रदक्षिणाम् । द्वारदेशेसमासानं निजघ्नुर्निशितैःशरैः

स विद्धगात्रः सहसा शिवद्वारि गतासुकः ।
जातोऽस्म्यहं कुले राज्ञां प्रभावाच्छिवसन्निधेः ॥ २१ ॥

दृष्ट्वा चतुर्दशीपूजादीपमालाविलोकिताः । तेनपुण्येनमहतात्रिकालज्ञोऽस्मिभामिनि!

प्राग्जन्मवासनाभिश्च सर्वभक्षोऽस्मि निर्घृणः ।
विदुषामपि दुर्लङ्घ्या प्रकृतिर्वासनामयी ॥ २३ ॥

अतोऽहमर्चयामीशं चतुर्दश्यां जगद्गुरुम् । त्वमपिश्रद्धया भद्रे! भजदेवंपिनाकिनम्

राज्ञ्युवाच

त्रिकालज्ञोऽसिराजेन्द्र प्रसादाद्गिरिजापतेः । मत्पूर्वजन्मचरितं वक्तुमर्हसि तत्त्वतः

राजोवाच

त्वं तु पूर्वभवे काचित्कपोती व्योमचारिणी ।
क्वापि लब्धवती किञ्चिन्मांसपिण्डं यदृच्छया ॥ २६ ॥

त्वद्गृहीतमथालोक्यगृध्रःकोऽप्यामिषंबली। निरामिषःस्वयंवेगादभिदुद्रावभीषणः
ततस्तं वीक्ष्यवित्रस्ता विद्रुतासि वरानने । तेनानुयाताघोरेण मांसपिण्डजिघृक्षया

दिष्ट्या श्रीगिरिमासाद्य श्रान्ता तत्र शिवालयम् ।
प्रदक्षिणं परिक्रम्य ध्वजाग्रे समुपस्थिता ॥ २९ ॥

अथाऽनुसृत्य सहसा तीक्ष्णतुण्डो विहङ्गमः ।
त्वां निहत्य निपात्याऽधो मांसमादाय जग्मिवान् ॥ ३० ॥

प्रदक्षिणप्रक्रमणाद्देवदेवस्य शूलिनः । तस्याग्रे मरणाच्चैव जातासीह नृपाङ्गना ॥

राज्ञ्युवाच

श्रुतं सर्वमशेषेण प्राग्जन्मचरितंमया । जातं च महदाश्चर्यं भक्तिश्च मम चेतसि ॥

अथाऽन्यच्छ्रोतुमिच्छामि त्रिकालज्ञ! महामते !।
इदं शरीरमुत्सृज्य यास्यावः कां गतिं पुनः ॥ ३३ ॥

राजोवाच

अतो भवे जनिष्येऽहं द्वितीये सैन्धवो नृपः ॥ ३४ ॥

सृञ्जयेशसुतात्वंहिमामेवप्रतिपत्स्यसे । तृतीयेतुभवेराजासौराष्ट्रे भविताऽस्म्यहम्
कलिङ्गराजतनया त्वं मे पत्नीभविष्यसि । चतुर्थे तुभविष्यामि भवेगान्धारभूमिपः
मागधी राजतनया तत्रत्वं मम गेहिनी । पञ्चमेऽवन्तिनाथोऽहं भविष्यामिभवान्तरे
दाशार्हराजतनया त्वमेव मम वल्लभा । अस्माज्जन्मनि षष्ठेऽहमानर्ते भविता नृपः ॥

ययातिवंशजा कन्या भूत्वा मामेव यास्यसि ।
पाण्ड्यराजकुमारोऽहं सप्तमे भविता भवे ॥ ३९ ॥

तत्र मत्सदृशो नान्यो रूपौदार्यगुणादिभिः । सर्वशास्त्रार्थतत्त्वज्ञो बलवान्दृढविक्रमः
सर्वलक्षणसम्पन्नः सर्वलोकमनोरमः । पद्मवर्णइति ख्यातः पद्ममित्रसमद्युतिः ॥ ४१
भविता त्वं च वैदर्भीरूपेणाप्रतिमाभुवि । नाम्ना वसुमती ख्यातारूपावयवशोभिनी
सर्वराजकुमाराणां मनोनयननन्दिनी । सा त्वं स्वयम्वरे सर्वान्विहाय नृपनन्दनान्

वरं प्राप्स्यसि मामेव दमयन्तीव नैषधम् ।
सोऽहं जित्वा नृपान्सर्वान्प्राप्य त्वां वरवर्णिनीम् ॥ ४४ ॥
स्वराष्ट्रस्थोऽखिलान्भोगान्भोक्ष्ये वर्षगणान्बहून् ।
इष्ट्वा च विविधैर्यज्ञैर्वाजिमेधादिभिः शुभैः ॥ ४५ ॥

सन्तर्प्य पितृदेवर्षीन्दानैश्च द्विजसत्तमान् । संपूज्य देवदेवेशं शङ्करं लोकशङ्करम् ॥

पुत्रे राज्यधुरंन्यस्यगन्तास्मितपसे वनम् । तत्रागस्त्यान्मुनिवराद्ब्रह्मज्ञानमवाप्यच त्वया सह गमिष्यामि शिवस्य परमंपदम् । चतुर्दश्यां चतुर्दश्यामेवं संपूज्यशङ्करम् सप्तजन्मसु राजत्वं भविष्यति वरानने !। इत्येतत्सुकृतं लब्धं पूजादर्शनमात्रतः ॥

क सारमेयो दुष्टात्मा क्वेदृशी बत सद्गतिः ॥ ४९ ॥

सूत उवाच

इत्युक्ता निजनाथेन सा राज्ञी शुभलक्षणा ॥ ५० ॥

परं विस्मयमापन्ना पूजयामास तं मुदा ।

सोऽपि राजा तया सार्द्धं भुक्त्वा भोगान्यथेप्सितान् ॥ ५१ ॥

जगाम सप्तजन्मान्ते शम्भोस्तत्परमंपदम् । यएतच्छिवपूजायामाहात्म्यंपरमाद्भुतम्

श्रृणुयात्कीर्तयेद्वापि स गच्छेत्परमं पदम् ॥ ५२ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांतृतीये ब्रह्मोत्तरखण्डे चतुर्दशीमाहात्म्यवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

गोपकुमारचरितवर्णनम्

सूत उवाच

शिवो गुरुः शिवो देवः शिवो बन्धुः शरीरिणाम् ।

शिव आत्मा शिवो जीवः शिवादन्यन्न किञ्चन ॥ १ ॥

शिवमुद्दिश्य यत्किञ्चिद्दत्तं जप्तं हुतंकृतम् । तदनन्तफलं प्रोक्तं सर्वागमविनिश्चितम् भक्त्या निवेदितं शम्भोः पत्रंपुष्पंफलंजलम् । अल्पादल्पतरंवापितदानन्त्यायकल्पते विहाय सकलान्धर्मान्सकलागमनिश्चितान् । शिवमेकंभवेद्यस्तुमुच्यतेसर्वबन्धनात् या प्रीतिरात्मनःपुत्रे या कलत्रेधनेपिसा । कृता चेच्छिवपूजायांत्रायतीतिकिमद्भुतम्

तस्मात्केचिन्महात्मानः सकलान्विषयासवान् ।

त्यजन्ति शिवपूजार्थे स्वदेहमपि दुस्त्यजम् ॥ ६ ॥

सा जिह्वा या शिवं स्तौति तन्मनो ध्यायते शिवम् ।

तौ कर्णौ तत्कथालोलौ तौ हस्तौ तस्य पूजकौ ॥ ७ ॥

ते नेत्रेपश्यतःपूजां तच्छिरः प्रणतं शिवे । तौपादौयौशिवक्षेत्रं भक्त्यापर्यटतः सदा यस्येन्द्रियाणिसर्वाणिवर्त्तंतेशिवकर्मसु । सनिस्तरति संसारंभुक्तिमुक्तिश्चविन्दति

शिवभक्तियुतो मर्त्यश्चाण्डालः पुल्कसोऽपि च ।

नारी नरो वा षण्ढो वा सद्योमुच्येत संसृतेः ॥ १० ॥

किंकुलेनकिमाचारैःकिंशीलेनगुणेन वा । भक्तिलेशयुतःशम्भोः सवन्द्यःसर्वदेहिनाम् उज्जयिन्यामभूद्राजा चन्द्रसेनसमाह्वयः । जातो मानवरूपेण द्वितीय इव वासवः ॥ तस्मिन्पुरे महाकालं वसन्तं परमेश्वरम् । सम्पूजयत्यसौभक्त्या चन्द्रसेनोनृपोत्तमः तस्याऽभवत्सखाराज्ञःशिवपारिषदाग्रणीः । मणिभद्रोजिताभद्रः सर्वलोकनमस्कृतः तस्यैकदा महीभर्त्तुः प्रसन्नः शङ्करानुगः । चिन्तामणिंददौदिव्यं मणिभद्रोमहामतिः

स मणिः कौस्तुभ इव द्योतमानोऽर्कसन्निभः ।

दृष्टः श्रुतो वा ध्यातो वा नृणां गच्छति चिन्तितम् ॥ १६ ॥

तस्यकान्तिलवस्पृष्टंकांस्यंताम्रमयस्त्रपु । पाषाणादिकमन्यद्वासद्योभवतिकाञ्चनम् सतं चिन्तामणिं कण्ठे बिभ्रद्राजासनंगतः । रराजराजादेवानांमध्येभानुरिवस्वयम् सदाचिन्तामणिग्रीवं तं श्रुत्वा राजसत्तमम् । प्रवृद्धतर्षाराजानःसर्वेक्षुब्धहृदोऽभवन्

स्नेहात्केचिदयाचन्त धाष्ट्यात्केचन दुर्मदाः ।

दैवलब्धमजानन्तो मणिं मत्सरिणो नृपाः ॥ २० ॥

सर्वेषां भूभृतां याच्ञा यदा व्यर्थीकृतामुना । राजानःसर्वदेशानां संरम्भं चक्रिरेतदा

सौराष्ट्राः कैकयाः शालवाः कलिङ्गाशकमद्रकाः ।

पाञ्चालावन्तिसौवीरा मागधा मत्स्यसृञ्जयाः ॥ २२ ॥

एते चान्ये च राजानः सहाश्वरथकुञ्जराः । चन्द्रसेनं मृधे जेतुमुद्यमं चक्रुरोजसा ॥

ते तु सर्वे सुसंरब्धाःकम्पयन्तोवसुन्धराम् । उज्जयिन्याश्चतुर्द्वारं रुरुधुर्बहुसैनिकाः
संरुध्यमानां स्वपुरीं दृष्ट्वा राजभिरुद्धतैः । चन्द्रसेनो महाकालं तमेव शरणं ययौ ॥
निर्विकल्पोनिराहारः स राजादृढनिश्चयः । अर्चयामासगौरीशंदिवा नक्तमनन्यधीः
एतस्मिन्नन्तरे गोपी काचित्तत्पुरवासिनी । एकपुत्रा भर्तृहीना तत्रैवासीच्चिरन्तना
सा पञ्चहायनं बालं वहन्ती गतभर्तृका । राज्ञा कृतां महापूजां ददर्श गिरिजापतेः
सा दृष्ट्वा सर्वमाश्चर्यं शिवपूजामहोदयम् । प्रणिपत्य स्वशिविरं पुनरेवाभ्यपद्यत ॥
एतत्सर्वमशेषेण स दृष्ट्वा बल्लवीसुतः । कुतूहलेन विदधे शिवपूजां विरक्तिदाम् ॥

आनीय हृद्यं पाषाणं शून्ये तु शिविरोत्तमे ।
नाऽतिदूरे स्वशिविराच्छिवलिङ्गमकल्पयत ॥ ३१ ॥
यानि कानि च पुष्पाणि हस्तलभ्यानि चाऽऽत्मनः ।
आनीयस्नाप्य तल्लिङ्गम्पूजयामास भक्तितः ॥ ३२ ॥

गन्धालङ्कारवासांसि धूपदीपाक्षतादिकम् । विधायकृत्रिमैर्दिव्यैर्नैवेद्यंचाप्यकल्पयत्
भूयोभूयः समभ्यर्च्य पत्रैः पुष्पैर्मनोरमैः । नृत्यं च विविधं कृत्वा प्रणनाम पुनःपुनः
एवं पूजां प्रकुर्वाणं शिवस्यानन्यमानसम् । सापुत्रंप्रणयाद्गोपी भोजनायसमाह्वयत्
मात्राहूतोऽपिबहुशःसपूजासक्तमानसः । बालोपि भोजनं नैच्छत्तदामातास्वयंययौ

तं विलोक्य शिवस्याग्रे निषण्णं मीलितेक्षणम् ।
चकर्ष पाणिं संगृह्य कोपेन समताडयत् ॥ ३७ ॥
आकृष्टस्ताडितो वाऽपि नाऽऽगच्छत्स्वसुतो यदा ।
तां पूजां नाशयामास क्षिप्त्वा लिङ्गं विदूरतः ॥ ३८ ॥

हाहेति रुदमानं तं निर्भर्त्स्य स्वसुतं तदा । पुनर्विवेश स्वगृहं गोपी रोपसमन्विता
मात्रा विनाशितां पूजां दृष्ट्वा देवस्यशूलिनः । देवदेवेतिचुक्रोश निपपात स बालकः
प्रणष्टसञ्ज्ञः सहसा बाष्पपूरपरिप्लुतः । लब्धसञ्ज्ञो मुहूर्त्तेन चक्षुषी उदमीलयत् ॥

ततो मणिस्तम्भविराजमानं हिरण्मयद्वारकपाटतोरणम् ।
महार्हनीलामलवज्रवेदिकं तदेव जातं शिबिरं शिवालयम् ॥ ४२ ॥

सन्तप्तहेमकलशैर्बहुभिर्विचित्रैः प्रोद्भासितस्फटिकसौधतलाभिरामम् ।
रम्यं च तच्छिवपुरं वरपीठमध्ये लिङ्गञ्च रत्नसहितं स ददर्श बालः ॥ ४३ ॥

स दृष्ट्वा सहसोत्थाय भीतविस्मितमानसः । निमग्न इव सन्तोषात्परमानन्दसागरे

विज्ञाय शिवपूजाया माहात्म्यं तत्प्रभावतः ।
ननाम दण्डवद्भूमौ स्वमातुरघशान्तये ॥ ४५ ॥

देव! क्षमस्व दुरितं मम मातुरुमापते । मूढायास्त्वामजानन्त्याः प्रसन्नो भव शङ्कर!

यद्यस्ति मयि यत्किञ्चित्पुण्यं त्वद्भक्तिसम्भवम् ।
तेनाऽपि शिव! मे माता तव कारुण्यमाप्नुयात् ॥ ४७ ॥

इति प्रसाद्यगिरिशंभूयोभूयःप्रणम्य च । सूर्ये चास्तंगतेबालो निर्जगामशिवालयात्
अथापश्यत्स्वशिबिरं पुरन्दरपुरोपमम् । सद्योहिरण्मयीभूतंविचित्रविभवोज्ज्वलम्
सोऽन्तः प्रविश्यभवनंमोदमानोनिशामुखे । महामणिगणाकीर्णहेमराशिसमुज्ज्वलम्
तत्रापश्यत्स्वजननींस्मरन्तीमकुतोभयाम् । महार्हरत्नपर्यङ्के सितशय्यामधिश्रिताम्
रत्नालङ्कारदीप्ताङ्गींदिव्याम्बरविराजिनीम् । दिव्यलक्षणसम्पन्नांसाक्षात्सुरवधूमिव
जवेनोत्थापयामास सम्भ्रमोत्फुल्ललोचनः । अम्बजागृहि भद्रन्ते पश्येदं महदद्भुतम्

इति प्रबोधिता गोपी स्वपुत्रेण महात्मना ।
ततोऽपश्यत्स्वजननी स्मयन्ती मुकुटोज्ज्वला ॥ ५४ ॥

ससम्भ्रमं समुत्थाय तत्सर्वं प्रत्यवैक्षत । अपूर्वमिवचात्मानमपूर्वमिव बालकम् ॥
अपूर्वं च स्वसदनं दृष्ट्वाऽऽसीत्सुखविह्वला । श्रुत्वापुत्रमुखात्सर्वं प्रसादंगिरिजापतेः
राज्ञे विज्ञापयामासयोभजत्यनिशंशिवम् । स राजा सहसागत्य समाप्तनियमोनिशि
ददर्श गोपिकासूनोः प्रभावं शिवतोषजम् । हिरण्मयंशिवस्थानं लिङ्गंमणिमयंतथा

गोपबध्वाश्च सदनं माणिक्यवरकोज्ज्वलम् ।
दृष्ट्वा महीपतिः सर्वं सामात्यः स्वपुरोहितः ॥ ५६ ॥

मुहूर्तं विस्मितधृतिः परमानन्दनिर्भरः । प्रेम्णा बाष्पजलं मुञ्चन्परिरेभे तमर्भकम् ॥

एवमत्यद्भुताकाराच्छिवमाहात्म्यकीर्तनात् ।

पौराणं सम्भ्रमाच्चैव सा रात्रिः क्षणतामगात् ॥ ६१ ॥

अथ प्रभाते युद्धाय पुरं संरुध्यसंस्थिताः । राजानश्चारवक्त्रेभ्यः शुश्रुवुः परमाद्भुतम्
तेत्यक्तवैराःसहसाराजानश्चकिताभृशम् । न्यस्तशस्त्रानिविविशुश्चन्द्रसेनानुमोदिताः
तां प्रविश्यपुरीं रम्यां महाकालं प्रणम्य च । तद्गोपवनितागेहमाजग्मुः सर्वभूभृतः
ते तत्र चन्द्रसेनेनप्रत्युद्गम्याभिपूजिताः । महार्हविष्टरगताः प्रीत्यानन्दन्सुविस्मिताः
गोपसूनोःप्रसादायप्रादुर्भूतंशिवालयम् । लिङ्गंचवीक्ष्य सुमहच्छिवेचक्रुःपरांमतिम्

तस्मै गोपकुमाराय प्रीतास्ते सर्वभूभुजः ।
वासो हिरण्यरत्नानि गोमहिष्यादिकं धनम् ॥ ६७ ॥
गजानश्वान्रथान्रौक्माञ्छत्रयानपरिच्छदान् ।
दासान्दासीरनेकाश्च ददुः शिवकृपार्थिनः ॥ ६८ ॥

ये ये सर्वेषु देशेषुगोपास्तिष्ठन्तिभूरिशः । तेषां तमेव राजानं चक्रिरेसर्वपार्थिवाः
अथास्मिन्नन्तरे सर्वैस्त्रिदशैरभिपूजितः । प्रादुर्बभूव तेजस्वी हनूमान्वानरेश्वरः ॥
तस्याभिगमनादेव राजानो जातसम्भ्रमाः । प्रत्युत्थाय नमश्चक्रुर्भक्तिनम्रात्ममूर्त्तयः
तेषां मध्येसमासीनःपूजितः प्लवगेश्वरः । गोपात्मजंसमाश्लिष्यराज्ञोवाक्ष्येदमब्रवीत्
सर्वेशृणुतभद्रं वो राजानोये च देहिनः । शिवपूजामृतेनान्या गतिरस्तिशरीरिणाम्
एष गोपसुतोदिष्ट्याप्रदोषे मन्दवासरे । अमन्त्रेणापिसम्पूज्यशिवं शिवमवाप्तवान्
मन्दवारे प्रदोषोऽयं दुर्लभः सर्वदेहिनाम् । तत्रापि दुर्लभतरः कृष्णपक्षे समागते ॥
एष पुण्यतमोलोकेगोपानांकीर्तिवर्धनः । अस्यवंशेऽष्टमोभावी नन्दोनाममहायशाः

प्राप्स्यते तस्य पुत्रत्वं कृष्णो नारायणः स्वयम् ॥ ७६ ॥
अद्यप्रभृति लोकेऽस्मिन्नेष गोपालनन्दनः ।
नाम्ना श्रीकर इत्युच्चैर्लोके ख्यातिं गमिष्यति ॥ ७७ ॥

सूत उवाच

एवमुक्त्वाञ्जनीसूनुस्तस्मै गोपकसूनवे । उपदिश्य शिवाचारं तत्रैवाऽन्तरधीयत ७८
तेचसर्वे महीपालाः संहृष्टाः प्रतिपूजिताः । चन्द्रसेनं समामन्त्र्य प्रतिजग्मुर्यथागतम्

श्रीकरोऽपि महातेजा उपदिष्टोहनूमता । ब्राह्मणैः सहधर्मज्ञश्चक्रेशम्भोः समर्हणम्
कालेनश्रीकरः सोऽपि चन्द्रसेनश्च भूपतिः । समाराध्य शिवंभक्त्याप्रापतुःपरमंपदम्

इदं रहस्यं परमं पवित्रं यशस्करं पुण्यमहर्द्धिवर्धनम् ।
आख्यानमाख्यातमघौघनाशनं गौरीशपादाम्बुजभक्तिवर्धनम् ॥ ८२ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मोत्तरखण्डे गोपकुमारचरितवर्णनंनाम पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

प्रदोषव्रतमाहात्म्यवर्णनम्

ऋषय ऊचुः

यदुक्तं भवता सूत ! महदाख्यानमद्भुतम् । शम्भोर्माहात्म्यकथनमशेषाघहरं परम् ॥

भूयोऽपि श्रोतुमिच्छामस्तदेव सुसमाहिताः ।
प्रदोषे भगवाञ्छम्भुः पूजितस्तु महात्मभिः ॥ २ ॥

सम्प्रयच्छति कां सिद्धिमेतन्नोब्रूहि सुव्रत !। श्रुतमप्यसकृत्सूत! भूयस्तृष्णाप्रवर्धते

सूत उवाच

साधुपृष्टं महाप्राज्ञा भवद्भिर्लोकविश्रुतैः ! अतोऽहं सम्प्रवक्ष्यामि शिवपूजाफलंमहत्

त्रयोदश्यां तिथौ सायं प्रदोषः परिकीर्त्तितः ।
तत्र पूज्यो महादेवो नाऽन्यो देवः फलार्थिभिः ॥ ५ ॥

प्रदोषपूजामाहात्म्यंकोनुवर्णयितुंक्षमः । यत्रसर्वेऽपिविबुधास्तिष्ठन्तिगिरिशान्तिके
प्रदोषसमयेदेवः कैलासेरजतालये । करोतिनृत्यं विबुधैरभिष्टुतगुणोदयः ॥ ७ ॥

अतः पूजा जपोहोमस्तत्कथास्तद्गुणस्तवः ।
कर्त्तव्यो नियतं मर्त्यैश्चतुर्वर्गफलार्थिभिः ॥ ८ ॥

दारिद्र्यतिमिरान्धानां मर्त्यानांभवभीरुणाम् ।भवसागरमग्नानांप्लवोऽयंपारदर्शनः

दुःखशोकभयार्त्तानां क्लेशनिर्वाणमिच्छताम् ।
प्रदोषे पार्वतीशस्य पूजनं मङ्गलायनम् ॥ १० ॥

दुर्बुद्धिरपि नीचोऽपि मन्दभाग्यःशठोऽपिवा । प्रदोषेपूज्यदेवेशंविपद्भ्यःसप्रमुच्यते

शत्रुभिर्हन्यमानोऽपि दश्यमानोपि पन्नगैः ।
शैलैराकम्यमाणोऽपि पतितोऽपि महाम्बुधौ ॥ १२ ॥
आविद्धकालदण्डोऽपि नानारोगहतोऽपि वा ।
न विनश्यति मर्त्योऽसौ प्रदोषे गिरिशार्चनात् ॥ १३ ॥

दारिद्र्यं मरणं दुःखमृणभारं नगोपमम् । सद्यो विधूयसंपद्भिःपूज्यते शिवपूजनात्
अत्रवक्ष्ये महापुण्यमितिहासं पुरातनम् । यं श्रुत्वामनुजाःसर्वेप्रयान्तिकृतकृत्यताम्
आसीद्विदर्भविषये नाम्ना सत्यरथोनृपः । सर्वधर्मरतो धीरः सुशीलः सत्यसङ्गरः
तस्य पालयतो भूमिं धर्मेण मुनिपुङ्गवाः । व्यतीयाय महान्कालःसुखेनैवमहामतेः
अथ तस्यमहीभर्तुर्बभूवुःशाल्वभूभुजः । शत्रवश्चोद्धतबलादुर्मर्षणपुरोगमाः ॥ १८॥

कदाचिदथ ते शाल्वाः सन्नद्धबहुसैनिकाः ।
विदर्भनगरीं प्राप्य रुरुधुर्विजिगीषवः ॥ १६ ॥
दृष्ट्वा निरुद्ध्यमानां तां विदर्भाधिपतिः पुरीम् ।
योद्धुमभ्याययौ तूर्णं बलेन महता वृतः ॥ २० ॥

तस्य तैरभवद्युद्धंशाल्वैरपिबलोद्धतैः । पाताले पन्नगेन्द्रस्य गन्धर्वैरिव दुर्मदैः ॥२१॥
विदर्भनृपतिः सोऽथकृत्वा युद्धं सुदारुणम् । प्रनष्टोरुबलैः शाल्वैर्निहतो रणमूर्धनि
तस्मिन्महारथे वीरे निहते मन्त्रिभिः सह । दुद्रुवुः समरे भग्ना हतशेषाश्चसैनिकाः
अथ युद्धेऽभिविरते नदत्सु रिपुमन्त्रिषु । नगर्यांयुद्ध्यमानायां जाते कोलाहले रवे

तस्य सत्यरथस्यैका विदर्भाधिपतेः सती ।
भूरिशोकसमाविष्टा कच्चिद्यत्नाद्विनिर्ययौ ॥ २५ ॥

सा निशासमये यत्नादन्तर्वत्नी नृपाङ्गना । निर्गता शोकसंतप्ताप्रतीचीं प्रययौदिशम्

अथ प्रभाते मार्गेण गच्छन्ती शनकैः सती । अतीत्य दूरमध्वानं ददर्श विमलं सरः

तत्राऽऽगत्य वरारोहा तप्ता तापेन भूयसा ।
विलसन्तं सरस्तीरे छायावृक्षं समाश्रयत् ॥ २८॥

तत्र दैववशाद्राज्ञी विजनेतरुकुट्टिमे । असूत तनयं साध्वीमूहूर्त्तेसद्गुणान्विते ॥ २६
अथ साराजमहिषीपिपासाभिहताभृशम् । सरोऽवतीर्णाचार्वङ्गीग्रस्ताग्राहेणभूयसा

जातमात्रः कुमारोऽपि विनष्टपितृमातृकः ।
रुरोदोच्चैः सरस्तीरे क्षुत्पिपासार्दितोऽबलः ॥ ३१ ॥

तस्मिन्नेवं क्रन्दमाने जातमात्रेकुमारके । काचिदभ्याययौशीघ्रं दिष्ट्याविप्रवराङ्गना

साप्येकहायनं बालमुद्वहन्ती निजात्मजम् ।
अधना भर्तृरहिता याचमाना गृहेगृहे ॥ ३३ ॥

एकात्मजाबन्धुहीनायाच्ञामार्गवशंगता । उमानाम द्विजसती ददर्श नृपनन्दनम् ॥
सा दृष्ट्वा राजतनयंसूर्यबिम्बमिव च्युतम् । अनाथमेनं क्रन्दन्तंचिन्तयामास भूरिशः
अहो सुमहदाश्चर्यमिदं दृष्टं मयाऽधुना । अच्छिन्ननाभिसूत्रोऽयंशिशुर्माता क्व वागता

पिता नास्ति न चान्योस्ति नास्ति बन्धुजनोऽपि वा ।
अनाथः कृपणो बालः शेते केवलभूतले ॥ ३७ ॥
एष चाण्डालजो वाऽपि शूद्रजो वैश्यजोपि वा ।
विप्रात्मजो वा नृपजो ज्ञायते कथमर्भकः ॥ ३८ ॥

शिशुमेनंसमुद्धृत्यपुष्णाम्यौरसवद्ध्रुवम् । किं त्वविज्ञातकुलजंनोत्सहेस्प्रष्टुमुत्तमम्

इति मीमांसमानायां तस्यां विप्रवरस्त्रियाम् ॥ ४० ॥
कश्चित्समाययौ भिक्षुः साक्षाद् देवः शिवः स्वयम् ।
तामाह भिक्षुवर्योऽथ विप्रभामिनि ! मा खिद ॥ ४१ ॥

रक्षैनं बालकं सुभ्रूर्विसृज्य हृदि संशयम् । अनेन परमं श्रेयः प्राप्स्यसे ह्यचिरादिह

एतावदुक्त्वा त्वरितो भिक्षुः कारुणिको ययौ ।
अथ तस्मिन्गते भिक्षौ विश्रब्धा विप्रभामिनी ॥ ४३ ॥

तमर्भकं समादाय निजमेव गृहं ययौ । भिक्षुवाक्येन विश्रब्धा सा राजतनयं सती
आत्मपुत्रेण सदृशं कृपया पर्यपोषयत् । एकचक्राह्वये रम्येग्रामे कृतनिकेतना ॥ ४५ ॥
स्वपुत्रं राजपुत्रंचभिक्षान्नेनव्यवर्धयत् । ब्राह्मणीतनयश्चैव सराजतनयस्तथा ॥ ४६॥
ब्राह्मणैः कृतसंस्कारौ ववृधातेसुपूजितौ । कृतोपनयनौकालेबालकौनियमेस्थितौ

भिक्षार्थं चेरतुस्तत्र मात्रासह दिने दिने ।
ताभ्यां कदाचिद् बालाभ्यां सा विप्रवनिता सह ॥ ४८ ॥

भैक्ष्यं चरन्ती दैवेन प्रविष्टा देवतालयम् । तत्रवृद्धैः समाकीर्णे मुनिभिर्देवतालये ॥

तौ दृष्ट्वा बालकौ धीमाञ्छाण्डिल्यो मुनिरब्रवीत् ।
अहो दैवबलं चित्रमहो कर्म दुरत्ययम् ॥ ५० ॥

एषबालोऽन्यजननीं श्रितोभैक्ष्येण जीवति । इमामेव द्विजवधूं प्राप्यमातरमुत्तमाम्
सहैवद्विजपुत्रेण द्विजभावंसमाश्रितः । इतिश्रुत्वामुनेर्वाक्यंशाण्डिल्यस्यद्विजाङ्गना

सा प्रणम्य सभामध्ये पर्यपृच्छत्सविस्मया ।
ब्रह्मन्नेषोऽर्भको नीतो मया भिक्षोर्गिरा गृहम् ॥ ५३ ॥

अविज्ञातकुलोद्यापिसुतवत्परिपोष्यते । कस्मिन्कुलेप्रसूतोऽयंकामाताजनकोस्यकः

सर्वं विज्ञातुमिच्छामि भवतो ज्ञानचक्षुषः ॥ ५५ ॥
इति पृष्टो मुनिः सोऽथ ज्ञानदृष्टिर्द्विजस्त्रिया ।
आचख्यौ तस्य बालस्य जन्मकर्म च पौर्विकम् ॥ ५६ ॥

विदर्भराजपुत्रस्तु तत्पितुः समरे मृतिम् । तन्मातुर्नक्रहरणं साकल्येन न्यवेदयत् ॥

अथ सा विस्मिता नारी पुनः प्रपच्छ तं मुनिम् ।
स राजा सकलान्भोगान्हित्वा युद्धे कथं मृतः ॥ ५८ ॥

दारिद्र्यमस्य बालस्य कथंप्राप्तंमहामुने !। दारिद्र्यं पुनरुद्धूयकथंराज्यमवाप्स्यति
अस्यापि ममपुत्रस्य भिक्षान्नेनैवजीवतः । दारिद्र्यशमनोपायमुपदेष्टुं त्वमर्हसि ॥

शाण्डिल्य उवाच

अमुष्य बालस्यपिता स विदर्भमहीपतिः । पूर्वजन्मनिपाण्ड्येशो बभूव नृपसत्तमः

स राजा सर्वधर्मज्ञःपालयन्सकलां महीम् । प्रदोषसमये शम्भुं कदाचित्प्रत्यपूजयत्
तस्य पूजयतो भक्त्या देवं त्रिभुवनेश्वरम् । आसीत्कलकलारावः सर्वत्रनगरे महान्
श्रुत्वा तमुत्कटं शब्दं राजा त्यक्तशिवार्चनः । निर्ययौ राजभवनान्नगरक्षोभशङ्कया ॥
एतस्मिन्नेव समयेतस्यामात्योमहाबलः । शत्रुं गृहीत्वासामन्तंराजान्तिकमुपागमत्
अमात्येन समानीतं शत्रुं सामन्तमुद्धतम् । दृष्ट्वा क्रोधेननृपतिः शिरश्च्छेदमकारयत्
सतथैव महीपालो विसृज्य शिवपूजनम् । असमाप्तात्मनियमश्चकार निशिभोजनम्
तत्पुत्रोपि तथाचक्रे प्रदोषसमये शिवम् । अनर्चयित्वा मूढात्माभुक्त्वा सुष्वापदुर्मदः
जन्मान्तरे स नृपतिर्विदर्भक्षितिपोऽभवत् । शिवार्चनान्तरायेण परैर्भोगान्तरे हतः

तत्पुत्रो यः पूर्वभवे सोऽस्मिञ्जन्मनि तत्सुतः ।
भूत्वा दारिद्र्यमापन्नः शिवपूजाव्यतिक्रमात् ॥ ७० ॥

अस्य माता पूर्वभवे सपत्नीं छद्मनाऽहनत् । तेन पापेनमहता ग्राहेणास्मिन्भवे हता
एषा प्रवृत्तिरेतेषां भवत्यै समुदाहृता । अनर्चितशिवा मर्त्याः प्राप्नुवन्तिदरिद्रताम्

सत्यं ब्रवीमि परलोकहितं ब्रवीमि सारं ब्रवीम्युपनिषद्धृदयं ब्रवीमि ।
संसारमुल्बणमसारमवाप्य जन्तोः सारोऽयमीश्वरपदाम्बुरुहस्य सेवा ॥ ७३ ॥
ये नाऽर्चयन्ति गिरिशं समये प्रदोषे ये नाऽर्चितं शिवमपि प्रणमन्ति चान्ये ।
एतत्कथां श्रुतिपुटैर्न पिबन्ति मूढास्ते जन्मजन्मसु भवन्ति नरा दरिद्राः ॥ ७४॥
ये वै प्रदोषसमये परमेश्वरस्य कुर्वन्त्यनन्यमनसोऽङ्घ्रिसरोजपूजाम् ।
नित्यं प्रवृद्धधनधान्यकलत्रपुत्रसौभाग्यसम्पदधिकास्त इहैव लोके ॥ ७५ ॥
कैलासशैलभवने त्रिजगज्जनित्रीं गौरीं निवेश्य कनकाञ्चितरत्नपीठे ।
नृत्यं विधातुमभिवाञ्छति शूलपाणौ देवाः प्रदोषसमयेऽनुभजन्ति सर्वे ॥ ७६

वाग्देवी धृतवल्लकी शतमखो वेणुं दधत्पद्मज,
स्तालोन्निद्रकरो रमा भगवती गेयप्रयोगान्विता ।
विष्णुः सान्द्रमृदङ्गवादनपटुर्देवाः समन्तात्स्थिताः ,
सेवन्ते तमनु प्रदोषसमये देवं मृडानीपतिम् ॥ ७७ ॥

गन्धर्वयक्षपतगोरगसिद्धसाध्या विद्याधरामरवराप्सरसां गणाश्च ।
येऽन्ये त्रिलोकनिलयाः सह भूतवर्गाः प्राप्तेप्रदोषसमये हरपार्श्वसंस्थाः ॥ ७८ ॥
अतः प्रदोषे शिव एक एव पूज्योऽथ नान्ये हरिपद्मजाद्याः ।
तस्मिन्महेशे विधिनेज्यमाने सर्वे प्रसीदन्ति सुराधिनाथाः ॥ ७६ ॥
एष ते तनयः पूर्वजन्मनिब्राह्मणोत्तमः । प्रतिग्रहैर्वयो निन्ये न यज्ञाद्यैः सुकर्मभिः ॥
अतो दारिद्र्यमापन्नः पुत्रस्ते द्विजभामिनि ! तद्दोषपरिहारार्थं शरणं यातुशङ्करम् ॥
इति श्रीस्कान्दे माहापुराणएकाशीतिसाहस्र्यां संहितायांतृतीये ब्रह्मोत्तरखण्डे
प्रदोषव्रतमाहात्म्यवर्णनंनाम षष्ठोऽध्यायः ॥ ॥ ६ ॥

सप्तमोऽध्यायः

प्रदोषमहिमवर्णनम्

सूत उवाच

इत्युक्ता मुनिना साध्वी सा विप्रवनिता पुनः ।
तं प्रणम्याऽथ पप्रच्छ शिवपूजाविधेः क्रमम् ॥ १ ॥

शण्डिल्य उवाच

पक्षद्वये त्रयोदश्यां निराहारो भवेद्यदा । घटीत्रयादस्तमयात्पूर्वं स्नानं समाचरेत्
शुक्लाम्बरधरोधीरोवाग्यतोनियमान्वितः । कृतसन्ध्याजपविधिःशिवपूजांसमारभेत्
देवस्य पुरतःसम्यगुपलिप्य नवाम्भसा । विधाय मण्डलं रम्यं धौतवस्त्रादिभिर्बुधः
वितानाद्यैरलंकृत्य फलपुष्पनवाङ्कुरैः । विचित्रपद्ममुद्धृत्य वर्णपञ्चकसंयुतम् ॥
तत्रोपविश्य सुशुभे भक्तियुक्तःस्थिरासने । सम्यक्संपादिताशेषपूजोपकरणः शुचिः
आगमोक्तेनमन्त्रेणपीठमामन्त्रयेत्सुधीः । ततःकृत्वात्मशुद्धिंचभूतशुद्ध्यादिकंक्रमात्
प्राणायामत्रयं कृत्वा बीजवर्णैः सबिन्दुकैः ।

मातृका न्यस्य विधिवद्ध्यात्वा तां देवतां पराम् ॥ ८ ॥
समाप्य मातृका भूयो ध्यात्वा चैव परं शिवम् ।
वामभागे गुरुं नत्वा दक्षिणे गणपं नमेत् ॥ ६ ॥
अंसोरुयुग्मे धर्मादीन्न्यस्य नाभौ च पार्श्वयोः ।
अधर्मादीननन्तादीन्हृदि पीठे मनुं न्यसेत् ॥ १० ॥
आधारशक्तिमारभ्य ज्ञानात्मानमनुक्रमात् । उक्तक्रमेण विन्यस्य हृत्पद्मे साधुभाविते
नवशक्तिमये रम्ये ध्यायेद्देवमुमापतिम् । चन्द्रकोटिप्रतीकाशं त्रिनेत्रं चन्द्रशेखरम्
आपिङ्गलजटाजूटं रत्नमौलिविराजितम् । नीलग्रीवमुदाराङ्गं नागहारोपशोभितम्
वरदाभयहस्तं च धारिणं च परश्वधम् । दधानं नागवलयकेयूराङ्गदमुद्रिकम् ॥
व्याघ्रचर्मपरीधानंरत्नसिंहासनेस्थितम् । ध्यात्वातद्वामभागेचचिन्तयेद्गिरिकन्यकाम्
भास्वज्जपाप्रसूनाभामुदयार्कसमप्रभाम् । विद्युत्पुञ्जनिभां तन्वीं मनोनयननन्दिनीम्
बालेन्दुशेखरां स्निग्धां नीलकुञ्चितकुन्तलाम् ।
भृङ्गसङ्घातरुचिरां नीलालकविराजिताम् ॥ १७ ॥
मणिकुण्डलविद्योतन्मुखमण्डलविभ्रमाम् । नवकुङ्कुमपङ्काङ्ककपोलदलदर्पणाम् ॥ १८
मधुरस्मितविभ्राजदरुणाधरपल्लवाम् । कम्बुकण्ठीं शिवामुद्यत्कुचपङ्कजकुड्मलाम्
पाशाङ्कुशाभयाभीष्टविलसत्सुचतुर्भुजाम् । अनेकरत्नविलसत्कङ्कणाङ्कितमुद्रिकाम्
वलित्रयेण विलसद्धेमकाञ्ची गुणान्विताम् ।
रक्तमाल्याम्बरधरां दिव्यचन्दनचर्चिताम् ॥ २१ ॥
दिक्पालवनितामौलिसन्नताङ्घ्रिसरोरुहाम् । रत्नसिंहासनारूढां सर्पराजपरिच्छदाम्
एवं ध्यात्वा महादेवं देवीं च गिरिकन्यकाम् ।
न्यासक्रमेण सम्पूज्य देवं गन्धादिभिः क्रमात् ॥ २३ ॥
पञ्चभिर्ब्रह्मभिः कुर्यात्प्रोक्तस्थानेषुवा हृदि । पृथक्पुष्पाञ्जलिंदेहेमूलेन च हृदित्रिधा
पुनः स्वयंशिवो भूत्वामूलमन्त्रेणसाधकः । ततः सम्पूजयेद्देवंबाह्यपीठेपुनः क्रमात्
सङ्कल्पंप्रवदेत्तत्रपूजारम्भेसमाहितः । कृताञ्जलिपुटोभूत्वाचिंतयेद्धृदिशङ्करम् ॥ २६ ॥

ऋणपातकदौर्भाग्यदारिद्र्यविनिवृत्तये । अशेषाघविनाशाय प्रसीद ममशङ्कर !॥२७॥
दुःखशोकाग्निसंतप्तं संसारभयपीडितम् । बहुरोगाकुलं दीनं त्राहि मां वृषवाहन
आगच्छ देवदेवेश महादेवाभयङ्कर । गृहाण सह पार्वत्या तव पूजां मया कृताम्
इति सङ्कल्प्य विधिवद्बाह्यपूजांसमाचरेत् । गुरुं गणपतिंचैवयजेत्सव्यापसव्ययोः
क्षेत्रेशमीशकोणे तु यजेद्वास्तोष्पतिंक्रमात् । वाग्देवींचयजेत्तत्रततःकात्यायनींयजेत्

धर्मं ज्ञानं च वैराग्यमैश्वर्यं च नमोऽन्तकैः ।
स्वरैरीशादिकोणेषु पीठपादाननुक्रमात् ।
आभ्यां बिन्दुविसर्गाभ्यामधर्मादीन्प्रपूजयेत् ॥ ३२ ॥
सत्त्वरूपैश्चतुर्दिक्षुमध्येऽनन्तं सतारकम् ।
सत्त्वादींस्त्रिगुणांस्तन्तुरूपान्पीठेषु विन्यसेत् ॥ ३३ ॥
अत ऊर्ध्वच्छदे मायां सह लक्ष्म्या शिवेन च ॥ ३४ ॥

तदन्ते चाम्बुजं भूयः सकलं मण्डलत्रयम् । पत्रकेसरकिञ्जल्कव्याप्तंताराक्षरैःक्रमात्
पद्मत्रयं तथाभ्यर्च्यमध्येमण्डलमादरात् । वामांज्येष्ठांचरौद्रींचभागाद्यैर्दिक्षु पूजयेत्
वामाद्या नव शक्तीश्च नवस्वरयुता यजेत् । हृदि बीजत्रयाद्येन पीठमन्त्रेणचार्चयेत्

आवृत्तैः प्रथमाङ्गैश्च पञ्चभिर्मूर्त्तिशक्तिभिः ।
त्रिशक्तिमूर्त्तिभिश्चान्यैर्निधिद्वयसमन्वितैः ॥ ३८ ॥
अनन्ताद्यैः परीताश्च मातृभिश्च वृषादिभिः ।
सिद्धिभिश्चाणिमाद्याभिरिन्द्राद्यैश्च सहायुधैः ॥ ३९ ॥

वृषभक्षेत्रचण्डेशदुर्गाश्च स्कन्दनन्दिनौ । गणेशः सैन्यपश्चैवस्वस्वलक्षणलक्षिताः
अणिमा महिमा चैव गरिमा लघिमातथा । ईशित्वंचवशित्वंचप्राप्तिःप्राकाम्यमेवच

अष्टैश्वर्याणि चोक्तानि तेजोरूपाणिकेवलम् ।
पञ्चभिर्ब्रह्मभिः पूर्वं हृल्लेखाद्यादिभिः क्रमात् ॥ ४२ ॥

अङ्गैरुमाद्यैरिन्द्राद्यैः पूजोक्ता मुनिभिस्तुतैः । उमाचण्डेश्वरादींश्च पूजयेदुत्तरादितः
एवमावरणैर्युक्तं तेजोरूपं सदाशिवम् । उमयासहितं देवमुपचारैःप्रपूजयेत् ॥ ४४॥

सुप्रतिष्ठितशङ्खस्य तीर्थैः पञ्चामृतैरपि । अभिषिच्य महादेवं रुद्रसूक्तैः समाहितः
कल्पयेद्विविधैर्मन्त्रैरासनाद्युपचारकान् । आसनं कल्पयेद्धैमं दिव्यवस्त्रसमन्वितम्
अर्घ्यमष्टगुणोपेतं पाद्यं शुद्धोदकेन च । तेनैवाचमनं दद्यान्मधुपर्कंमधूत्तरम् ॥ ४७ ॥
पुनराचमनं दत्त्वा स्नानं मन्त्रैः प्रकल्पयेत् । उपवीतंतथा वासो भूषणानि निवेदयेत्

गन्धमष्टाङ्गसंयुक्तं सुपूतं विनिवेदयेत् ॥ ४८ ॥

ततश्च बिल्वमंदारकल्हारसरसीरुहम् । धत्तूरकं कर्णिकारं शणपुष्पं च मल्लिकाम्

कुशापामार्गतुलसीमाधवीचम्पकादिकम् ।
बृहतीकरवीराणि यथालब्धानि साधकः ॥ ५० ॥

निवेदयेत्सुगन्धीनि माल्यानिविविधानिच । धूपंकालागरूत्पन्नं दीपंचविमलंशुभम्

विशेषकम्

अथपायसनैवेद्यं सघृतं सोपदंशकम् । मोदकापूपसंयुक्तं शर्करागुडसंयुतम् ॥ ५२
मधुनाक्तं दधियुतं जलपानसमन्वितम् । तेनैव हविषा वह्नौ जुहुयान्मन्त्रभाविते
आगमोक्तेनविधिनागुरुवाक्यनियन्त्रितः । नैवेद्यं शम्भवेभूयो दत्त्वाताम्बूलमुत्तमम्
धूपं नीराजनं रम्यं छत्रं दर्पणमुत्तमम् । समर्पयित्वा विधिवन्मन्त्रैर्वैदिकतान्त्रिकैः
यद्यशक्तःस्वयंनिःस्वोयथाविभवमर्चयेत् । भक्त्यादत्तेन गौरीशः पुष्पमात्रेणतुष्यति

अथाङ्गभूतान्सकलान्गणेशादीन्प्रपूजयेत् ।
स्तवैर्नानाविधैः स्तुत्वा साष्टाङ्गं प्रणमेद् बुधः ॥ ५७ ॥

ततःप्रदक्षिणीकृत्यवृषचण्डेश्वरादिकान् । पूजांसमर्प्यविधिवत्प्रार्थयेद्गिरिजापतिम्
जय देव! जगन्नाथ जयशङ्कर! शाश्वत । जयसर्वसुराध्यक्ष! जयसर्वसुरार्चित !॥५९॥
जय सर्वगुणातीत! जय सर्ववरप्रद !। जय नित्यनिराधार!जयविश्वम्भराव्यय !॥६०
जय विश्वैकवेद्येश!जयनागेन्द्रभूषण !। जय गौरीपते! शम्भो! जयचन्द्रार्धशेखर ॥६१

जय कोट्यर्कसंकाश! जयाऽनन्तगुणाश्रय !॥ ६२ ॥
जय रुद्र! विरूपाक्ष! जयाऽचिन्त्य! निरञ्जन !।

जयनाथकृपासिन्धोजयभक्तार्तिभञ्जन !। जयदुस्तरसंसारसागरोत्तारण!प्रभो !॥ ६३

प्रसीद मेमहादेव ! संसारार्त्तस्य खिद्यतः । सर्वपापभयं हृत्वा रक्ष मां परमेश्वर
महादारिद्र्यमग्नस्यमहापापहतस्य च । महाशोकविनष्टस्यमहारोगातुरस्य च ॥६५ ॥
ऋणभारपरीतस्यदह्यमानस्यकर्मभिः । ग्रहैःप्रपीडयमानस्यप्रसीदमम शङ्कर !॥ ६६
दरिद्रः प्रार्थयेदेवंपूजान्तेगिरिजापतिम् । अर्थाढ्योवापिराजावाप्रार्थयेद्देवमीश्वरम्
दीर्घमायुः सदारोग्यं कोशवृद्धिर्बलोन्नतिः । ममास्तुनित्यमानन्दः प्रसादात्तव शङ्कर
शत्रवः संक्षयं यान्तु प्रसीदन्तुमम ग्रहाः । नश्यन्तु दस्यवोराष्ट्रे जनाः सन्तुनिरापदः
दुर्भिक्षमारीसन्तापाः शमंयान्तु महीतले । सर्वसस्यसमृद्धिश्च भूयात्सुखमया दिशः

एवमाराधयेद् देवं प्रदोषे गिरिजापतिम् ।
ब्राह्मणान्भोजयेत्पश्चाद् दक्षिणाभिश्च तोषयेत् ॥ ७१ ॥

सर्वपापक्षयकरी सर्वदारिद्र्यनाशिनी । शिवपूजा मया ख्याता सर्वाभीष्टवरप्रदा
महापातकसङ्घातमधिकं चोपपातकम् । शिवद्रव्यापहरणादन्यत्सर्वं निवारयेत् ॥
ब्रह्महत्यादिपापानां पुराणेषुस्मृतिष्वपि । प्रायश्चित्तानिदृष्टानिनशिवद्रव्यहारिणाम्
बहुनाऽत्र किमुक्तेन श्लोकार्द्धेन ब्रवीम्यहम् । ब्रह्महत्याशतं वापिशिवपूजाविनाशयेत्
मया कथितमेतत्ते प्रदोषे शिवपूजनम् । रहस्यं सर्वजन्तूनामत्र नास्त्येव संशयः ॥

एताभ्यामपि बालाभ्यामेवं पूजा विधीयताम् ।
अतः सम्वत्सरादेव परां सिद्धिमवाप्स्यथ ॥ ७७ ॥
इति शाण्डिल्यवचनमाकर्ण्य द्विजभामिनी ।
ताभ्यां तु सह बालाभ्यां प्रणनाम मुनेः पदम् ॥ ७८ ॥

विप्रस्त्र्युवाच

अहमद्य कृतार्थास्मि तव दर्शनमात्रतः । एतौ कुमारौ भगवंस्त्वामेव शरणङ्गतौ ॥
एष मे तनयो ब्रह्मञ्छुचिव्रत इतीरितः । एव राजसुतो नाम्ना धर्मगुप्तः कृतो मया ॥
एतावहञ्च भगवन्भवच्चरणकिङ्कराः । समुद्धराऽस्मिन्पतितान्घोरे दारिद्र्यसागरे ॥

इति प्रपन्नां शरणं द्विजाङ्गनामाश्वास्य वाक्यैरमृतोपमानैः ।
उपादिदेशाऽथ तयोः कुमारयोर्मुनिः शिवाराधनमन्त्रविद्याम् ॥ ८२ ॥

अथोपदिष्टौ मुनिना कुमारौ ब्राह्मणी च सा ।
तं प्रणम्य समामन्त्र्य जग्मुस्ते शिवमन्दिरात् ॥ ८३ ॥

ततः प्रभृति तौबालौ मुनिवर्योपदेशतः । प्रदोषे पार्वतीशस्य पूजांचक्रतुरञ्जसा॥८४
एवं पूजयतोर्देवं द्विजराजकुमारयोः । सुखेनैव व्यतीयाय तयोर्मासचतुष्टयम् ॥८५॥
कदाचिद्राजपुत्रेण विनाऽसौ द्विजनन्दनः । स्नातुं गतो नदीतीरे चचारबहुलीलया
तत्र निर्झरनिर्घातनिर्भिन्ने विप्रकुट्टिमे । निधानकलशं स्थूलं प्रस्फुरन्तं ददर्श ह ॥
तं दृष्ट्वा सहसागत्य हर्षकौतुकविह्वलः । दैवोपपन्नं मन्वानो गृहीत्वा शिरसा ययौ
ससंभ्रमं समानीय निधानकलशं बलात् । निधाय भवनस्यान्ते मातरं समभाषत
मातर्मातरिमं पश्य प्रसादं गिरिजापतेः । निधानं कुम्भरूपेण दर्शितं करुणात्मना

अथ सा विस्मिता साध्वी समाहूय नृपात्मजम् ।
स्वपुत्रं प्रतिनन्द्याह मानयन्ती शिवार्चनम् ॥ ९१ ॥

शृणुतां मे वचःपुत्रौनिधानकलशीमिमाम् । समं विभज्यगृह्णीतंमम शासनगौरवात्
इति मातुर्वचः श्रुत्वा तुतोषद्विजनन्दनः । प्रत्याह राजपुत्रस्तां विस्रब्धः शङ्करार्चने
मातस्तव सुतस्यैव सुकृतेन समागतम् । नाऽहं ग्रहीतुमिच्छामिविभक्तंधनसञ्चयम्
आत्मनः सुकृताल्लब्धंस्वयमेवभुनक्त्वसौ । स एव भगवानीशः करिष्यतिकृपांमयि
एवमर्चयतोः शम्भुं भूयोऽपि परयामुदा । सम्वत्सरोव्यतीयायतस्मिन्नेव गृहेतयोः
अथैकदा राजसूनुः सह तेन द्विजन्मना । वसन्तसमये प्राप्ते विजहार वनान्तरे ॥९७
अथ दूरंगतौक्वापिवने द्विजनृपात्मजौ । गन्धर्वकन्याःक्रीडन्तीशतशस्तावपश्यताम्
ताः सर्वाश्चारुसर्वाङ्ग्योविहरन्त्योमनोहरम् । दृष्ट्वाद्विजात्मजोदूरादुवाचनृपनन्दनम्
इतःपुरोनगन्तव्यंविहरन्त्यग्रतःस्त्रियः । स्त्रीसन्निधानंविबुधास्त्यजन्तिविमलाशयाः
एताः कैतवकारिण्यो घनयौवनदुर्मदा । मोहयन्त्यो जनं दृष्ट्वा वाचानुनयकोविदाः

अतः परित्यजेत्स्त्रीणां सन्निधिं सहभाषणम् ।
निजधर्मरतो विद्वन्ब्रह्मचारी विशेषतः ॥ १०२ ॥
अतोऽहं नोत्सहे गन्तुं क्रीडास्थानं मृगीदृशाम् ।

इत्युक्त्वा द्विजपुत्रस्तु निवृत्तो दूरतः स्थितः ॥ १०३ ॥

अथासौ राजपुत्रस्तु कौतुकाविष्टमानसः । तासां विहारपदवीमेक एवाभयो ययौ
तत्र गन्धर्वकन्यानां मध्येत्वेका वरानना । दृष्ट्वाऽऽयान्तंराजपुत्रं चिन्तयामासचेतसा
अहो कोऽयमुदाराङ्गो युवा सर्वाङ्गसुन्दरः । मत्तमातङ्गगमनोलावण्यामृतवारिधिः
लीलालोलविशालाक्षो मधुरस्मितपेशलः । मदनोपमरूपश्रीः सुकुमाराङ्गलक्षणः ॥
इत्याश्चर्ययुताबाला दूराद्दृष्ट्वा नृपात्मजम् । सर्वाःसखीःसमालोक्यवचनंचेदमब्रवीत्
इतो विदूरे हे सख्यो वनमस्त्येकमुत्तमम् । विचित्रचम्पकाशोकपुन्नागबकुलैर्युतम्
तत्र गत्वा वनं सर्वाः सञ्चीयकुसुमोत्करम् । भवत्यःपुनरायान्तुतावत्तिष्ठाम्यहंत्विह

इत्यादिष्टः सखीवर्गो जगाम विपिनान्तरम् ।
साऽपि गन्धर्वजा तस्थौ न्यस्तदृष्टिर्नृपात्मजे ॥ १११ ॥
तां समालोक्य तन्वङ्गीं नवयौवनशालिनीम् ।
बालां स्वरूपसम्पत्या परिभूततिलोत्तमाम् ॥ ११२ ॥

राजपुत्रः समागम्य कौतुकोत्फुल्ललोचनः । अवापदैवयोगेन मदनस्य शरव्यथाम्
गन्धर्वतनया सापि प्राप्ताय नृपसूनवे । उत्थाय तरसा तस्मै प्रददौ पल्लवासनम् ॥
कृतोपचारमासीनं तमासाद्य सुमध्यमा । पप्रच्छ तद्रूपगुणैर्ध्वस्तधैर्याकुलेन्द्रिया ॥
कस्त्वं कमलपत्राक्ष कस्माद्देशादिहागतः । कस्य पुत्र इति प्रेम्णापृष्टःसर्वंन्यवेदयत्
विदर्भराजतनयं विध्वस्तपितृमातृकम् । शत्रुभिश्च हृतस्थानमात्मानं परराष्ट्रगम्
सर्वमावेद्यभूयस्तांपप्रच्छनृपनन्दनः । कात्वं वामोरु!किंचात्रकार्यं ते कस्यचात्मजा

किमवध्यायसि हृदा किं वा वक्तुमिहेच्छसि ।
इत्युक्ता सा पुनः प्राह शृणु राजेन्द्रसत्तम !॥ ११६ ॥
अस्त्येको द्रविको नाम गन्धर्वाणां कुलाग्रीः ।
तस्याऽहमस्मि तनया नाम्ना चांशुमती स्मृता ॥ १२० ॥
त्वामायान्तं विलोक्याऽहं त्वत्सम्भाषणलालसा ।
त्यक्त्वा सखीजनं सर्वमेकैवाऽस्मि महामते !॥ १२१ ॥

सर्वसङ्गीतविद्यासुनमत्तोऽन्यास्तिकाचन । ममयोगेनतुष्यन्तिसर्वाअपिसुरस्त्रियः
साहं सर्वकलाभिज्ञा ज्ञातसर्वजनेङ्गिता । तवाहमीप्सितं वेद्मि मयि ते सङ्गतं मनः

तथा ममाऽपि चौत्सुक्यं दैवेन:प्रतिपादितम् ।
आवयोः स्नेहभेदोऽत्र नाभिभूयादितः परम् ॥ १२४ ॥

इतिसम्भाष्यतेनाशु प्रेम्णा गन्धर्वनन्दिनी । मुक्ताहारंददौतस्मैस्वकुचान्तरभूषणम्
तमादायाद्भुतं हारं स तस्याः प्रणयाकुलः । गाढहर्षभरोत्सिक्तामिदमाह नृपात्मजः

सत्यमुक्तं त्वया भीरु! तथाप्येकं वदाम्यहम् ।
त्यक्तराजस्य निःस्वस्यकथं मे भवसिप्रिया ॥ १२७ ॥
सा त्वं पितृमती बाला विलङ्घ्य पितृशासनम् ।
स्वच्छन्दाचरणं कर्तुं मूढेव कथमर्हसि ॥ १२८ ॥
इति तस्य वचः श्रुत्वा तं प्रत्याह शुचिस्मिता ।
अस्तु नाम तथैवाऽहं करिष्ये पश्य कौतुकम् ॥ १२६ ॥

गच्छ स्वभवनंकान्तपरश्वः प्रातरेव तु । आगच्छ पुनरत्रैव कार्यमस्ति च नो मृषा
इत्युक्त्वा तं नृपसुतं सा सङ्गतसखीजना । अपाक्रामतचार्वङ्गी स चापि नृपनन्दनः
स समभ्येत्यहर्षेण द्विजपुत्रस्य सन्निधिम् । सर्वमाख्यायतेनैव सार्द्धंस्वभवनंययौ
तां च विप्रसतीं भूयो हर्षयित्वा नृपात्मजः । परश्वोद्विजपुत्रेण सार्द्धंतेन वनं ययौ
स तयापूर्वनिर्दिष्टंस्थानंप्राप्यनृपात्मजः । गन्धर्वराजमद्राक्षीत्स्वदुहित्रासमन्वितम्
सगन्धर्वपतिः प्राप्तावभिनन्द्य कुमारकौ । उपवेश्यासने रम्ये राजपुत्रमभाषत ॥१३५

गन्धर्व उवाच

राजेन्द्र पुत्र! पूर्वेद्युः कैलासं गतवाहनम् । तत्रापश्यं महादेवं पार्वत्या सहितं प्रभुम्
आहूय मां स देवेशःसर्वेषांत्रिदिवौकसाम् । सन्निधावाहभगवान्करुणामृतवारिधिः
धर्मगुप्ताह्वयः कश्चिद्राजपुत्रोऽस्ति भूतले । अकिञ्चनोभ्रष्टराज्योहृतदेशश्च शत्रुभिः
स बालो गुरुवाक्येन मदर्चायांरतःसदा । अद्यतत्पितरःसर्वे मांप्राप्तास्तत्प्रभावतः
तस्यत्वमपि साहाय्यं कुरुगन्धर्वसत्तम !। अथासौनिजराज्यस्थोहतशत्रुर्भविष्यति

इत्याज्ञप्तो महेशेन सम्प्राप्तोनिजमन्दिरम् । अनयामद्दुहित्राच बहुशोऽभ्यर्थितस्तथा

ज्ञात्वेमं सकलं शम्भोर्नियोगं करुणात्मनः ।
आदायेमां दुहितरं प्राप्तोऽस्मीदं वनान्तरम् ॥ १४२ ॥
अत एनां प्रयच्छामि कन्यामंशुमतीं तव ।
हत्वा शत्रून्स्वराष्ट्रे त्वां स्थापयामि शिवाज्ञया ॥ १४३ ॥
तस्मिन्पुरे त्वमनया भुक्त्वा भोगान्यथेप्सितान् ।
दशवर्षसहस्रान्ते गन्तासि गिरिशालयम् ॥ १४४ ॥

तत्रापि ममकन्येयं त्वामेव प्रतिपत्स्यते । अनेनैव स्वदेहेन दिव्येन शिवसन्निधौ इतिगन्धर्वराजस्तमाभाष्य नृपनन्दनम् । तस्मिन्वने स्वदुहितुः पाणिग्रहमकारयत् पारिबर्हमदात्तस्मै रत्नभारान्महोज्ज्वलान् । चूडामणिचन्द्रनिभंमुक्ताहारांश्चभासुरान्

दिव्यालङ्कारवासांसि कार्त्तस्वरपरिच्छदान् ।
गजानामयुतं भूयो नियुतं नीलवाजिनाम् ॥ १४८ ॥

स्यन्दनानां सहस्राणिसौवर्णानि महान्ति च । पुनरेकंरथंदिव्यंधनुश्चेन्द्रायुधोपमम् अस्त्राणांचसहस्राणितूणीचाक्षय्यसायकौ । अभेद्यंवर्म सौवर्णंशक्तिश्चरिपुमर्दिनीम् दुहितुः परिचर्यार्थं दासीपञ्चसहस्रकम् । ददौ प्रीतमनास्तस्मैधनानिविविधानिच गन्धर्वसैन्यमत्युग्रं चतुरङ्गसमन्वितम् । पुनश्च तत्सहायार्थं गन्धर्वाधिपतिर्ददौ ॥ इत्थं राजेन्द्रतनयः सम्प्राप्तः श्रियमुत्तमाम् । अभीष्टजायासहितो मुमुदे निजसम्पदा कारयित्वा स्वदुहितुर्विवाहंसमयोचितम् । ययौविमानमारुह्यगन्धर्वाधिपतिर्दिवम् धर्मगुप्तः कृतोद्वाहः सह गन्धर्वसेनया । पुनः स्वनगरंप्राप्य जघान रिपुवाहनीम् ॥ दुर्धर्षणं रणे हत्वा शत्तया गन्धर्वसेनया । निःशेषितारातिबलः प्रविवेश निजं पुरम् ततोऽभिषिक्तः सचिवैर्ब्राह्मणैश्च महोत्तमैः । रत्नसिंहासनारूढश्चक्रेराज्यमकण्टकम् या विप्रवनिता पूर्वं तमपुष्णात्स्वपुत्रवत् । सैवमाताऽभवत्तस्य सभ्राताद्विजनन्दनः गन्धर्वतनया जाया विदर्भनगरेश्वरः । आराध्यदेवं गिरिशं धर्मगुप्तो नृपोऽभवत् ॥

एवमन्ये समाराध्य प्रदोषे गिरिजापतिम् ।

लभन्तेऽभीप्सितान्कामान्देहान्ते तु परां गतिम् ॥ १६० ॥

सूत उवाच

एतन्महाव्रतं पुण्यं प्रदोषे शङ्करार्चनम् । धर्मार्थकाममोक्षाणां यदेतत्साधनं परम् य एतच्छृणुयात्पुण्यं माहात्म्यं परमाद्भुतम् । प्रदोषे शिवपूजान्ते कथयेद्वासमाहितः नवेन्नतस्यदारिद्र्यं जन्मान्तरशतेष्वपि । ज्ञानैश्वर्यसमायुक्तः सोऽन्तेशिवपुरंव्रजेत्

ये प्राप्य दुर्लभतरं मनुजाः शरीरं कुर्वन्ति हन्त परमेश्वरपादपूजाम् ।
धन्यास्त एव निजपुण्यजितत्रिलोकास्तेषां पदाम्बुजरजोभुवनं पुनाति ॥१६४

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे प्रदोषमहिमावर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

सोमवारव्रतवर्णनेसीमन्तिनीकथानकवर्णनम्

सूत उवाच

नित्यानन्दमयं शान्तं निर्विकल्पं निरामयम् । शिवतत्त्वमनाद्यन्तंयेविदुस्तेपरंगताः

विरक्ताः कामभोगेभ्यो ये प्रकुर्वन्त्यहैतुकीम् ।
भक्तिं परां शिवे धीरास्तेषां मुक्तिर्न संसृतिः ॥ २ ॥
विषयानभिसन्धाय ये कुर्वन्ति शिवे रतिम् ।
विषयैर्नाऽभिभूयन्ते भुञ्जानास्तत्फलान्यपि ॥ ३ ॥

येन केनापि भावेन शिवभक्तियुतो नरः । न विनश्यतिकालेन सयातिपरमांगतिम् आरुरुक्षुःपरंस्थानंविषयासक्तमानसः । पूजयेत्कर्मणाशम्भुं भोगान्तेशिवमाप्नुयात्

अशक्तः कश्चिदुत्स्रष्टुं प्रायो विषयवासनम् ।
अतः कर्ममयीपूजा कामधेनुः शरीरिणाम् ॥ ६ ॥

मायामयेपिसंसारेयेविहृत्यचिरंसुखम्। मुक्तिमिच्छन्तिदेहान्तेतेषांधर्मोऽयमीरितः
शिवपूजा सदा लोके हेतुःस्वर्गापवर्गयोः। सोमवारे विशेषेण प्रदोषादिगुणान्विते
केवलेनापि ये कुर्युः सोमवारेशिवार्चनम्। न तेषांविद्यते किञ्चिदिहामुत्रचदुर्लभम्

उपोषितः शुचिर्भूत्वा सोमवारे जितेन्द्रियः।
वैदिकैर्लौकिकैर्वापि विधिवत्पूजयेच्छिवम्॥ १०॥

ब्रह्मचारीगृहस्थोवाकन्यावापिसभर्तृका। विभर्तृकावासम्पूज्यलभतेवरमीप्सितम्
अत्राहंकथयिष्यामिकथांश्रोतृमनोहराम्। श्रुत्वामुक्तिप्रयान्त्येवभक्तिर्भवतिशाम्भवी
आर्यावर्तेनृपः कश्चिदासीद्धर्मभृताम्वरः। चित्रवर्मेतिविख्यातो धर्मराजोदुरात्मनाम्

स गोप्ता धर्मसेतूनां शास्ता दुष्पथगामिनाम्।
यष्टा समस्तज्ञानां त्राता शरणमिच्छताम्॥ १४॥

कर्त्ता सकलपुण्यानां दातासकलसम्पदाम्। जेतासपत्नवृन्दानांभक्तःशिवमुकुन्दयोः
सोनुकूलासुपत्नीषुलब्ध्वापुत्रान्महौजसः। चिरेणप्रार्थितांलेभेकन्यामेकांवराननाम्
स लब्ध्वा तनयां दिष्ट्याहिमवानिव पार्वतीम्। आत्मानंदेवसदृशंमेनेपूर्णमनोरथम्

स एकदा जातकलक्षणज्ञानाहूय साधून्द्विजमुख्यवृन्दान्।
कुतूहलेनाऽभिनिविष्टचेता पप्रच्छ कन्याजनने फलानि॥ १८॥

अथ तत्राब्रवीदेको बहुज्ञो द्विजसत्तमः। एषा सीमन्तिनीनाम्नाकन्यातव महीपते!
उमेव माङ्गल्यवती दमयन्तीव रूपिणी। भारतीव कलाभिज्ञा लक्ष्मीरिव महागुणा
सुप्रजा देवमातेव जानकीवधृतव्रता। रविप्रभेव सत्कान्तिश्चन्द्रिकेव मनोरमा॥
दशवर्षसहस्राणि सह भर्त्रा प्रमोदते। प्रसूय तनयानष्टौ परं सुखमवाप्स्यति॥२२

इत्युक्तवन्तं नृपतिर्धनैः सम्पूज्य तं द्विजम्।
अवाप परमां प्रीतिं तद्वागमृतसेवया॥ २३॥

अथान्योऽपि द्विजः प्राह धैर्यवानमितद्युतिः। एषा चतुर्दशे वर्षेवैधव्यंप्रतिपत्स्यति
इत्याकर्ण्य वचस्तस्य वज्रनिर्घातनिष्ठुरम्। मुहूर्तमभवद्राजाचिन्ताव्याकुलमानसः

अथ सर्वान्समुत्सृज्य ब्राह्मणान्ब्रह्मवत्सलः।

सर्वं दैवकृतं मत्वा निश्चिन्तःपार्थिवोऽभवत्॥ २६॥
साऽपि सीमन्तिनी बाला क्रमेण गतशैशवा।
वैधव्यमात्मनो भावि शुश्रावाऽऽत्मसखीमुखात्॥ २७॥

परं निर्वेदमापन्ना चिन्तयामास बालिका। याज्ञवल्क्यमुनेः पत्नीं मैत्रेयींपर्यपृच्छत
मातस्त्वच्चरणाम्भोजंप्रपन्नाऽस्मि भयाकुला। सौभाग्यवर्धनंकर्म मम शंसितुमर्हसि
इति प्रपन्नां नृपतेः कन्यां प्राह मुनेः सती। शरणंव्रजतन्वङ्गिपार्वतीं शिवसंयुताम्
सोमवारेशिवंगौरींपूजयस्वसमाहिता। उपोषिता वा सुस्नाताविरजाम्बरधारिणी

यतवाङ्निश्चलमनाः पूजां कृत्वा यथोचिताम्।
ब्राह्मणान्भोजयित्वाऽथ शिवं सम्यक्प्रसादयत्॥ ३२॥
पापक्षयोऽभिषेकेण साम्राज्यं पीठपूजनात्।
सौभाग्यमखिलंसौख्यं गन्धमाल्याक्षतार्पणात्॥ ३३॥

धूपदानेनसौगन्ध्यं कान्तिर्दीपप्रदानतः। नैवेद्यैश्चमहाभोगो लक्ष्मीस्ताम्बूलदानतः
धर्मार्थकाममोक्षाश्च नमस्कारप्रदानतः। अष्टैश्वर्यादिसिद्धीनां जप एव हि कारणम्
होमेन सर्वकामानां समृद्धिरुपजायते। सर्वेषामेव देवानां तुष्टिर्ब्राह्मणभोजनात्॥
इत्थमाराध्यशिवं सोमवारेशिवामपि। अत्यापदमपि प्राप्ता निस्तीर्णाभिभवाभवेः
घोराद्घोरं प्रपन्नापिमहाक्लेशं भयानकम्। शिवपूजाप्रभावेण तरिष्यसि महद्भयम्

इत्थं सीमन्तिनीं सम्यगनुशास्य पुनः सती।
ययौ सापि वरारोहा राजपुत्री तथाऽकरोत्॥ ३६॥

दमयन्त्यांनलस्यासीदिन्द्रसेनाभिधःसुतः। तस्यचन्द्राङ्गदोनामपुत्रोभूच्चन्द्रसन्निभः
चित्रवर्मानृपश्रेष्ठस्तमाहूयनृपात्मजम्। कन्यांसीमन्तिनीं तस्मैप्रायच्छद्गुर्वनुज्ञया
सोऽभून्महोत्सवस्तत्र तस्या उद्वाहकर्मणि। यत्रसर्वमहीपानां समवायोमहानभूत्
तस्याःपाणिग्रहंकालेकृत्वाचन्द्राङ्गदःकृती। उवासकतिचिन्मासांस्तत्रैवश्वशुरालये
एकदा यमुनां तर्तुं स राजतनयो बली। आरुरोह तरीं कैश्चिद्वयस्यैः सह लीलया
तस्मिंस्तरति कालिन्दींराजपुत्रे विधेर्वशात्। ममज्ज सह कैवर्तैरावर्त्ताभिहता तरी

हा हेतिशब्दः सुमहानासीत्तस्यास्तटद्वये ।
पश्यतां सर्वसैन्यानां प्रलापो दिवमस्पृशत् ॥ ४६ ॥

मज्जन्तो मम्रिरे केचित्केचिद्ग्राहोदरङ्गताः । राजपुत्रादयःकेचिन्नादृश्यन्त महाजले
तदुपश्रुत्य राजापि चित्रवर्माऽतिविह्वलः । यमुनायास्तटं प्राप्य विचेष्टः समजायत
श्रुत्वाथराजपत्न्यश्चबभूवुर्गतचेतनाः । साचसीमन्तिनीश्रुत्वा पपात भुविमूर्च्छिता

तथाऽन्ये मन्त्रिमुख्याश्च नायकाः सपुरोहिताः ।
विह्वलाः शोकसन्तप्ता विलेपुर्मुक्तमूर्धजाः ॥ ५० ॥

इन्द्रसेनोऽपि राजेन्द्रः पुत्रवार्त्तांसुदुःखितः । आकर्ण्यसह पत्नीभिर्नष्टसञ्ज्ञःपपात ह

तन्मन्त्रिणश्च तत्पौरास्तथा तद्देशवासिनः ।
आबालवृद्धवनिताश्चुक्रुशुः शोकविह्वलाः ॥ ५२ ॥
शोकात्केचिदुरो जघ्नुः शिरो जघ्नुश्च केचन ।
हा राजपुत्र ! हा तात ! क्वासि क्वासीति बभ्रमुः ॥ ५३ ॥

एवं शोकाकुलं दीनमिन्द्रसेनमहीपतेः । नगरं सहसा क्षुब्धं चित्रवर्मपुरं तथा ॥५४॥
अथवृद्धैःसमाश्वस्तश्चित्रवर्मामहीपतिः । शनैर्नगरमागत्य सान्त्वयामासचात्मजाम्

स राजाम्भसि मग्नस्य जामातुस्तस्य बान्धवैः ।
आगतैः कारयामास साकल्यादौर्ध्वदैहिकम् ॥ ५६ ॥
सा च सीमन्तिनी साध्वी भर्तृलोकमतिः सतीः ।
पित्रा निषिद्धा स्नेहेन वैधव्यं प्रत्यपद्यत ॥ ५७ ॥

मुनेः पत्न्योपदिष्टं यत्सोमवारव्रतं शुभम् । न तत्याजशुभ्राचारा वैधव्यं प्राप्तवत्यपि
एवंचतुर्दशोवर्षेदुःखं प्राप्य सुदारुणम् । ध्यायन्ती शिवपादाब्जं वत्सरत्रयमत्यगात्
पुत्रशोकादिवोन्मत्तमिन्द्रसेनं महीपतिम् । प्रसह्य तस्यदायादाः सप्ताङ्गंजहुरोजसा
हृतसिंहासनः शूरैर्दायादैः सोऽप्रजो नृपः । निगृह्य काराभवने सपत्नीको निवेशितः
चन्द्राङ्गदोऽपि तत्पुत्रोनिमग्नोयमुनाजले । अधोधोमज्जमानोऽसौ ददर्शोरगकामिनीः

जलक्रीडासु सक्तास्ता दृष्ट्वा राजकुमारकम् ।

विस्मितास्तमथो निन्युः पातालं पन्नगालयम् ॥ ६३ ॥

स नीयमानस्तरसा पन्नगीभिर्नृपात्मजः । तक्षकस्य पुरं रम्यं विवेश परमाद्भुतम् ॥
सोऽपश्यद्राजतनयो महेन्द्रभवनोपमम् । महारत्नपरिभ्राजन्मयूखपरिदीपितम् ॥
वज्रवैडूर्यपाचादिप्रासादशतसङ्कुलम् । माणिक्यगोपुरद्वारं मुक्तादामभिरुज्ज्वलम्
चन्द्रकान्तस्थलं रम्यं हेमद्वारकपाटकम् । अनेकशतसाहस्रमणिदीपविराजितम् ॥
तत्रापश्यत्सभा मध्ये निषण्णंरत्नविष्टरे । तक्षकं पन्नगाधीशं फणानेकशतोज्ज्वलम्
दिव्याम्बरधरं दीप्तं रत्नकुण्डलराजितम् । नानारत्नपरिक्षिप्तमुकुटद्युतिरञ्जितम्॥
फणामणिमयूखाढ्यैरसंख्यैःपन्नगोत्तमैः । उपासितं प्राञ्जलिभिश्चित्ररत्नविभूषितैः
रूपयौवनमाधुर्यविलासगतिशोभिना । नागकन्यासहस्रेण समन्तात्परिवारितम् ॥
दिव्याभरणदीप्ताङ्गं दिव्यचन्दनचर्चितम् । कालाग्निमिवदुर्धर्षंतेजसादित्यसन्निभम्

दृष्ट्वा राजसुतो धीरः प्रणिपत्य सभास्थले ।
उत्थितः प्राञ्जलिस्तस्य तेजसाऽऽक्षिप्तलोचनः ॥ ७२ ॥

नागराजोऽपि तं दृष्ट्वा राजपुत्रंमनोरमम् । कोऽयंकस्मादिहायातइति पप्रच्छपन्नगीः
ता ऊचुर्यमुनातोये दृष्टोऽस्माभिर्यदृच्छया । अज्ञातकुलनामायमानीतस्तवसन्निधिम्
अथ पृष्टो राजपुत्रस्तक्षकेण महात्मना । कस्यासि तनयःकस्त्वं को देशःकथमागतः

राजपुत्रो वचः श्रुत्वा तक्षकं वाक्यमब्रवीत् ॥ ७७ ॥

राजपुत्र उवाच

अस्तिभूमण्डलेकश्चिद्देशोनिषधसञ्ज्ञकः । तस्याधिपोऽभवद्राजानलोनाममहायशाः

स पुण्यकीर्तिः क्षितिपो दमयन्तीपतिः शुभः ॥ ७८ ॥

तस्मादप्यीन्द्रसेनाख्यस्तस्यपुत्रो महबलः । चन्द्राङ्गदोस्मिनाम्नाहं नवोढःश्वशुरालये

विहरन्यमुनातोये निमग्नो दैवचोदितः ॥ ७९ ॥
एताभिः पन्नगस्त्रीभिरानीतोऽस्मितवान्तिकम् ।
दृष्ट्वाऽहं तव पादाब्जं पुण्यैर्जन्मान्तरार्जितैः ॥ ८० ॥
अद्य धन्योऽस्मि धन्योऽस्मि कृतार्थौ पितरौ मम ।

यत्प्रेक्षितोऽहं कारुण्यात्त्वया सम्भाषितोऽपि च ॥ ८१ ॥

सूत उवाच

इत्युदारमसम्भ्रान्तं वचःश्रुत्वातिपेशलम् । तक्षकःपुनरौत्सुक्याद्बभाषेराजनन्दनम्

तक्षक उवाच

भोभोनरेन्द्रदायादामा भैषीर्धीरतां व्रज । सर्वदेवेषु को देवो युष्माभिः पूज्यतेसदा

राजपुत्र उवाच

योदेवःसर्वदेवेषुमहादेव इतिस्मृतः । पूज्यतेसहिविश्वात्माशिवोऽस्माभिरुमापतिः

यस्य तेजोंशलेशेन रजसा च प्रजापतिः । कृतरूपोऽसृजद्विश्वं स नःपूज्यो महेश्वरः

यस्यांशात्सात्त्विकं दिव्यं बिभ्रद्विष्णुः सनातनः ।
विश्वं बिभर्त्ति भूतात्मा शिवोऽस्माभिः स पूज्यते ॥ ८६ ॥
यस्यांशात्तामसाज्जातो रुद्रः कालाग्निसन्निभः ।
विश्वमेतद्धरत्यंते स पूज्योऽस्माभिरीश्वरः ॥ ८७ ॥

योविधाता विधातुश्चकारणस्यापिकारणम् । तेजसांपरमंतेजःस शिवोनःपरागतिः

योऽन्तिकस्थोऽपि दूरस्थः पापोपहतचेतसाम् ।
अपरिच्छेद्यधामासौ शिवो नः परमा गतिः ॥ ८८ ॥
योऽग्नौ तिष्ठति यो भूमौ यो वायौ सलिले च यः
य आकाशे च विश्वात्मा स पूज्यो नः सदाशिवः ॥ ९० ॥
यः साक्षी सर्वभूतानां य आत्मस्थो निरञ्जनः ।
यस्येच्छावशगो लोकः सोऽस्माभिः पूज्यते शिवः ॥ ९१ ॥
यमेकमाद्यं पुरुषं पुराणं वदन्ति भिन्नं गुणवैकृतेन ।
क्षेत्रज्ञमेकेऽथ तुरीयमन्ये कूटस्थमन्ये स शिवो गतिर्नः ॥ ९२ ॥

यं नास्पृशंश्चैत्यमचिन्त्यतत्त्वं दुरन्तधामानमतत्स्वरूपम् ।
मनोवचोवृत्तय आत्मभाजां स एष पूज्यः परमः शिवो नः ॥ ९३ ॥
यस्य प्रसादं प्रतिलभ्य सन्तो वाञ्छन्ति नैन्द्रं पदमुज्ज्वलं वा ।

निस्तीर्णकर्मार्गलकालचक्राश्चरन्त्यभीताः स शिवो गतिर्नः ॥ ९४ ॥

यस्य स्मृतिः सकलपापरुजां विघातं,
सद्यः करोत्यपि च पुल्कसजन्मभाजाम् ।
यस्य स्वरूपमखिलं श्रुतिभिर्विमृग्यं,
तस्मै शिवाय सततं करवाम पूजाम् ॥ ९५ ॥

यन्मूर्ध्नि लब्धनिलया सुरलोकसिन्धुर्यस्याङ्गभागभगवती जगदम्बिका च ।
यत्कुण्डले त्वहह तक्षकवासुकी द्वौ सोऽस्माकमेव गतिरर्धशशाङ्कमौलिः ॥९६

जयति निगमचूडाग्रेषु यस्यांघ्रिपद्मं,
जयति च हृदि नित्यं योगिनां यस्य मूर्त्तिः ।
जयति सकलतत्त्वोद्भासनं यस्य मूर्त्तिः,
स विजितगुणसर्गः पूज्यतेऽस्माभिरीशः ॥ ९७ ॥

सूत उवाच

इत्याकर्ण्य वचस्तस्य तक्षकःप्रीतमानसः । जातभक्तिर्महादेवे राजपुत्रमभाषत ॥

तक्षक उवाच

परितुष्टोऽस्मि भद्रं स्तात्तव राजेन्द्रनन्दन । बालोपियत्परंतत्त्वंवेत्सिशैवंपरात्परम्

एष रत्नमयोलोक एताश्चारुदृशोऽबलाः । एतेकल्पद्रुमाः सर्वे वाप्योमृतरसाम्भसः

नात्र मृत्युभयंघोरं न जरारोगपीडनम् । यथेष्टं विहरात्रैवभुङ्क्ष्वभोगान्यथोचितान्

इत्युक्तो नागराजेन स राजेन्द्रकुमारकः । प्रत्युवाच परं प्रीत्या कृताञ्जलिरुदारधीः

कृतदारोऽस्म्यहं काले सुव्रता गृहिणी मम । शिवपूजापरा नित्यं पितरावेकपुत्रकौ

नेत्वद्यमां मृतंमत्वाशोकेनमहतावृताः । प्रायःप्राणैर्वियुज्यन्तेदैवात्प्राणान्वहन्तिवा

अतो मया बहुतिथं नात्र स्थेयं कथञ्चन । तमेव लोकं कृपया मां प्रापयितुमर्हसि

इत्युक्तवन्तं नरदेवपुत्रं दिव्यैर्वरान्नैः सुरपादपोत्थैः ।
आप्याययित्वा वरगन्धवासःस्रग्रत्नदिव्याभरणैर्विचित्रैः ॥ १०६ ॥
सन्तोषयित्वा विविधैश्च भोगैः पुनर्बभाषे भुजगाधिराजः ।

यदा यदा त्वं स्मरसित्वदग्रे यदा तदाऽऽविष्क्रियते मयेति ॥ १०७ ॥
पुनश्च राजपुत्राय तक्षकोऽश्वञ्च कामगम् ।
नानाद्वीपसमुद्रेषु लोकेषु च निरर्गलम् ॥ १०८ ॥
दत्तवान्रत्नाभरणदिव्याभरणवाससाम् । वाहनाय ददावेकं राक्षसंपन्नगेश्वरः ॥१०६
तत्सहायार्थमेकं च पन्नगेन्द्रकुमारकम् । नियुज्यतक्षकःप्रीत्यागच्छेतिविससर्जतम्
इति चन्द्राङ्गदः सोऽथ संगृह्य विविधं धनम् ।
अश्वं कामगमारुह्य ताभ्यां सह विनिर्ययौ ॥ १११ ॥
स मुहूर्तादिवोन्मज्ज्य तस्मादेव सरिज्जलात् ।
विजहार तटे रम्ये दिव्यमारुह्य वाजिनम् ॥ ११२ ॥
अथाऽस्मिन्समये तन्वी सा च सीमन्तिनी सती ।
स्नातुं समाययौ तत्र सखीभिः परिवारिता ॥ ११३ ॥
सा ददर्श नदीतीरे विहरन्तं नृपात्मजम् । रक्षसा नररूपेण नागपुत्रेण चान्वितम्
दिव्यरत्नसमाकीर्णं दिव्यमाल्यावतंसकम् । देहेन दिव्यगन्धेन व्याक्षिप्तदशयोजनम्
तमपूर्वाकृतिं वीक्ष्य दिव्याश्वमधिसंस्थितम् ।
जडोन्मत्तेव भीतेव तस्थौ तन्न्यस्तलोचना ॥ ११६ ॥
तांचराजेन्द्रपुत्रोऽसौदृष्टपूर्वामितिस्मरन् । निर्मुक्तकण्ठाभरणांकण्ठसूत्रविवर्जिताम्
असंयोजितधम्मिल्लामङ्गरागविवर्जिताम् ।
त्यक्तनीलाञ्जनापाङ्गीं कृशाङ्गीं शोकदूषिताम् ॥ ११८ ॥
दृष्ट्वाऽवतीर्य तुरगादुपविष्टः सरित्तटे । तामाहूयवरारोहामुपवेश्येदमब्रवीत् ॥ ११६
का त्वं कस्य कलत्रं वा कस्याऽसि तनया सती ।
किमिदं तेऽङ्गने! बाल्ये दुःसहं शोकलक्षणम् ॥ १२० ॥
इति स्नेहेन संपृष्टा सावधूरश्रुलोचना । लज्जितास्वयमाख्यातुं तत्सखीसर्वमब्रवीत्
इयं सीमन्तिनी नाम्ना स्नुषा निषधभूपतेः । चन्द्राङ्गदस्यमहिषीतनया चित्रवर्मणः
अस्याःपतिर्दैवयोगान्निमग्नोऽस्मिन्महाजले । तेनेयंप्राप्तवैधव्याबालादुःखेनशोषिता

एवं वर्षत्रयं नीतं शोकेनातिबलीयसा । अद्येन्दुवारे संप्राप्ते स्नातुमत्र समागता
श्वशुरोऽस्याश्च राजेन्द्रो हृतराज्यश्च शत्रुभिः ।
बलाद् गृहीतो बद्धश्च सभार्यस्तद्वशे स्थितः ॥ १२५ ॥
तथाप्येषा शुभाचारा सोमवारे महेश्वरम् । साम्बिकं परयाभक्त्या पूजयत्यमलाशया

सूत उवाच

इत्थं सखीमुखेनैव सर्वमावेद्यसुव्रता । ततः सीमन्तिनी प्राह स्वयमेव नृपात्मजम्
कस्त्वंकन्दर्पसङ्काशःकाविमौतवपार्श्वगौ । देवोनरेन्द्रःसिद्धोवागन्धर्वोवाथकिन्नरः
किमर्थंममवृत्तान्तंस्नेहवानिवपृच्छसि । किं मांवेत्सिमहाबाहोदृष्टवान्किमुकुत्रचित्
दृष्टपूर्व इवाभासि मया च स्वजनो यथा । सर्वं कथयतत्त्वेन सत्यसारा हि साधवः

सूत उवाच

एतावदुक्त्वा नरदेवपुत्री सबाष्पकण्ठं सुचिरं रुरोद ।
मुमोह भूमौ पतिता सखीभिर्वृता न किञ्चित्कथितुं शशाक ॥ १३१ ॥
श्रुत्वा चन्द्राङ्गदः सर्वं प्रियायाः शोककारणम् ।
मुहूर्त्तमभवत्तूष्णीं स्वयं शोकसमाकुलः ॥ १३२ ॥
अथाऽऽश्वास्य प्रियां तन्वीं विविधैर्वाक्यनैपुणैः ।
सिद्धा नाम वयं देवाः कामगा इति सोऽब्रवीत् ॥ १३३ ॥
ततो बलादिवाऽऽकृष्य पाणिग्रहणशङ्किताम् ।
पुलकाञ्चितसर्वाङ्गीं तां कर्णे त्विदमब्रवीत् ॥ १३४ ॥
क्वापि लोके मया दृष्टस्तवभर्त्ता वरानने । त्वद्व्रताचरणात्प्रीतः सद्य एवागमिष्यति
अपनेष्यति ते शोकं द्वित्रैरेव दिनैर्ध्रुवम् ।
एतच्छंसितुमायातस्तव भर्त्तुः सखाऽस्म्यहम् ॥ १३६ ॥
अत्र कार्यो न सन्देहःशपामिशिवपादयोः । तावत्त्वद्धृदयेस्थेयंनप्रकाश्यंचकुत्रचित्
सातुतद्वचनंश्रुत्वासुधाधाराशताधिकम् । सम्भ्रमोद्भ्रान्तनयनातमेवमुहुरैक्षत ॥ ३८
प्रेमबन्धानुगुणितं वाक्यं चाह रसायनम् । विभ्रमोदारसहितं मधुरापाङ्गवीक्षणम्

स्वपाणिस्पर्शनोद्भिन्नपुलकाञ्चितविग्रहम् । पूर्वदृष्टानि चाङ्गेषु लक्षणानिस्वरादिषु
वयः प्रमाणं वर्णं च परीक्ष्यैनमतर्कयत् ॥ १४० ॥
एष एव पतिर्मे स्याद्ध्रुवं नान्यो भविष्यति । अस्मिन्नेव प्रसक्तं मेहृदयंप्रेमकातरम्
परलोकादिहायातः कथमेवं स्वरूपधृक् । दुर्भाग्यायाः कथं मेस्याद्भर्तुर्नष्टस्यदर्शनम्
स्वप्नोऽयंकिमुन स्वप्नोभ्रमोऽयंकिन्तुनभ्रमः । एषधूर्तोऽथवाकश्चिद्यक्षोगन्धर्वएव वा
मुनिपत्न्या यदुक्तंमे परमापद्गतापि च । व्रतमेतत्कुरुष्वेति तस्य वा फलमेव वा
यो वर्षायुतसौभाग्यंममेत्याहद्विजोत्तमः । नूनंतस्यवचःसत्यंकोविद्यादीश्वरंविना
निमित्तानि च दृश्यन्तेमङ्गलानिदिनेदिने । प्रसन्नेपार्वतीनाथेकिमसाध्यंशरीरिणाम्
इत्थं विमृश्य वहुधा तां पुनर्मुक्तसंशयाम् ।
लज्जानम्रमुखीं कर्णे शशंसाऽऽत्मप्रयोजनम् ॥ १४७ ॥
इमं वृत्तान्तमाख्यातुं तत्पित्रोः शोकतप्तयोः ।
गच्छामः स्वस्ति ते भद्रे सद्यः पतिमवाप्स्यसि ॥ १४८ ॥
इत्युक्त्वाऽश्वं समारुह्यजगामनृपनन्दनः । ताभ्यांसहनिजंराष्ट्रंप्रत्यपद्यततत्क्षणात्
सपुरोपवनाभ्याशेस्थित्वातंफणिपुत्रकात । विससर्जात्मदायादान्नृपासनगतान्प्रति
स गत्वोवाच ताञ्छीघ्रमिन्द्रसेनो विमुच्यताम् ।
चन्द्राङ्गदस्तस्य सुतः प्राप्तोऽयं पन्नगालयात् ॥ १५१ ॥
नृपासनं विमुञ्चन्तु भवन्तो न विचार्यताम् ।
नोचेच्चन्द्राङ्गदस्याऽऽशु बाणाः प्राणान्हरन्ति वः ॥ १५२ ॥
समग्नोयमुनातोये गत्वातक्षकमन्दिरम् । लब्ध्वाचतस्यसाहाय्यं पुनर्लोकादिहागतः
इत्याख्यातमशेषेण तद्वृत्तान्तं निशम्य ते ।
साधुसाध्विति सम्भ्रान्ताः शशंसुः परिपन्थिनः ॥ १५४ ॥
अथेन्द्रसेनाय निवेद्य सत्वरं नष्टस्य पुत्रस्य पुनः समागमम् ।
प्रसाद्य तं प्राप्तनरेश्वरासनं दायादमुख्यास्तु भयं प्रपेदिरे ॥ १५५ ॥
अथ पौरजनाः सर्वे पुरोद्याने नृपात्मजम् । दृष्ट्वा राज्ञे द्रुतं प्रोचुर्लेभिरे च महाधनम्

आकर्ण्य पुत्रमायान्तं राजाऽऽनन्दजलाप्लुतः । न व्यजानादिमंलोकंराज्ञीचपरयामुदा
अथनागरिकाःसर्वेमन्त्रिवृद्धाःपुरोधसः । प्रत्युद्गम्यपरिष्वज्यतमानिन्युर्नृपान्तिकम्
अथोत्सवेन महताप्रविश्य निजमन्दिरम् । राजपुत्रः स्वपितरौववन्दे बाष्पमुत्सृजन्
तं पादमूले पतितं स्वपुत्रं विवेद नाऽसौ पृथिवीपतिः क्षणम् ।
प्रबोधितोऽमात्यजनैः कथञ्चिदुत्थाप्य क्लिन्नेन हृदाऽऽलिलिङ्ग ॥ १६० ॥
क्रमेण मातॄरभिवन्द्य ताभिः प्रवर्धिताशीः प्रणयाकुलाभिः ।
आलिङ्गितः पौरजनानशेषान्सम्भावयामास स राजसूनुः ॥ १६१ ॥
तेषां मध्ये समासीनःस्ववृत्तान्तमशेषतः । पित्रेनिवेदयामास तक्षकस्यचमित्रताम्
दत्तं भुजङ्गराजेन रत्नादिधनसञ्चयम् । दिव्यं तद्राक्षसानीतं पित्रे सर्वं न्यवेदयत्
राजपुत्रस्य चरितंदृष्ट्वा श्रुत्वाचविह्वलः । मेनेस्नुषायाः सौभाग्यं महेशाराधनार्जितम्
सौमाङ्गल्यमयीं वार्तामिमां निषधभूपतिः । चारैर्निवेदयामास चित्रवर्ममहीपतेः
श्रुत्वाऽमृतमयींवार्त्तासमुत्थायसम्भ्रमात् । तेभ्योदत्त्वाधनंभूरिननर्ताऽऽनन्दविह्वलः
अथाहूय स्वतनयां परिष्वज्याश्रुलोचनः । भूषणैर्भूषयामासत्यक्तवैधव्यलक्षणाम्
अथोत्सवो महानासीद्राष्ट्रग्रामपुरादिषु । सीमन्तिन्याः शुभाचारंशशंसुःसर्वतो जनाः
चित्रवर्माथनृपतिः समाहूयेन्द्रसेनजम् । पुनर्विवाहविधिना सुतां तस्मै न्यवेदयत
चन्द्राङ्गदोऽपि रत्नाद्यैरानीतैस्तक्षकालयात् ।
स्वां पत्नीं भूषयाञ्चक्रे मर्त्यानामतिदुर्लभैः ॥ १७० ॥
अङ्गरागेण दिव्येन तप्तकाञ्चनशोभिना । शुशुभे सा सुगन्धेन दशयोजनगामिना ॥
अम्लानमालयाशश्वत्पद्मकिञ्जल्कवर्णया । कल्पद्रुमोत्थया बाला भूषिता शुशुभेसती
एवं चन्द्राङ्गदः पत्नीमवाप्य समये शुभे । ययौ स्वनगरीं भूयःश्वशुरेणानुमोदितः
इन्द्रसेनोऽपि राजेन्द्रो राज्ये स्थाप्य निजात्मजम् ।
तपसा शिवमाराध्य लेभे संयमिनां गतिम् ॥ १७४ ॥
दशवर्षसहस्राणिसीमन्तिन्या स्वभार्यया । सार्धं चन्द्राङ्गदोराजाबुभुजे विषयान्बहून्
प्रासूत तनयानष्टौ कन्यामेकां वराननाम् । रेमेसीमन्तिनी भर्त्रा पूजयन्ती महेश्वरम्

दिने दिने च सौभाग्यं प्राप्तं चैवेन्दुवासरात् ॥ १७६ ॥

सूत उवाच

विचित्रमिदमाख्यानं मया समनुवर्णितम् ।
भूयोऽपि वक्ष्ये माहात्म्यं सोमवारव्रतोदितम् ॥ १७७ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां ब्रह्मोत्तरखण्डे
सोमवारव्रतवर्णनेसीमन्तिनीकथानकवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

सीमन्तिन्याःप्रभाववर्णनम्

ऋषय ऊचुः

साधुसाधु महाभाग! त्वयाकथितमुत्तमम् । आख्यानं पुनरन्यच्चविचित्रंवक्तुमर्हसि

सूत उवाच

विदर्भविषये पूर्वमासीदेको द्विजोत्तमः । वेदमित्र इतिख्यातोवेदशास्त्रार्थवित्सुधीः
तस्यासीदपरो विप्रःसखासारस्वताह्वयः । तावुभौ परमस्निग्धावेकदेशनिवासिनौ
वेदमित्रस्य पुत्रोऽभूत्सुमेधानाम सुव्रतः । सारस्वतस्य तनयःसोमवानिति विश्रुतः
उभौ सवयसौबालौसमवेषौ समस्थिती । समं च कृतसंस्कारौ समविद्यौबभूवतुः
साङ्गानधीत्यतौ वेदांस्तर्कव्याकरणानिच । इतिहासपुराणानिधर्मशास्त्राणिकृत्स्नशः
सर्वविद्याकुशलिनौबाल्य एव मनीषिणौ । प्रहर्षमतुलं पित्रोर्ददतुः सकलैर्गुणैः
तावेकदा स्वतनयौ तावुभौ ब्राह्मणोत्तमौ ।
आहूयाऽवोचतां प्रीत्या षोडशाब्दौ शुभाकृती ॥ ८ ॥
हे पुत्रकौ! युवां बाल्येकृतविद्यौ सुवर्चसौ । वैवाहिकोऽयंसमयोवर्ततेसमयोःसमम्
इमं प्रसाद्य राजानंविदर्भेशं स्वविद्यया । ततः प्राप्य धनं भूरि कृतोद्वाहौ भविष्यथः

एवमुक्तौ सुतौ ताभ्यां तावुभौ द्विजनन्दनौ । विदर्भराजमासाद्यसमतोषयतां गुणैः
विद्यया परितुष्टाय तस्मै द्विजकुमारकौ । विवाहार्थं कृतोद्योगौ धनहीनावशंसताम्
तयोरपि मतंज्ञात्वासविदर्भमहीपतिः । प्रहस्य किञ्चित्प्रोवाचलोकतत्त्वविवित्सया
आस्ते निषधराजस्यराज्ञीसीमन्तिनीसती । सोमवारे महादेवंपूजयत्यम्बिकायुतम्
तस्मिन्दिने सपत्नीकान्द्विजाग्र्यान्वेदवित्तमान् ।
सम्पूज्य परया भक्त्या धनं भूरि ददाति च ॥ १५ ॥
अतोऽत्रयुवयोरेको नारीविभ्रमवेषधृक् । एकस्तस्याः पतिर्भूत्वाजायेतांविप्रदम्पती
युवां वधूवरौ भूत्वा प्राप्य सीमन्तिनीगृहम् ।
भुक्त्वा भूरिधनं लब्ध्वा पुनर्यातं ममाऽन्तिकम् ॥ १७ ॥
इतिराज्ञा समादिष्टौ भीतौ द्विजकुमारकौ । प्रत्यूचतुरिदंकर्म कर्तुं नौ जायतेभयम्
देवतासुगुरौपित्रोस्तथाराजकुलेषुच । कौटिल्यमाचरन्मोहात्सद्योनश्यतिसान्वयः
कथमन्तर्गृहंराज्ञांछद्मनाप्रविशेत्पुमान् । गोप्यमानमपिच्छद्मकदाचित्ख्यातिमेष्यति
ये गुणाः साधिताः पूर्वं शीलाचारश्रुतादिभिः ।
सद्यस्ते नाशमायान्ति कौटिल्यपथगामिनः ॥ २१ ॥
पापं निन्दा भयं वैरं चत्वार्येतानि देहिनाम् । छद्ममार्गप्रपन्नानांतिष्ठन्त्येवहिसर्वदा
अत आवां शुभाचारौजातौचशुचिनां कुले । वृत्तंधूर्तजनश्लाघ्यंनाऽऽश्रयावःकदाचन

राजोवाच

दैवतानां गुरूणाञ्च पित्रोश्च पृथिवीपतेः ।
शासनस्याऽप्यलङ्घ्यत्वात्प्रत्यादेशो न कर्हिचित् ॥ २४ ॥
यतैर्यद्यत्समादिष्टं शुभं वा यदि वाऽशुभम् । कर्त्तव्यं नियतं भीतैरप्रमत्तैर्बुभूषुभिः
अहोवयंहिराजानःप्रजायूयं हि सम्मताः । राजाज्ञयाप्रवृत्तानांश्रेयःस्यादन्यथाभयम्
अतो मच्छासनं कार्यं भवद्भ्यामविलम्बितम् ।
इत्युक्तौ नरदेवेन तौ तथेत्यूचतुर्भयात् ॥ २७ ॥
सारस्वतस्य तनयंसामवन्तंनराधिपः । स्त्रीरूपधारिणं चक्रे वस्त्राकल्पाञ्जनादिभिः

स कृत्रिमोद्भूतकलत्रभावः प्रयुक्तकर्णाभरणाङ्गरागः ।

स्निग्धाञ्जनाक्षः स्पृहणीयरूपो बभूव सद्यः प्रमदोत्तमाभः ॥ २६ ॥

तावुभौ दम्पती भूत्वा द्विजपुत्रौ नृपाज्ञया । जग्मतुर्नैषधं देशं यद्वा तद्वा भवत्विति उपेत्य राजसदनं सोमवारे द्विजोत्तमैः । सपत्नीकैःकृतातिथ्यौ धौतपादौ बभूवतुः साराज्ञीब्राह्मणान्सर्वानुपविष्टान्वरासने । प्रत्येकमर्चयाञ्चक्रे सपत्नीकान्द्विजोत्तमान् तौच विप्रसुतौ दृष्ट्वा प्राप्तौकृतकदम्पती । ज्ञात्वा किञ्चिद्विहस्याथमेनेगौरीमहेश्वरौ आवाह्य द्विजमुख्येषुदेवदेवं सदाशिवम् । पत्नीष्वावाहयामाससादेवींजगदम्बिकाम् गन्धैर्माल्यैः सुरभिभिर्धूपैर्नीराजनैरपि । अर्चयित्वा द्विजश्रेष्ठान्नमश्चक्रे समाहिता हिरण्मयेषु पात्रेषु पायसं घृतसंयुतम् । शर्करामधुसंयुक्तं शाकैर्जुष्टं मनोरमैः ॥३६॥ गन्धशाल्योदनैर्हृद्यैर्मोदकापूपराशिभिः । शष्कुलीभिश्चसंयावैः कृसरैर्माषपक्वकैः

तथाऽन्यैरप्यसंख्यातैर्भक्ष्यैर्भोज्यैर्मनोरमैः ।

सुगन्धैः स्वादुभिः सूपैः पानीयैरपि शीतलैः ॥ ३८ ॥

क्लृप्तमन्नंद्विजाग्र्येभ्यःसाभक्त्यापर्यवेषयत् । दध्योदनंनिरुपमंनिवेद्यसमतोषयत् भुक्तवत्सुद्विजाग्र्येषु स्वाचान्तेषु नृपाङ्गना । प्रणम्यदत्वाताम्बूलंदक्षिणाञ्चयथार्हतः धेनूर्हिरण्यवासांसिरत्नस्रग्भूषणानि च । दत्त्वाभूयोनमस्कृत्यविससर्जद्विजोत्तमान्

तयोर्द्वयोर्भूसुरवर्यपुत्रयोरेकस्तया हैमवतीधियार्चितः ।

एको महादेवधियाभिपूजितः कृतप्रणामौ ययतुस्तदाज्ञया ॥ ४२ ॥

सा तु विस्मृतपुम्भावा तस्मिन्नेव द्विजोत्तमे ।

जातस्पृहा मदोत्सिक्ता कन्दर्पविवशाऽब्रवीत् ॥ ४३ ॥

अयिनाथविशालाक्षसर्वावयवसुन्दर !। तिष्ठतिष्ठक्व वा यासिमांन पश्यसितेप्रियाम् इदमग्रे वनं रम्यं सुपुष्पितमहाद्रुमम् । अस्मिन्विहर्तुमिच्छामित्वयासहयथासुखम्

इत्थं तयोक्तमाकर्ण्य पुरोऽगच्छद् द्विजात्मजः ।

विचिन्त्य परिहासोक्तिं गच्छतिस्म यथा पुरा ॥ ४६ ॥

पुनरप्याहसाबालातिष्ठतिष्ठक्वयास्यसि । दुरुत्सहस्मरावेशां परिभोक्तुमुपेत्यमाम्

परिष्वजस्व मां कान्तां पाययस्व तवाऽधरम् ।

नाऽहं गन्तुं समर्थाऽस्मि स्मरबाणप्रपीडिता ॥ ४८ ॥

इत्थमश्रुतपूर्वां तां निशम्यपरिशङ्कितः । आयान्तींपृष्ठतोवीक्ष्यसहसाविस्मयंगतः केशपाशपलाशाक्षी पीनोन्नतपयोधरा । कृशोदरी बृहच्छ्रोणी नवपल्लवकोमला ॥

स एव मे सखा किन्तु जात एव वराङ्गना ।

पृच्छाम्येनमतःसर्वमिति सञ्चिन्त्य सोऽब्रवीत् ॥ ५१ ॥

किमपूर्व इवाभासि सखेरूपगुणादिभिः । अपूर्वं भाषसे वाक्यं कामिनीवसमाकुला यस्त्वं वेदपुराणज्ञो ब्रह्मचारी जितेन्द्रियः । सारस्वतात्मजःशान्तःकथमेवंप्रभाषसे

इत्युक्ता सा पुनः प्राह नाऽहमस्मि पुमान्प्रभो !।

नाम्ना सामवती बाला तवाऽस्मि रतिदायिनी ॥ ५४ ॥

यदि ते संशयः कान्तममाङ्गानिविलोकय । इत्युक्तःसहसामार्गेरहस्येनांव्यलोकयत्

तामकृत्रिमधम्मिल्लां जघनस्तनशोभिनीम् ।

सुरूपां वीक्ष्य कामेन किञ्चिद् व्याकुलतामगात् ॥ ५६ ॥

पुनः संस्तभ्य यत्नेनचेतसोविकृतिंबुधः । मुहूर्तंविस्मयाविष्टोनकिञ्चित्प्रत्यभाषत

सामवत्युवाच

गतस्ते संशयः कच्चित्तर्ह्यागच्छ भजस्व माम् ।

पश्येदं विपिनं कान्त! परस्त्रीसुरतोचितम् ॥ ५८ ॥

सुमेधा उवाच

मैवं कथय मर्यादांमा हिंसीर्मदमत्तवत् । आवांविज्ञातशास्त्रार्थौत्वमेवंभाषसेकथम्

अधीतस्य च शास्त्रस्य विवेकस्यच कुलस्य च ।

किमेष सदृशो धर्मो जारधर्मनिषेवणम् ॥ ६० ॥

न त्वं स्त्री पुरुषो विद्वाञ्जानीह्यात्मानमाऽऽत्मना ।

अयं स्वयंकृतोऽनर्थ आवाभ्यां यद्विचेष्टितम् ॥ ६१ ॥

वञ्चयित्वात्मपितरौधूर्त्तराजानुशासनात् । कृत्वाचानुचितंकर्म तस्यैतद्भुज्यतेफलम्

सर्वं त्वनुचितं कर्म नृणां श्रेयोविनाशनम् ।
यस्त्वं विप्रात्मजो विद्वान्गतः स्त्रीत्वं विगर्हितम् ॥ ६३ ॥
मार्गं त्यक्त्वा गतोऽरण्यं नरो विध्येत कण्टकैः ।
बलाद्धिंस्येत वा हिंस्रैर्यदा त्वक्तसमागमः ॥ ६४ ॥

एवं विवेकमाश्रित्य तूष्णीमेहिस्वयंगृहम् । देवद्विजप्रसादेन स्त्रीत्वं तवविलीयते
अथवा दैवयोगेन स्त्रीत्वमेव भवेत्तव । पित्रा दत्ता मया साकं रंस्यसे वरवर्णिनि
अहो चित्रमहो दुःखमहो पापबलंमहत् । अहो राज्ञःप्रभावोयं शिवाराधनसम्भृतः
इत्युक्ताऽप्यसकृत्तेन सा वधूरतिविह्वला । बलेन तं समालिङ्ग्य चुचुम्बाधरपल्लवम्
धर्षितोऽपि तथा धीरःसुमेधानूतनस्त्रियम् । यत्नादानीयसदनं कृत्स्नंतत्रन्यवेदयत्

तदाकर्ण्याथ तौ विप्रौ कुपितौ शोकविह्वलौ ।
ताभ्यां सह कुमाराभ्यां वैदर्भान्तिकमीयतुः ॥ ७० ॥

ततःसारस्वतः प्राह राजानं धूर्तचेष्टितम् । राजन्ममात्मजंपश्यतवशासनयन्त्रितम्

एतौ तवाज्ञावशगौ चक्रतुः कर्मगर्हितम् ।
मत्पुत्रस्तत्फलं भुङ्क्ते स्त्रीत्वं प्राप्य जुगुप्सितम् ॥ ७२ ॥

अद्यमेसन्ततिर्नष्टानिराशाःपितरोमम । नापुत्रस्यहिलोकोऽस्तलुप्तपिण्डादिसंस्कृतेः
शिखोपवीतमजिनं मौञ्जीं दण्डंकमण्डलुम् । ब्रह्मचर्योचितंचिह्नंविहायेमांदशांगतः
ब्रह्मसूत्रञ्चसावित्रींस्नानंसन्ध्यांजपार्चनम् । विसृज्यस्त्रीत्वमाप्तोस्यकागतिर्वदपार्थिव
त्वया मे सन्ततिर्नष्टा नष्टोवेदपथश्च मे । एकात्मजस्य मे राजन्का गतिर्वदशाश्वती

इति सारस्वतेनोक्तं वाक्यमाकर्ण्य भूपतिः ।
सीमन्तिन्याः प्रभावेण विस्मयं परमं गतः ॥ ७७ ॥

अथ सर्वान्समाहूय महर्षीनमितद्युतीन् । प्रसाद्यप्रार्थयामास तस्य पुंस्त्वंमहीपतिः

तेऽब्रुवन्नथ पार्वत्याः शिवस्य च समीहितम् ।
तद्भक्तानाञ्च माहात्म्यं कोऽन्यथाकर्तुमीश्वरः ॥ ७९ ॥
अथ राजा भरद्वाजमादाय मुनिपुङ्गवम् ।

ताभ्यां सह द्विजाग्र्याभ्यां तत्सुताभ्यां समन्वितः ॥ ८० ॥

अम्बिकाभवनं प्राप्य भरद्वाजोपदेशतः । तां देवीं नियमैस्तीव्रैरुपास्तेस्ममहानिशि

एवं त्रिरात्रं सुविसृष्टभोजनः स पार्वतीध्यानरतो महीपतिः ।
सम्यक्प्रणामैर्विविधैश्च संस्तवैर्गौरीं प्रपन्नार्तिहरामतोषयत् ॥ ८२ ॥

ततः प्रसन्ना सादेवीभक्तस्य पृथिवीपतेः । स्वरूपं दर्शयामास चन्द्रकोटिसमप्रभम्

अथाह गौरी राजानं किं ते ब्रूहि समीहितम् ।
सोऽप्याह पुंस्त्वमेतस्य कृपया दीयतामिति ॥ ८४ ॥
भूयोऽप्याह महादेवी मद्भक्तैः कर्म यत्कृतम् ।
शक्यते नाऽन्यथा कर्तुं वर्षायुतशतैरपि ॥ ८५ ॥

राजोवाच

एकात्मजो हि विप्रोयं कर्मणा नष्टसन्ततिः । कथं सुखं प्रपद्येत विना पुत्रेणतादृशः

देव्युवाच

तस्याऽन्यो मत्प्रसादेन भविष्यति सुतोत्तमः ।
विद्याविनयसम्पन्नो दीर्घायुरमलाशयः ॥ ८७ ॥

एषासामवती नाम सुतातस्यद्विजन्मनः । भूत्वा सुमेधसःपत्नीकामभोगेनयुज्यताम्

इत्युक्त्वाऽन्तर्हिता देवी ते च राजपुरोगमाः ।
गताःस्वंस्वं गृहं सर्वे चक्रुस्तच्छासने स्थितिम् ॥ ८९ ॥
सोऽपि सारस्वतो विप्रः पुत्रं पूर्वसुतोत्तमम् ।
लेभे देव्याः प्रसादेन ह्यचिरादेवकालतः ॥ ९० ॥

तां च सामवतींकन्यांददौ तस्मैसुमेधसे । तौदम्पती चिरं कालं बुभुजातेपरंसुखम्

सूत उवाच

इत्येष शिवभक्तायाः सीमन्तिन्या नृपस्त्रियाः ।
प्रभावः कथितःशम्भोर्माहात्म्यमपि वर्णितम् ॥ ९२ ॥
भूयोऽपि शिवभक्तानां प्रभावं विस्मयावहम् ।

समासाद्वर्णयिष्यामि श्रोतृणां मङ्गलायनम् ॥ ६३ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहतायां तृतीये ब्रह्मोत्तरखण्डे सीमन्तिन्याः प्रभाववर्णनं नाम नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

भद्राय्वाख्यानेऋषभयोगिनाभद्रायुजीवनम्

सूत उवाच

विचित्रं शिवनिर्माणं विचित्रं शिवचेष्टितम् ।
विचित्रं शिवमाहात्म्यं विचित्रं शिवभाषितम् ॥ १ ॥

विचित्रंशिवभक्तानां चरितंपापनाशनम् । स्वर्गापवर्गयोःसत्यंसाधनंतद्ब्रवीम्यहम्
अवन्तीविषये कश्चिद्ब्राह्मणोमन्दराह्वयः । बभूव विषयारामः स्त्रीजितो धनसंग्रही

सन्ध्यास्नानपरित्यक्तो गन्धमाल्याम्बरप्रियः ।
कुस्त्रीसक्तः कुमार्गस्थो यथापूर्वमजामिलः ॥ ४ ॥

सवेश्यांपिङ्गलांनामरममाणोदिवानिशम् । तस्याएवगृहेनित्यमासीदविजितेन्द्रियः

कदाचित्सदने तस्यास्तस्मिन्निवसति द्विजे ।
ऋषभो नाम धर्मात्मा शिवयोगी समाययौ ॥ ६ ॥

तमागतमभिप्रेक्ष्यमत्वा स्वंपुण्यमूर्जितम् । सा वेश्या स चविप्रश्चपर्यपूजयतामुभौ
तमारोप्य महापीठे कम्बलाम्बरसम्भृते । प्रक्षाल्यचरणौ भक्त्या तज्जलंदधतुःशिरः
स्वागतार्घ्यनमस्कारैर्गन्धपुष्पाक्षतादिभिः । उपचारैःसमभ्यर्च्यभोजयामासतुर्मुदा
तं भुक्तवन्तमाचान्तं पर्यङ्के सुखसंस्तरे । उपवेश्यमुदायुक्तौ ताम्बूलं प्रत्ययच्छताम्

पादसम्वाहनं भक्त्या कुर्वन्तौ दैवचोदितौ ।
कल्पयित्वा तु शुश्रूषां प्रीणयामासतुश्चिरम् ॥ ११ ॥

एवं समर्चितस्ताभ्यांशिवयोगीमहाद्युतिः । अतिवाह्यनिशामेकांययौप्रातस्तदादृतः
एवंकालेगतप्रायेस विप्रोनिधनंगतः । सा च वेश्यामृताकाले ययौकर्मार्जितांगतिम्
स विप्रःकर्मणानीतोदशार्णधरणीपतेः । वज्रबाहुकुटुम्बिन्याःसुमत्या गर्भमास्थितः
तां ज्येष्ठपत्नीं नृपतेर्गर्भसम्पदमाश्रिताम् । अवेक्ष्य तस्यै गरलं सपत्न्यश्छद्मनाददुः
सा भुक्त्वा गरलं घोरं न मृता दैवयोगतः । क्लेशमेव परम्प्राप्यमरणादतिदुःसहम्
अथ काले समायाते पुत्रमेकमजीजनत् । क्लेशेन महता साध्वी पीडितावरवर्णिनी

स निर्दशो राजपुत्रः स्पृष्टपूर्वो गरेण यत् ।
तेनाऽवाप महाक्लेशं क्रन्दमानो दिवानिशम् ॥ १८ ॥

तस्य बालस्य माता च सर्वाङ्गव्रणपीडिता । बभूवतुरतिक्लिष्टौ गरयोगप्रभावतः ॥
तौ राज्ञा च समानीतौ वैद्यैश्च कृतभेषजौ । न स्वास्थ्यमापतुर्यत्नैरनेकैर्योजितैरपि

न रात्रौ लभते निद्रां सा राज्ञी विपुलव्यथा ।
स्वपुत्रस्य च दुःखेन दुःखिता नितरां कृशा ॥ २१ ॥

नीत्वैवं कतिचिन्मासान्स राजा मातृपुत्रकौ ।
जीवन्तौ च मृतप्रायौ विलोक्याऽऽत्मन्यचिन्तयत ॥ २२ ॥

एतौ मे गृहिणीपुत्रौनिरयादागताविह । अश्रान्तरोगौक्रन्दन्तौ निद्राभङ्गविधायिनौ
अत्रोपायं करिष्यामि पापयोर्ध्रुवमेतयोः । मर्तुं वाजीवितुंवापि नक्षमौपापभोगिनौ

इत्थं विनिश्चित्य च भूमिपालः सक्तः सपत्नीषु तदात्मजेषु ।
आहूय सूतं निजदारपुत्रौ निर्वापयामास रथेन दूरम् ॥ २५ ॥

तौ सूतेन परित्यक्तौ कुत्रचिद्विजने वने । अवापतुःपरांपीडांक्षुत्तृड्भ्यांभृशविह्वलौ
सोद्वहन्तीनिजं बालं निपतन्तीपदेपदे । निःश्वसन्तीनिजंकर्मनिन्दन्तीचकिताभृशम्

क्वचित्कण्टकभिन्नाङ्गी मुक्तकेशी भयाऽऽतुरा ।
क्वचिद्व्याघ्रस्वनैर्भीता क्वचिद्व्यालैरनुद्रुता ॥ २८ ॥

अतर्ज्यमाना पिशाचैश्च वेतालैर्ब्रह्मराक्षसैः । महागुल्मेषुधावंतीभिन्नपादाङ्कुराश्मभिः
सैवं घोरे महारण्येभ्रमन्तीनृपगेहिनी । दैवात्प्राप्ता वणिङ्मार्गं गोवाजिनरसेवितम्

गच्छन्ती तेन मार्गेण सुदूरमतियत्नतः । ददर्श वैश्यनगरंबहुस्त्रीनरसेवितम् ॥ ३१ ॥
तस्य गोप्ता महावैश्यो नगरस्य महाजनः । अस्ति पद्माकरो नाम राजराज इवापरः
तस्य वैश्यपतेःकाचिद्गृहदासीनृपाङ्गनाम् । आयान्तींदूरतोदृष्ट्वातदन्तिकमुपाययौ

सा दासी नृपतेः कान्तां सपुत्रां भृशपीडिताम् ।
स्वयं विदितवृत्तान्ता स्वामिने प्रत्यदर्शयत् ॥ ३४ ॥
स तां दृष्ट्वा विशां नाथो रुजार्त्तां क्लिष्टपुत्रकाम् ।
नीत्वा रहसि सुव्यक्तं तद्वृत्तान्तमपृच्छत ॥ ३५ ॥

तयानिवेदिताशेषवृत्तान्तः सवणिक्पतिः । अहोकष्टमितिज्ञात्वानिशश्वासमुहुर्मुहुः
तामन्तिके स्वगेहस्य सन्निवेश्य रहोगृहे । वासोन्नपानशयनैर्मातृसाम्यमपूजयत्
तस्मिन्गृहे नृपवधूर्निवसन्ती सुरक्षिता । व्रणयक्ष्मादिरोगाणां न शान्तिप्रत्यपद्यत

ततो दिनैः कतिपयैः स बालो व्रणपीडितः ।
विलङ्घितभिषक्सत्त्वो ममार च विधेर्वशात् ॥ ३९ ॥

मृते स्वतनये राज्ञीशोकेनमहतावृता । मूर्च्छिताचाऽपतद्भूमौ गजभग्नेववल्लरी ॥ ४०

दैवात्सञ्ज्ञामवाऽप्याथ बाष्पक्लिन्नपयोधरा ।
सान्त्विताऽपि वणिक्स्त्रीभिर्विललाप सुदुःखिता ॥ ४१ ॥

हा ताततातहा पुत्र मम प्राणरक्षक । हा राजकुलपूर्णेन्दो हा ममाऽऽनन्दवर्धन ! ॥

इमामनाथां कृपाणां त्वत्प्राणां त्यक्तबान्धवाम् ।
मातरं ते परित्यज्य क्व यातोऽसि नृपात्मज ॥ ४३ ॥
इत्येभिरुदितैर्वाक्यैः शोकचिन्ताविवर्धकैः ।
विलपन्तीं मृतापत्यां को नु सान्त्वयितुं क्षमः ॥ ४४ ॥
एतस्मिन्समये तस्या दुःखशोकचिकित्सकः ।
ऋषभः पूर्वमाख्यातः शिवयोगी समाययौ ॥ ४५ ॥
स योगी वैश्यनाथेन सार्घहस्तेन पूजितः ।
तस्याः सकाशमगमच्छोचन्त्या इदमब्रवीत् ॥ ४६ ॥

ऋषभ उवाच

अकस्मात्किमहो वत्से! रोरवीषि विमूढधीः ।
को जातः कतमो लोके को मृतो वद साम्प्रतम् ॥ ४७ ॥
अमी देहादयो भावास्तोयफेनसधर्मकाः ।
क्वचिद्भ्रान्तिः क्वचिच्छान्तिः स्थितिर्भवति वा पुनः ॥ ४८ ॥

अतोऽस्मिन्फेनसदृशेदेहेपञ्चत्वमागते । शोकस्यानवकाशत्वान्नशोचन्तिविपश्चितः

गुणैर्भूतानि सृज्यन्ते भ्राम्यन्ते निजकर्मभिः ।
कालेनाऽथ विकृष्यन्ते वासनायां च शेरते ॥ ५० ॥

माययोत्पत्तिमायान्तिगुणाःसत्त्वादयस्त्रयः । तैरेवदेहाजायन्तेजातास्तल्लक्षणाश्रयाः
देवत्वंयाति सत्त्वेन रजसाच मनुष्यताम् । तिर्यक्त्वंतमसा जन्तुर्वासनानुगतोवशः
संसारे वर्तमानेस्मिञ्जन्तुःकर्मानुबन्धनात् । दुर्विभाव्यांगतिंयातिसुखदुःखमयींमुहुः
अपि कल्पायुषां तेषां देवानांतुविपर्ययः । अनेकामयबद्धानांका कथा नरदेहिनाम्

केचिद्वदन्ति देहस्य कालमेव हि कारणम् ।
कर्म केचिद् गुणान्केचिद् देहः साधारणो ह्ययम् ॥ ५५ ॥

कालकर्मगुणाधानं पञ्चात्मकमिदं वपुः । जातं दृष्ट्वानहृष्यन्तिनशोचन्ति मृतं बुधाः
अव्यक्ते जायते जन्तुरव्यक्ते च प्रलीयते । मध्ये व्यक्तवदाभाति जलबुद्बुदसन्निभः
यदा गर्भगतो देहीविनाशःकल्पितस्तदा । दैवाज्जीवति वा जातो म्रियतेसहसैववा
गर्भस्था एव नश्यन्तिजातमात्रास्तथापरे । क्वचिद्युवानोनश्यन्तिम्रियन्तेकेपिवार्धके
यादृशं प्राक्तनंकर्म तादृशं विन्दतेवपुः । भुङ्क्ते तदनुरूपाणि सुखदुःखानि वै ह्यसौ
मायानुभावेरितयोःपित्रोःसुरतसम्भ्रमात् । देहउत्पद्यतेकोपिपुंयोषित्क्लीबलक्षणः
आयुः सुखं च दुःखं च पुण्यं पापंश्रुतंधनम् । ललाटे लिखितंधात्रावहञ्जन्तुःप्रजायते

कर्मणामविलङ्घ्यत्वात्कालस्याप्यनतिक्रमात् ।
अनित्यत्वाच्च भावानां न शोकं कर्तुमर्हसि ॥ ६३ ॥

क्व स्वप्नेनियतंस्थैर्यमिन्द्रजाले क्व सत्यता । क्व नित्यता शरन्मेघे क्वशाश्वत्त्वंकलेवरे

तवजन्मान्यतीतानि शतकोट्ययुतानिच । अजानत्याः परंतत्त्वंसम्प्राप्तोऽयंमहाभ्रमः

कस्य कस्याऽसि तनया जननी कस्य कस्य वा ।
कस्य कस्याऽसि गृहिणी भवकोटिषु वर्त्तिनी ॥ ६६ ॥
पञ्चभूतात्मको देहस्त्वगसृङ्मांसबन्धनः ।
मेदोमज्जास्थिनिचितो विण्मूत्रश्लेष्मभाजनम् ॥ ६७ ॥

शरीरान्तरमप्येतन्निजदेहोद्भवं मलम् । मत्वास्वतनयंमूढेनाशोकंकर्तुमर्हसि ॥ ६८॥ यदि नाम जनः कश्चिन्मृत्युं तरति यत्नतः । कथंतर्हिविपद्येरन्सर्वे पूर्वे विपश्चितः तपसा विद्यया बुद्ध्यामन्त्रौषधिरसायनैः । अतियातिपरंमृत्युनदश्चिदपिपण्डितः एकस्याद्य मृतिर्जन्तोःश्वश्चान्यस्यवरानने !। तस्मादनित्यावयवेनत्वंशोचितुमर्हसि

नित्यं सन्निहितो मृत्युः किं सुखं वद देहिनाम् ।
व्याघ्रे पुरः स्थिते ग्रासःपशूनां किं नु रोचते ॥ ७२ ॥

अतो जन्म जरां जेतुं यदीच्छसि वरानने !। शरणं व्रज सर्वेशं मृत्युंजयमुमापतिम् तावन्मृत्युभयंघोरं तावज्जन्मजराभयम् । यावन्नो याति शरणं देही शिवपदाम्बुजम् अनुभूयेह दुःखानि संसारे भृशदारुणे । मनो यदा वियुज्येत तदाध्येयो महेश्वरः मनसापिबतः पुंसः शिवध्यानरसामृतम् । भूयस्तृष्णा न जायेत संसारविषयासवे विमुक्तं सर्वसङ्गैश्चमनो वैराग्ययन्त्रितम् । यदा शिवपदे मग्नं तदा नास्ति पुनर्भवः तस्मादिदं मनो भद्रे शिवध्यानैकसाधनम् । शोकमोहसमाविष्टं माकुरुष्व शिवं भज

सूत उवाच

इत्थं सानुनयं राज्ञी बोधिता शिवयोगिना ।
प्रत्याचष्ट गुरोस्तस्य प्रणम्य चरणाम्बुजम् ॥ ७६ ॥

राज्ञ्युवाच

भगवन्मृतपुत्रायास्त्यक्तायाः प्रियबन्धुभिः । महारोगातुराया मे का गतिर्मरणं विना अतोऽहं मर्त्तु मिच्छामिसहैव शिशुनाऽमुना । कृतार्थाहंयदद्य त्वामपश्यंमरणोन्मुखी

सूत उवाच

इति तस्या वचः श्रुत्वा शिवयोगी दयानिधिः ।
पूर्वोपकारं संस्मृत्य मृतस्यान्तिकमाययौ ॥ ८२ ॥

सतदाभस्मसंगृह्यशिवमन्त्राभिमन्त्रितम् । विदीर्णेतन्मुखेक्षिप्त्वामृतंप्राणैरयोजयत् सबालः सङ्गतः प्राणैःशनैरुन्मील्य लोचने । प्राप्तपूर्वेन्द्रियबलो रुरोद स्तन्यकांक्षया मृतस्यपुनरुत्थानं वीक्ष्य बालस्य विस्मिताः । जना मुमुदिरेसर्वेनगरेषु पुरोगमाः अथाऽऽनन्दभरा राज्ञी विह्वलोन्मत्तलोचना । जग्राहतनयं शीघ्रंबाष्पव्याकुललोचना उपगुह्य तदा तन्वी परमानन्दनिर्वृता । न वेदात्मानमन्यं वा सुषुप्तेव परिश्रमात् पुनश्च ऋषभोयोगी तयोर्मातृकुमारयोः । विषव्रणयुतं देहं भस्मनैव परामृशत् ॥ तौ च तद्भस्मना स्पृष्टौप्राप्तदिव्यकलेवरौ । देवानां सदृशंरूपं दधतुःकान्तिभूषितम्

सम्प्राप्ते त्रिदिवैश्वर्ये यत्सुखं पुण्यकर्मणाम् ।
तस्माच्छतगुणं प्राप सा राज्ञी सुखमुत्तमम् ॥ ९० ॥

तां पादयोर्निपतिताम्षृषभः प्रेमविह्वलः । उत्थाप्याश्वासयामास दुःखैर्मुक्तामुवाच ह

अयि वत्से! महाराज्ञि! जीव त्वं शाश्वतीः समाः ।
यावज्जीवसि लोकेऽस्मिन्न तावत्प्राप्स्यसे जराम् ॥ ९२ ॥

एषतेतनयःसाध्विभद्रायुरितिनामतः । ख्यातिं यास्यतिलोकेषुनिजंराज्यमवाप्स्यति अस्य वैश्यस्यसदनेतावत्तिष्ठ शुचिस्मिते । यावदेष कुमारस्ते प्राप्तविद्योभविष्यति

सूत उवाच

इतितामृषभो योगीतंचराजकुमारकम् । सञ्जीव्यभस्मवीर्येणययौ देशान्यथेप्सितान्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां तृतीये ब्रह्मोत्तरखण्डे भद्रायुवाख्याने ऋषभयोगिना भद्रायुर्जीवनं नाम दशमोऽध्यायः ॥ १० ॥

———

एकादशोऽध्यायः

भद्रायुम्प्रत्यृषभोपदेशवर्णनम्

सूत उवाच

पिङ्गला नाम या वेश्या मयापूर्वमुदाहृता । शिवभक्तार्चनात्पुण्यात्त्यक्त्वा पूर्वकलेवरम्
चन्द्राङ्गदस्यसाभूयःसीमन्तिन्यामजायत । रूपौदार्यगुणोपेता नाम्नावैकीर्तिमालिनी
भद्रायुरपि तत्रैव राजपुत्रो वणिक्पतेः । ववृधे सदने भानुः शुचाविव महातपाः ॥

तस्यापि वैश्यनाथस्य कुमारस्त्वेक उत्तमः ।
स नाम्ना सुनयः प्रोक्तो राजसूनोः सखाऽभवत् ॥ ४ ॥

तावुभौपरमस्निग्धौ राजवैश्यकुमारकौ । चित्रक्रीडावुदाराङ्गौ रत्नाभरणमण्डितौ

तस्य राजकुमारस्य ब्राह्मणैः स वणिक्पतिः ।
संस्कारान्कारयामास स्वपुत्रस्याऽपि विस्तरात् ॥ ६ ॥

काले कृतोपनयनौ गुरुशुश्रूषणे रतौ । चक्रतुः सर्वविद्यानां संग्रहं विनयान्वितौ ॥
अथ राकुमारस्य प्राप्ते षोडशहायने । स एव ऋषभोयोगी तस्य वेश्मन्युपाययौ
सा राज्ञी स कुमारश्च शिवयोगिनमागतम् । मुहुर्मुहुः प्रणम्योभौ पूजयामासतुर्मुदा
ताभ्यां चपूजितःसोऽथयोगीशोहृष्टमानसः । तं राजपुत्रमुद्दिश्य बभाषेकरुणार्द्रधीः

शिवयोग्युवाच

कच्चित्ते कुशलंतातत्वन्मातुश्चाप्यनामयम् । कच्चित्त्वं सर्वविद्यानामकार्षीश्चप्रतिग्रहम्
कच्चिद्गुरूणां सततं शुश्रूषातत्परोभवान् । कच्चित्स्मरसिमांताततव प्राणप्रदंगुरुम्
एवं वदतियोगीशे राज्ञीसा विनयान्विता । स्वपुत्रं पादयोस्तस्यनिपात्यैनमभाषत
एष पुत्रस्तवगुरो त्वमस्यप्राणदः पिता । एष शिष्यस्तु संग्राह्योभवता करुणात्मना
अतो बन्धुभिरुत्सृष्टमनाथं परिपालय । अस्मै सम्यक्सतांमार्गमुपदेष्टुं त्वमर्हसि ॥

इति प्रसादितो राज्ञ्या शिवयोगी महामतिः ।

तस्मै राजकुमाराय सन्मार्गमुपदिष्टवान् ॥ १६ ॥

ऋषभ उवाच

श्रुतिस्मृतिपुराणेषु प्रोक्तो धर्मः सनातनः । वर्णाश्रमानुरूपेण निषेव्यः सर्वदा जनैः
भज वत्स! सतां मार्गं सदेवचरितं चर । न देवाज्ञा विलङ्घ्येथा मा कार्षीर्देवहेलनम्
गोदेवगुरुविप्रेषु भक्तिमान्भवसर्वदा । चाण्डालमपि सम्प्राप्तंसदासम्भावयातिथिम्
सत्यं न त्यज सर्वत्र प्राप्तेऽपिप्राणसङ्कटे । गोब्राह्मणानां रक्षार्थमसत्यं त्वंवदक्वचित्
परस्वेषु परस्त्रीषु देवब्राह्मणवस्तुषु । तृष्णां त्यज महाबाहो दुर्लभेष्वपि वस्तुषु
सत्कथायां सदाचारे सद्व्रते च सदागमे । धर्मादिसंग्रहे नित्यं तृष्णां कुरुमहामते
स्नाने जपे च होमे च स्वाध्यायेपितृतर्पणे । गोदेवातिथिपूजासुनिरालस्योभवानघ
क्रोधं द्वेषं भयं शाठ्यं पैशुन्यमसदाग्रहम् । कौटिल्यंदम्भमुद्वेगं यत्नेन परिवर्जय
क्षात्रधर्मरतोऽपि त्वं वृथा हिंसां परित्यज । शुष्कवैरं वृथालापं परनिन्दां च वर्जय
मृगयाद्यूतपानेषु स्त्रीषु स्त्रीविजितेषु च । अत्याहारमतिक्रोधमतिनिद्रामतिश्रमम्

अत्यालापमतिक्रीडां सर्वदा परिवर्जय ॥ २७ ॥
अतिविद्यामतिश्रद्धामतिपुण्यमतिस्मृतिम् ।
अत्युत्साहमतिख्यातिमतिधैर्यं च साधय ॥ २८ ॥

सकामो निजदारेषु सक्रोधो निजशत्रुषु । सलोभः पुण्यनिचयेसाभ्यसूयोह्यधर्मिषु
सद्वेषो भव पाखण्डे सरागः सज्जनेषु च । दुर्बोधो भव दुर्मन्त्रे बधिरःपिशुनोक्तिषु
धूर्तं चण्डं शठं क्रूरं कितवं चपलं खलम् । पतितं नास्तिकं जिह्मं दूरतः परिवर्जय
आत्मप्रशंसांमा कार्षीः परिज्ञातेङ्गितो भव । धने सर्वकुटुम्बे चनात्यासक्तःसदा भव
पत्न्याः पतिव्रतायाश्च जनन्याः श्वशुरस्यच । सतां गुरोश्च वचनेविश्वासंकुरुसर्वदा
आत्मरक्षापरो नित्यमप्रमत्तो दृढव्रतः । विश्वासंनैवकुर्वीथाःस्वभृत्येष्वपिकुत्रचित्

विश्वस्तं मा वधीः कञ्चिदपि चोरं महामते!।
अपापेषु न शङ्केथाः सत्यान्न चलितो भव ॥ ३५ ॥
अनाथं कृपणं वृद्धं स्त्रियं बालं निरागसम् ।

परिरक्ष धनैः प्राणैर्बुद्ध्या शक्तया बलेन च ॥ ३६ ॥

अपि शत्रुं वधस्याहँ मा वधीः शरणागतम् ।

अप्यपात्रं सुपात्रं वा नीचो वापि महत्तमः ॥ ३७ ॥

योवाकोवापियाचेततस्मै देहि शिरोपि च । अपि यत्नेन महता कीर्तिमेव सदार्जय

राज्ञां च विदुषां चैव कीर्तिरेव हि भूषणम् ।

सत्कीर्तिप्रभवाः लक्ष्मीः पुण्यं सत्कीर्तिसंभवम् ॥ ३६ ॥

सत्कीर्त्या राजते लोकश्चन्द्रश्चन्द्रिकयायथा । गजाश्वहेमनिचयं रत्नराशिनगोपमम्

अकीर्त्त्योपहतं सर्वंतृणवन्मुञ्च सत्वरम् । मातुः कोपंपितुःकोपंगुरोःकोपंधनव्ययम्

पुत्राणामपराधं च ब्राह्मणानांक्षमस्वभोः । यथाद्विजप्रसादःस्यात्तथातेषां हितंचर

राजानं संकटे मग्नमुद्धरेयुर्द्विजोत्तमाः । आयुर्यशो बलं सौख्यं धनं पुण्यंप्रजोन्नतिः

कर्मणा येन जायेत तत्सेव्यं भवता सदा । देशं कालं च शक्तिं चकार्यंचाकार्यमेवच

सम्यग्विचार्य यत्नेन कुरु कार्यं च सर्वदा ।

न कुर्याः कस्यचिद्बाधां परद्बाधां निवारय ॥ ४५ ॥

चोरान्दुष्टांश्चबाधेथाःसुनात्याशक्तिमत्तया । स्नाने जपे च होमे चदैवेपित्र्येचकर्मणि

अत्वरो भव निद्रायां भोजने भव सत्वरः । दाक्षिण्ययुक्तमशठं सत्यं जनमनोहरम्

अल्पाक्षरमनन्तार्थं वाक्यं ब्रूहि महामते । अभीतो भव सर्वत्र विपक्षेषु विपत्सु च

भीतो भवब्रह्मकुलेनपापेगुरुशासने । ज्ञातिबन्धुषु विप्रेषु भार्यासु तनयेषु च ॥ ४६॥

समभावेन वर्तथास्तथा भोजनपङ्क्तिषु । सतां हितोपदेशेषु तथा पुण्यकथासु च

विद्यागोष्ठीषु धर्म्यासु कचिन्मा भूः पराङ्मुखः ।

शुचौ पुण्यजनस्याऽन्ते प्रख्याते ब्रह्मसङ्कुले ॥ ५१ ॥

महादेशे शिवमयेवस्तव्यं भवता सदा । कुलटा गणिका यत्रयत्र तिष्ठति कामुकः

दुर्देशे नीचसम्बाधे कदाचिदपि मा वस । एकमेवाश्रितोऽपि त्वंशिवंत्रिभुवनेश्वरम्

सर्वान्देवानुपासीथास्तद्दिनानि च मानयन् ।

सदा शुचिः सदा दक्षः सदा शान्तः सदा स्थिरः ॥ ५४ ॥

सदा विजितषड्वर्गः सदैकान्तो भवाऽनघ !।

विप्रान्वेदविदः शान्तान्यतींश्च नियतोज्ज्वलान् ॥ ५५ ॥

युग्मम्

पुण्यवृक्षान्पुण्यनदीः पुण्यतीर्थं महत्सरः । धेनुं च वृषभं रत्नं युवतीं चपतिव्रताम्

आत्मनो गृहदेवांश्च सहसैव नमस्कुरु । उत्थाय समये ब्राह्मेस्वाचम्यविमलाशयः

नमस्कृत्यात्मगुरुवेध्यात्वादेवमुमापतिम् । नारायणंचलक्ष्मीशंब्रह्माणंचविनायकम्

स्कन्दं कात्यायनीं देशीं महालक्ष्मीं सरस्वतीम् ।

इन्द्रादीनथ लोकेशान्पुण्यश्लोकानृषीनपि ॥ ५६ ॥

चिन्तयित्वाऽथमार्त्तण्डमुद्यन्तंप्रणमेत्सदा । गन्धंपुष्पंचताम्बूलंशाकंपक्कफलादिकम्

शिवाय दत्त्वोपभुङ्क्ष्व भक्ष्यं भोज्यं प्रियं नवम् ।

यद्दत्तं यत्कृतं जप्तं यत्स्नातं यद्धुतं स्मृतम् ॥ ६१ ॥

यच्च तप्तं तपः सर्वं तच्छिवाय निवेदय । भुञ्जानश्च पठन्वापि शयानो विहरन्नपि

पश्यञ्शृण्वन्वदन्गृह्णञ्छिवमेवानुचिन्तय ॥ ६२ ॥

रुद्राक्षकंकणलसत्करदण्डयुग्मो मालान्तरालधृतभस्मसितत्रिपुण्ड्रः ।

पञ्चाक्षरं परिपठन्परमन्त्रराजं ध्यायन्सदा पशुपतेश्चरणं रमेथाः ॥ ६३ ॥

इति संक्षेपतो वत्स! कथितो धर्मसंग्रहः । अन्येषु च पुराणेषु विस्तरेण प्रकीर्त्तितः

अथाऽपरं सर्वपुराणगुह्यं निःशेषपापौघहरं पवित्रम् ।

जयप्रदं सर्वविपद्विमोचनं वक्ष्यामि शैवं कवचं हिताय ते ॥ ६५ ॥

इति श्रीस्कन्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मोत्तरखण्डे

भद्रायुम्प्रति ऋषभोपदेशवर्णनं नामैकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः

ऋषभेणशिवकवचकथनम्

ऋषभ उवाच

नमस्कृत्य महादेवंविश्वव्यापिनमीश्वरम् । वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम्

शुचौ देशे समासीनो यथावत्कल्पितासनः ।
जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम् ॥ २ ॥
हृत्पुण्डरीकान्तरसन्निविष्टं स्वतेजसा व्याप्तनभोवकाशम् ॥
अतीन्द्रियं सूक्ष्ममनन्तमाद्यं ध्यायेत्परानन्दमयं महेशम् ॥ ३ ॥
ध्यानावधूताखिलकर्मबन्धश्चिरं चिदानन्दनिमग्नचेताः ।
षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम् ॥ ४ ॥
मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे ।
तन्नाम दिव्यं वरमन्त्रमूलं धुनोति मे सर्वमघं हृदिस्थम् ॥ ५ ॥
सर्वत्र मां रक्षतु विश्वमूर्त्तिर्ज्योतिर्मयानन्दघनश्चिदात्मा ।
अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥ ६ ॥
यो भूस्वरूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोऽष्टमूर्त्तिः ।
योऽपां स्वरूपेण नृणां करोति सञ्जीवनं सोऽवतु मां जलेभ्यः ॥ ७ ॥
कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः ।
स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादिभीतेरखिलाच्च तापात् ॥ ८ ॥
प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः ।
चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितं रक्षतु मामजस्रम् ॥ ९ ॥
कुठारवेदाङ्कुशपाशशूलकपालढक्काक्षगुणान्दधानः ।
चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम् ॥१० ॥

कुन्देन्दुशङ्खस्फटिकावभासो वेदाक्षमालावरदाभयाङ्कः ।
त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योऽधिजातोऽवतु मां प्रतीच्याम् ॥ ११ ॥
वराक्षमालाभयटङ्कहस्तः सरोजकिञ्जल्कसमानवर्णः ।
त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः ॥ १२ ॥
वेदाभयेष्टाङ्कुशटङ्कपाशकपालढक्काक्षकशूलपाणिः ।
सितद्युतिः पञ्चमुखोऽवतान्मामीशान ऊर्द्ध्वं परमप्रकाशः ॥ १३ ॥
मूर्धानमव्यान्मम चन्द्रमौलिर्भालं ममाव्यादथ भालनेत्रः ।
नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ॥ १४ ॥
पायाच्छ्रुती मे श्रुतिगीतकीर्त्तिः कपोलमव्यात्सततं कपाली ।
वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥ १५ ॥
कण्ठं गिरीशोऽवतु नीलकण्ठः पाणिद्वयं पातु पिनाकपाणिः ।
दोर्मूलमव्यान्मम धर्मबाहुर्वक्षःस्थलं दक्षमखान्तकोऽव्यात् ॥ १६ ॥
ममोदरं पातु गिरीन्द्रधन्वा मध्यं ममाव्यान्मदनान्तकारी ।
हेरम्बतातो मम पातुनाभिं पायात्कटी धूर्जटिरीश्वरो मे ॥ १७ ॥
उरुद्वयं पातु कुबेरमित्रो जानुद्वयं मे जगदीश्वरोऽव्यात् ।
जङ्घायुगं पुङ्गवकेतुरव्यात्पादौ ममाऽव्यात्सुरवन्द्यपादः ॥ १८ ॥
महेश्वरः पातु दिनादियामे मां मध्ययामेऽवतु वामदेवः ।
त्रियम्बकः पातु तृतीययामे वृषध्वजः पातु दिनान्त्ययामे ॥ १९ ॥
पायान्निशादौ शशिशेखरो मां गङ्गाधरो रक्षतु मां निशीथे ।
गौरीपतिः पातु निशावसाने मृत्युञ्जयो रक्षतु सर्वकालम् ॥ २० ॥
अन्तःस्थितं रक्षतु शङ्करो मां स्थाणुः सदा पातु बहिःस्थितं माम् ।
तदन्तरे पातु पतिः पशूनां सदा शिवो रक्षतु मां समन्तात् ॥ २१ ॥
तिष्ठन्तमव्याद्भुवनैकनाथः पायाद्व्रजन्तं प्रमथाधिनाथः ।
वेदान्तवेद्योऽवतु मान्निषण्णं मामव्ययः पातु शिवः शयानम् ॥ २२ ॥

मार्गेषु मां रक्षतु नीलकण्ठः शैलादिदुर्गेषु पुरत्रयारिः ।
अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तिः ॥ २३ ॥
कल्पान्तकाटोपपटुप्रकोपः स्फुटाट्टहासोच्चलिताण्डकोशः ।
घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः ॥ २४ ॥
पत्त्यश्वमातङ्गघटावरूथसहस्रलक्षायुतकोटिभीषणम् ।
अक्षौहिणीनां शतमाततायिनां छिन्द्यान्मृडो घोरकुठारधारया ॥ २५ ॥
निहन्तु दस्यून्प्रलयानलर्चिर्ज्वलत्त्रिशूलं त्रिपुरान्तकस्य ।
शार्दूलसिंहर्क्षवृकादिहिंस्रान्सन्त्रासयत्वीशधनुः पिनाकम् ॥ २६ ॥
दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि ।
उत्पाततापविषभीतिमसद्ग्रहार्तिव्याधींश्च नाशयतु मे जगतामधीशः ॥ २७ ॥
ॐनमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सकलतत्त्वविहाराय सकललोकैककर्त्रे सकललोकैकभर्त्रे सकललोकैकहर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकलनिगमगुह्याय सकलवरप्रदाय सकलदुरितार्तिभञ्जनाय सकलजगदभयङ्कराय सकललोकैकशङ्कराय शशाङ्कशेखराय शाश्वतनिजाभासाय निर्गुणाय निरुपमाय नीरूपाय निराभासाय निरामयाय निष्प्रपञ्चाय निष्कलङ्काय निर्द्वन्द्वाय निःसङ्गाय निर्मलाय निर्गमाय नित्यरूपविभवाय निरुपमविभवाय निराधाराय नित्यशुद्धबुद्धपरिपूर्णसच्चिदानन्दाद्वयायपरमशान्तप्रकाशतेजोरूपायजयजय महारुद्र! महारौद्र! भद्रावतार! दुःखदावदारण! महाभैरव! कालभैरव! कल्पान्तभैरव! कपालमालाधर! खट्वाङ्गखड्गचर्मपाशाङ्कुशडमरुशूलचापबाणगदाशक्तिभिण्डिपालतोमरमुसलमुद्गरपट्टिशपरशुपरिघभुशुण्डीशतघ्नीचक्राद्यायुधभीषणकरसहस्र!मुखदंष्ट्राकराल!विकटाट्टहासविस्फारितब्रह्माण्डमण्डलनागेन्द्रकुण्डल! नागेन्द्रहार! नागेन्द्रचर्मधर!मृत्युञ्जय!त्र्यम्बक!त्रिपुरान्तक!विरूपाक्ष!विश्वेश्वर! विश्वरूप! वृषभवाहन! विषभूषण! विश्वतोमुख! सर्वतो रक्षरक्ष मां

ज्वलज्वल महामृत्युभयमपमृत्युभयं नाशयनाशय रोगभयमुत्सादयोत्सादय विषसर्पभयं शमय शमय चोरभयं मारयमारय मम शत्रूनुच्चाटयोच्चाटय शूलेन विदारय विदारयकुठारेण भिन्धिभिन्धि खड्गेन छिन्धिछिन्धि खट्वाङ्गेन विपोथय विपोथय मुसलेन निष्पेषयनिष्पेषय बाणैः सन्ताडय सन्ताडय रक्षांसि भीषयभीषयभूतानि विद्रावयविद्रावय कूष्माण्डवेतालमारीगणब्रह्मराक्षसान्सन्त्रासयसन्त्रासयममाऽभयं कुरुकुरु वित्रस्तंमामाश्वासयाऽऽश्वासय नरकभयान्मामुद्धारयोद्धारयसञ्जीवयसञ्जीवयक्षुत्तृड्भ्यां मामाप्याययाप्याययदुःखातुरंमामानन्दयाऽऽनन्दयशिवकवचेन मामाच्छादयाऽऽच्छादय त्र्यम्बक! सदाशिव! नमस्ते नमस्ते नमस्ते ।

ऋषभ उवाच

इत्येतत्कवचं शैवं वरदं व्याहृतं मया । सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनाम् ॥ २८
यः सदा धारयेन्मर्त्यःशैवं कवचमुत्तमम् । नतस्य जायते क्वापिभयं शम्भोरनुग्रहात्
क्षीणायुर्मृत्युमापन्नो महारोगहतोऽपि वा ।
सद्यः सुखमवाप्नोति दीर्घमायुश्च विन्दति ॥ ३० ॥
सर्वदारिद्र्यशमनं सौमङ्गल्यविवर्धनम् । यो धत्ते कवचं शैवं स देवैरपि पूज्यते ॥
महापातकसङ्घातैर्मुच्यते चोपपातकैः । देहान्ते शिवमाप्नोति शिववर्मानुभावतः ॥
त्वमपि श्रद्धया वत्सशैवंकवचमुत्तमम् । धारयस्व मयादत्तं सद्यःश्रेयोह्यवाप्स्यसि

सूत उवाच

इत्युक्त्वा ऋषभोयोगी तस्मैपार्थिवसूनवे । ददौ शङ्खंमहारावंखड्गंचारिनिषूदनम्
पुनश्च भस्म सम्मन्त्र्य तदङ्गं सर्वतोऽस्पृशत् ।
गजानां षट्सहस्रस्य द्विगुणश्च बलं ददौ ॥ ३५ ॥
भस्मप्रभावात्सम्प्राप्य बलैश्वर्यधृतिस्मृतीः । स राजपुत्रः शुशुभे शरदर्क इवश्रिया
तमाह प्राञ्जलिंभूयः स योगीराजनन्दनम् । एष खड्गोमयादत्तस्तपोमन्त्रानुभावतः
शितधारमिमं खड्गं यस्मै दर्शयसि स्फुटम् ।

स सद्यो म्रियते शत्रुः साक्षान्मृत्युरपि स्वयम् ॥ ३८ ॥
अस्य शङ्खस्य निह्रादं ये शृण्वन्ति तवाऽहिताः ।
ते मूर्च्छिताः भविष्यन्ति न्यस्तशस्त्रा विचेतनाः ॥ ३९ ॥
खड्गशङ्खाविमौ दिव्यौ परसैन्यविनाशिनौ ।
आत्मसैन्यस्वपक्षाणां शौर्यतेजोविवर्धनौ ॥ ४० ॥
एतयोश्च प्रभावेण शैवेन कवचेन च । द्विषट्सहस्रनागानां बलेन महताऽपि च ॥४१
भस्मधारणसामर्थ्याच्छत्रुसैन्यं विजेष्यसि ।
प्राप्य सिंहासनं पैत्र्यं गोप्तासि पृथिवीमिमाम् ॥ ४२ ॥
इति भद्रायुषं सम्यगनुशास्य समातृकम् ।
ताभ्यां सम्पूजितः सोऽथ योगी स्वैरगतिर्ययौ ॥ ४३ ॥
इतिश्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे सीमन्तिनीमाहात्म्ये भद्रायूपाख्याने शिवकवचकथनं नाम द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

भद्रायुविवाहवर्णनम्

सूत उवाच

दशार्णाधिपतेस्तस्य वज्रबाहोर्महाभुजः । बभूव शत्रुर्बलवान्राजा मगधराट् ततः ॥
स वै हेमरथो नाम बाहुशाली रणोत्कटः । बलेन महताऽऽवृत्यदशार्णं न्यरुधद्बली
चमूपास्तस्य दुर्धर्षाः प्राप्यदेशंदशार्णकम् । व्यलुम्पन्वसुरत्नानि गृहाणि ददहुःपरे
केचिद्धनानि जगृहुः केचिद् बालान्स्त्रियोऽपरे ।
गोधनान्यपरेऽगृह्णन्केचिद्धान्यपरिच्छदान् ॥

केचिदारामसस्यानि गृहोद्यानान्यनाशयन् ॥ ४ ॥
एवं विनाश्य तद्राज्यं स्त्रीगोधनजिघृक्षवः ।आवृत्य तस्यनगरीं वज्रबाहोस्तुमागधः
एवं पर्याकुलंवीक्ष्य राजा नगरमेव च । युद्धाय निर्जगामाशु वज्रबाहुः स सैनिकः
वज्रबाहुश्चभूपालस्तथामन्त्रिपुरःसराः । युयुधुर्मागधैःसार्धं निजघ्नुः शत्रुवाहिनीम्
वज्रबाहुर्महेष्वासो दंशितो रथमास्थितः । विकिरन्बाणवर्षाणि चकार कदनंमहत्
दशार्णराजं युध्यन्तं दृष्ट्वा युद्धे सुदुःसहम् ।
तमेव तरसा वव्रुः सर्वे मागधसैनिकाः ॥ ६ ॥
कृत्वा तु सुचिरंयुद्धं मागधाद्दृढविक्रमाः । तत्सैन्यं नाशयामासुर्लेभिरेचजयश्रियम्
केचित्तस्य रथं जघ्नुः केचित्तद्धनुराच्छिनन् ।
सूतं तस्य जघानैकस्त्वपरः खड्गमाच्छिनत् ॥ ११ ॥
सञ्छिन्नखड्गधन्वानंविरथंहतसारथिम् । बलाद्गृहीत्वाबलिनो बबन्धुर्नृपतिरुषा
तस्यमन्त्रिगणंसर्वंतत्सैन्यंचविजित्यते । मागधास्तस्यनगरीं विविशुर्जयकाशिनः
अश्वान्नरान्गजानुष्ट्रान्पशूंश्चैव धनानि च । जगृहुर्युवतीः सर्वाश्चाङ्गनाश्चैवकन्यकाः
राज्ञो बबन्धुर्महिषीर्दासीश्चैव सहस्रशः । कोशञ्च रत्नसम्पूर्णं जह्रुतेऽप्याततायिनः ॥
एवं विनाश्य नगरीं हृत्वा स्त्रीगोधनादिकम् ।
वज्रबाहुं बलाद् बद्ध्वा रथे स्थाप्य विनिर्ययुः ॥ १६ ॥
एवं कोलाहले जाते राष्ट्रनाशे च दारुणे । राजपुत्रोऽथभद्रायुस्तद्वार्तामश्रृणोद्बली
पितरं शत्रुनिर्बद्धं पितृपत्नीस्तथाहृताः । नष्टं दशार्णराष्ट्रञ्च श्रुत्वा चुक्रोश सिंहवत्
स खड्गशङ्खावादायवैश्यपुत्रसहायवान् । दंशितो हयमारुह्य कुमारो विजिगीषया
जवेनागत्य तं देशं मागधैरभिपूरितम् । दह्यमानं क्रन्दमानं हृतस्त्रीसुतगोधनम् ॥
दृष्ट्वा राजजनं सर्वं राज्यं शून्यं भयाकुलम् ।
क्रोधाध्मातमनास्तूर्णं प्रविश्य रिपुवाहिनीम् ॥
आकर्णाकृष्टकोदण्डो ववर्ष शरसन्ततीः ॥ २१ ॥
ते हन्यमाना रिपवो राजपुत्रेण सायकैः । तमभिद्रुत्य वेगेन शरैर्विव्यधुरुल्बणैः ॥

हन्यमानोऽस्त्रपूगेन रिपुभिर्युद्धदुर्मदैः । न चचाल रणे धीरः शिववर्माभिरक्षितः ॥
सोऽस्त्रवर्षं प्रसह्याशु प्रविश्य गजलीलया । जघानाशु रथान्नागान्पदातीनपिभूरिशः
तत्रैकं रथिनं हत्वा ससूतं नृपनन्दनः । तमेव रथमास्थाय वैश्यनन्दनसारथिः ॥
विचचार रणे धीरः सिंहो मृगकुलं यथा ॥ २५ ॥
अथ सर्वे सुसंरब्धाः शूराः प्रोद्यतकार्मुकाः । अभिसस्रुस्तमेवैकंचमूपा बलशालिनः
तेषामापततामग्रे खड्गमुद्यम्य दारुणम् । अभ्युद्ययौ महावीरान्दर्शयन्निव पौरुषम्
करालान्तकजिह्वाभं तस्य खड्गं महोज्ज्वलम् ।
दृष्ट्वैव सहसा मम्रुश्चमूपास्तत्प्रभावतः ॥ २८ ॥
येयेपश्यन्ति तं खड्गं प्रस्फुरन्तं रणाङ्गणे । ते सर्वे निधनंजग्मुर्वज्रं प्राप्येवकीटकाः
अथासौ सर्वसैन्यानांविनाशायमहाभुजः । शङ्खं दध्मौ महारावं पूरयन्निव रोदसी
तेन शङ्खनिनादेन विषाक्तेनैव भूयसा । श्रुतमात्रेण रिपवो मूर्च्छिताः पतिता भुवि
येऽश्वपृष्ठेरथे ये चयेचदन्तिषुसंस्थिताः । ते विसञ्ज्ञाः क्षणात्पेतुःशङ्खनादहतौजसः
तान्भूमौ पतितान्सर्वान्नष्टसंज्ञान्निरायुधान् ।
विगणय्य शवप्रायान्नावधीद्धर्मशास्त्रवित् ॥ ३३ ॥
आत्मनःपितरंबद्धंमोचयित्वारणाजिरे । तत्पत्नीःशत्रुवशगाःसर्वाःसद्योव्यमोचयत्
पत्नीश्च मन्त्रिमुख्यानां तथाऽन्येषां पुरौकसाम् ।
स्त्रियो बालांश्च कन्याश्च गोधनादीन्यनेकशः ॥ ३६ ॥
मोचयित्वा रिपुभयात्तमाश्वासयदाकुलः । अथारिसैन्येषुचरंस्तेषां जग्राह योषितः
मरुन्मनोजवानश्वान्मातङ्गान्गिरिसन्निभान् ।
स्यन्दनानि च रौक्माणि दासीश्च रुचिराननाः ॥ ३७ ॥
युग्मम्
सर्वमाहृत्य वेगेन गृहीत्वा तद्धनं बहु । मागधेशं हेमरथं निर्ववन्ध पराजितम् ॥
तन्मन्त्रिणश्च भूपांश्च तत्र मुख्यांश्च नायकान् ।
गृहीत्वा तरसा बद्ध्वा पुरीं प्रावेशयद् द्रुतम् ॥ ३६ ॥

पूर्वयेसमरेभग्नाविवृत्ताःसर्वतोदिशम् । ते मन्त्रिमुख्याविश्वस्तानायकाश्चसमाययुः
कुमारविक्रमं दृष्ट्वा सर्वे विस्मितमानसाः । तं मेनिरे सुरश्रेष्ठं कारणादागतं भुवम् ॥
अहोनः सुमहाभाग्यमहोनस्तपसःफलम् । केनाप्यनेन वीरेण मृताः सञ्जीविताःखलु
एष किं योगसिद्धोवा तपः सिद्धोऽथवाऽमरः । अमानुषमिदंकर्म यदनेन कृतं महत्
नूनमस्य भवेन्माता सा गौरीति शिवः पिता ।
अक्षौहिणीनां नवकं जिगायाऽनन्तशक्तिधृक् ॥ ४४ ॥
इत्याश्चर्ययुतैर्हृष्टैः प्रशंसद्भिः परस्परम् । पृष्टोऽमात्यजनेनासावात्मानं प्राह तत्त्वतः
समागतं स्वपितरं विस्मयाह्लादविप्लुतम् । मुञ्चन्तमानन्दजलं ववन्दे प्रेमविह्वलः
स राजा निजपुत्रेण प्रणयादभिवन्दितः । आश्लिष्य गाढं तरसा बभाषे प्रेमकातरः
कस्त्वं देवो मनुष्यो वा गन्धर्वो वा महामते !।
का माता जनकः को वा को देशस्तव तव नाम किम् ॥ ४८ ॥
कस्मान्नःशत्रुभिर्बद्धान्मृतानिवहतौजसः। कारुण्यादिहसम्प्राप्यसपत्नीकान्मुमोचयः
कुतो लब्धमिदंशौर्यंधैर्यंतेजोबलोन्नतिः । जिगीषसीवलोकांस्त्रीन्सदेवासुरमानुषान्
अपि जन्मसहस्रेण तवानृण्यं महौजसः । कर्तुं नाहं समर्थोस्मि सहैभिर्दारबान्धवैः
इमान्पुत्रानिमाः पत्नीरिदं राज्यमिदंपुरम् । सर्वं विहायमच्चित्तं त्वय्येव प्रेमबन्धनम्
सर्वं कथय मे तात! मत्प्राणपरिरक्षक !। एतासांममपत्नीनां त्वदधीनंहिजीवितम्

सूत उवाच

इति पृष्टः स भद्रायुः स्वपित्रा तमभाषत । एष वैश्यसुतो राजन्सुनयोनाममत्सखा
अहमस्य गृहे रम्ये वसामि सहमातृकः । भद्रायुर्नाम तद्वृत्तं पश्चाद्विज्ञापयामि ते
पुरं प्रविश्य भद्रंते सदारःससुहृज्जनः । त्यक्त्वाभयमरातिभ्योविहरस्वयथासुखम्
नेतान्मुञ्च रिपूंस्तावद्यावदागमनं मम । अहमद्य गमिष्यामि शीघ्रमात्मनिवेशनम्
इत्युक्त्वा नृपमामन्त्र्य भद्रायुर्नृपनन्दनः । आजगामस्वभवनं मात्रे सर्वं न्यवेदयत्
सापिहृष्टास्वतनयंपरिरेभेऽश्रुलोचना । स च वैश्यपतिःप्रेम्णापरिष्वज्याभ्यपूजयत्
वज्रबाहुश्च राजेन्द्रः प्रविष्टो निजमन्दिरम् ।

स्त्रीपुत्रामात्यसहितः प्रहर्षमतुलं ययौ ॥ ६० ॥
तस्यां निशायां व्युष्टायामृषभो योगिनां वरः ।
चन्द्राङ्गदं समागत्य सीमन्तिन्याः पतिं नृपम् ॥ ६१ ॥
भद्रायुषः समुत्पत्तिं तस्य कर्माप्यमानुषम् ।
आवेद्य रहसि प्रेम्णा त्वत्सुतां कीर्त्तिमालिनीम् ॥ ६२ ॥
भद्रायुषेप्रयच्छेतिबोधयित्वाच नैषधम् । ऋषभोनिर्जगामाथ देशकालार्थतत्त्ववित्

विशेषकम्

अथ चन्द्राङ्गदोराजा मुहूर्त्तेमङ्गलोचिते । भद्रायुषंसमाहूयप्रायच्छत्कीर्त्तिमालिनीम्
कृतोद्वाहः स राजेन्द्रतनयः सह भार्यया । हेमासनस्थः शुशुभे रोहिण्येव निशाकरः
वज्रबाहुं तत्पितरं समाहूय स नैषधः ।
पुरं प्रवेश्य सामात्यः प्रत्युद्गम्याऽभ्यपूजयत् ॥ ६६ ॥
तत्रापश्यत्कृतोद्वाहं भद्रायुषमरिन्दमम् । पादयोः पतितं प्रेम्णा हर्षात्तं परिषस्वजे
एष मे प्राणदो वीर एष शत्रुनिषूदनः । अथाप्यज्ञातवंशोऽयं मयाऽनन्तपराक्रमः ॥
एष ते नृप जामाता चन्द्राङ्गद महाबलः ।
अस्य वंशमथोत्पत्तिं श्रोतुमिच्छामि तत्त्वतः ॥ ६६ ॥
इत्थं दशार्णराजेन प्रार्थितो निषधाधिपः । विविक्त उपसंगम्य प्रहसन्निदमब्रवीत् ॥
एष ते तनयो राजञ्छैशवे रोगपीडितः । त्वया वने परित्यक्तः सह मात्रा रुजार्तया
परिभ्रमन्ति विपिने सा नारी शिशुनाऽमुना ।
दैवाद्वैश्यगृहं प्राप्ता तेन वैश्येन रक्षिता ॥ ७२ ॥
अथासौ बहुरोगार्तो मृतस्तव कुमारकः । केनापि योगिराजेन मृतः सञ्जीवितःपुनः
ऋषभाख्यस्य तस्यैव प्रभावाच्छिवयोगिनः ।
रूपञ्च देवसदृश प्राप्तौ मातृकुमारकौ ॥ ७४ ॥
तेन दत्तेन खड्गेन शङ्खेन रिपुघातिना । जिगाय समरे शत्रूञ्छिववर्माभिरक्षितः ॥
द्विषट्सहस्रनागानां बलमेको बिभर्त्यसौ ।

सर्वविद्यासु निष्णातो मम जामातृतां गतः ॥ ७६ ॥
अतएनंसमादायमातरंचास्यसुव्रताम् । गच्छस्वनगरींराजन्प्राप्स्यसि श्रेयउत्तमम्
इति चन्द्राङ्गदः सर्वमाख्यायाऽन्तर्गृहे स्थिताम् ।
तस्याग्रपत्नीमाहूय दर्शयामास भूषिताम् ॥ ७८ ॥
इत्यादिसर्वमाकर्ण्यदृष्ट्वाच स महीमतिः । व्रीडितोनितरां मौढ्यात्स्वकृतंकर्मगर्हयन्
प्रातश्च परमानन्दं तयोर्दर्शनकौतुकात् । पुलकाङ्कितसर्वाङ्गस्तावुभौ परिषस्वजे ॥

युग्मम्

एवंनिषधराजेनपूजितश्चाभिनन्दितः । सभोजयित्वातं सम्यक्स्वयञ्चसहमन्त्रिभिः
तामात्मनोग्रमहिषीं पुत्रं तमपितां स्नुषाम् । आदायसपरिवारो वज्रबाहुःपुरीं ययौ
स सम्भ्रमेणमहताभद्रायुः पितृमन्दिरम् । सम्प्राप्यपरमानन्दं चक्रे :सर्वपुरौकसाम्
कालेन दिवमारूढे पितरि प्राप्तयौवनः ।
भद्रायुः पृथिवीं सर्वां शशासाद्भुतविक्रमः ॥ ८४ ॥
मागधेशं हेमरथंमोचयामास बन्धनात् । सन्धायमैत्रींपरमां ब्रह्मर्षीणां च सन्निधौ
इत्थं त्रिलोकमहितां शिवयोगिपूजां कृत्वा पुरातनभवेऽपिस राजसूनुः ।
निस्तीर्य दुःसहविपद्गणमाप्तराज्यश्चन्द्राङ्गदस्य सुतया सह साधु रेमे ॥ ८६ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे
भद्रायुविवाहकथनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः

भद्रायुशिवप्रसादकथनम्

सूत उवाच

प्राप्तसिंहासनो वीरो भद्रायुः स महीपतिः । प्रविवेश वनं रम्यं कदाचिद्भार्यया सह
तस्मिन्विकसिताशोकप्रसूननवपल्लवे । प्रोत्फुल्लमल्लिकाखण्डकूजद्भ्रमरसङ्कुले ॥२॥
नवकेसरसौरभ्यबद्धरागिजनोत्सवे । सद्यः कोरकिताशोकतमालगहनान्तरे ॥ ३ ॥
प्रसूनप्रकरानम्रमाधवीवनमण्डपे । प्रवालकुसुमोद्द्योतचूतशाखिभिरञ्चिते ॥ ४ ॥

पुन्नागवनविभ्रान्तपुंस्कोकिलविराविणि ।

वसन्तसमये रम्ये विजहार स्त्रिया सह ॥ ५ ॥

अथाविदूरे क्रोशन्तौधावन्तौद्विजदम्पती । अन्वीयमानौ व्याघ्रेण ददर्श नृपसत्तमः
पाहिपाहि महाराज! हा राजन्करुणानिधे !। एष धावति शार्दूलोजग्धुमावांमहारयः
एष पर्वतसङ्काशः सर्वप्राणिभयङ्करः । यावन्न खादति प्राप्य तावन्नौ रक्ष भूपते ॥
इत्थमाक्रन्दितंश्रुत्वा स राजाधनुराददे । तावदागत्यशार्दूलो मध्ये जग्राहतांवधूम्

हा नाथ! नाथ! हा कान्त! हा शम्भो! जगतःपते !।

इति रोरूयमाणां तां यावज्जग्राह भीषणः ॥ १० ॥

तावत्सराजानिशितैर्भल्लैर्व्याघ्रमताडयत् । नच तैर्विव्यथेकिञ्चिद्गिरीन्द्रइववृष्टिभिः
स शार्दूलो महासत्त्वो राज्ञोस्त्रैरकृतव्यथः । बलादाकृष्य तां नारीमपाक्रामतसत्वरः

व्याघ्रेणाऽपहृतां पत्नीं वीक्ष्य विप्रोऽतिदुःखितः ।

रुरोद हा प्रिये! बाले! हा कान्ते! हा पतिव्रते !॥ १३ ॥

एकं मामिह सन्त्यज्य कथं लोकान्तरंगता ।

प्राणेभ्योऽपि प्रियां त्यक्त्वा कथं जीवितुमुत्सहे ॥ १४ ॥

राजन्क ते महास्त्राणि क ते श्लाघ्यंमहद्धनुः । कते द्वादशसाहस्रमहानागातिगंबलम्

किन्तेशङ्खेनखड्गेन किन्ते मन्त्रास्त्रविद्यया । किञ्च तेनप्रयत्नेन किंप्रभावेणभूयसा
तत्सर्वं विफलंजातं यच्चान्यत्त्वयितिष्ठति । यस्त्वंवनौकसंजन्तुं निवारयितुमक्षमः

क्षात्रस्याऽयं परो धर्मः क्षताद्यत्परिरक्षणम् ।

तस्मात्कुलोचिते धर्मे नष्टे त्वज्जीवितेन किम् ॥ १८ ॥

आर्तानांशरणार्तानांत्राणंकुर्वन्ति पार्थिवाः । प्राणैरर्थैश्च धर्मज्ञास्तद्विहीनामृतोपमाः
धनिनांदानहीनानांगार्हस्थ्याद्भिक्षुतावरा । आर्तत्राणविहीनानां जीवितान्मरणंवरम्
वरं विषादनंराज्ञो वरमग्नौ प्रवेशनम् । अनाथानां प्रपन्नानां कृपणानामरक्षणात् ॥

इत्थं विलपितं तस्य स्ववीर्यस्यच गर्हणम् ।

निशम्य नृपतिः शोकादात्मन्येवमचिन्तयत् ॥ २२ ॥

अहो मे पौरुषं नष्टमद्य दैवविपर्ययात् । अद्य कीर्त्तिश्च मे नष्टा पातकं प्राप्तमुत्कटम्
धर्मःकालोचितोनष्टो मन्दभाग्यस्यदुर्मतेः । नूनं मे सम्पदोराज्यमायुष्यंक्षयमेष्यति
अपुंसां सम्पदो भोगाः पुत्रदारधनानिच । दैवेन क्षणमुद्यन्ति क्षणदस्तंव्रजन्ति च
अतएनं द्विजन्मानंहतदारंशुचार्दितम् । गतशोकंकरिष्यामिदत्त्वा प्राणानपिप्रियान्

इति निश्चित्य मनसा भद्रायु नृपसत्तमः ।

पतित्वा पादयोस्तस्य बभाषे परिसांत्वयन् ॥ २७ ॥

कृपांकुरुमयिब्रह्मन्क्षत्रबन्धौहतौजसि । शोकंत्यज महाबुद्धे दास्याम्यथ तवेप्सितम्
इदं राज्यमियं राज्ञी ममेदञ्च कलेवरम् । त्वदधीनमिदं सर्वं किं तेऽभिलषितं वद

ब्राह्मण उवाच

किमादर्शेन चान्धस्य किं गृहैर्भैक्ष्यजीविनः ।

किं पुस्तकेन मूर्खस्य ह्यस्त्रीकस्य धनेन किम् ॥ ३० ॥

अतोऽहंगतपत्नीको भुक्तभोगोनकर्हिचित् । इमां तवाग्रमहिषीं कामार्थं दीयतांमम

राजोवाच

ब्रह्मन्किमेष धर्मस्ते किमेतद्गुरुशासनम् । अस्वर्ग्यमयशस्यं च परदाराभिमर्शनम्

दातारः सन्ति वित्तस्य राज्यस्य गजवाजिनाम् ।

आत्मदेहस्य वा क्वापि न कलत्रस्य कर्हिचित् ॥ ३३ ॥

परदारोपभोगेन यत्पापं समुपार्जितम् । न तत्क्षालयितुं शक्यं प्रायश्चित्तशतैरपि ॥

ब्राह्मण उवाच

अपि ब्रह्मवधं घोरमपि मद्यनिषेवणम् । तपसा नाशयिष्यामि किंपुनः पारदारिकम्

तस्मात्प्रयच्छ मे भार्यामिमां त्वं ध्रुवमन्यथा ॥ ३५ ॥

अरक्षणाद्भयार्तानांगन्तासिनिरयं ध्रुवम् । इति विप्रगिराभीतश्चिन्तयामासपार्थिवः

अरक्षणान्महत्पापं पत्नीदानं ततोवरम् ॥ ३६ ॥

अतः पत्नीं द्विजाग्र्याय दत्त्वा निर्मुक्तकिल्बिषः ।

सद्यो वह्निं प्रवेक्ष्यामि कीर्त्तिश्च निहिता भवेत् ॥ ३७ ॥

इति निश्चित्य मनसा समुज्ज्वाल्य हुताशनम् ।

तं ब्राह्मणं समाहूय ददौ पत्नीं सहोदकाम् ॥ ३८ ॥

स्वं स्नातःशुचिर्भूत्वाप्रणम्यविबुधेश्वरान् । तमग्निंद्विःपरिक्रम्यशिवंदध्यौसमाहितः

तमथाग्नौपतिष्यन्तंस्वपदासक्तचेतसम् । प्रत्यदृश्यतविश्वेशः प्रादुर्भूतोजगत्पतिः

तमीश्वरं पञ्चवक्त्रं त्रिनेत्रं पिनाकिनं चन्द्रकलावतंसम् ।

आलम्बितापिङ्गजटाकलापं मध्याह्नतं भास्करकोटितेजसम् ॥ ४१ ॥

मृणालगौरं गजचर्मवाससं गङ्गातरङ्गोक्षितमौलिदेशम् ।

नागेन्द्रहारावलिकङ्कणोर्मिकाकिरीटकोट्यङ्गदकुण्डलोज्ज्वलम् ॥ ४२ ॥

त्रिशूलखट्वाङ्गकुठारचर्ममृगाभयेष्टार्थपिनाकहस्तम् ।

वृषोपरिस्थं शितकण्ठमीशं प्रोद्भूतमग्रे नृपतिर्ददर्श ॥ ४३ ॥

अथाम्बराद्द्रुतं पेतुर्दिव्याः कुसुमवृष्टयः । प्रणेदुर्देवतूर्याणि देवाश्च ननृतुर्जगुः ॥

तत्राजग्मुर्नारदाद्याः सनकाद्याः सुरर्षयः । इन्द्रादयश्च लोकेशास्तथा ब्रह्मर्षयोऽमलाः

तेषां मध्ये समासीनो महादेवः सहोमया । ववर्ष करुणासारं भक्तिनम्रे महीपतौ

तद्दर्शनानन्दविजृम्भिताशयः प्रवृद्धबाष्पाम्बुपरिप्लुताङ्गः ।

प्रहृष्टरोमा गलगद्गदाक्षरं तुष्टाव गीर्भिर्मुकुलीकृताञ्जलिः ॥ ४७ ॥

राजोवाच

नतोऽस्म्यहं देवमनाथमव्ययंप्रधानमव्यक्तगुणं महान्तम् ।

अकारणं कारणकारणं परं शिवं चिदानन्दमयं प्रशान्तम् ॥ ४८ ॥

त्वं विश्वसाक्षी जगतोऽस्य कर्त्ता विरूढधामा हृदि सन्निविष्टः ।

अतो विचिन्वन्ति विधौ विपश्चितो योगैरनेकैः कृतचित्तरोधैः ॥ ४९ ॥

एकात्मतां भावयतां त्वमेको नानाधियां यस्त्वमनेकरूपः ।

अतीन्द्रियं साक्ष्युदयास्तविभ्रमं मनःपथात्संह्रियते पदं ते ॥ ५० ॥

तं त्वां दुरापं वचसो धियश्च व्यपेतमोहं परमात्मरूपम् ।

गुणैकनिष्ठाः प्रकृतौ विलीनाः कथं वपुः स्तोतुमलं गिरो मे ॥ ५१ ॥

तथापि भक्त्याश्रयतामुपेयुस्तवाङ्घ्रिपद्मं प्रणतार्तिभञ्जनम् ।

सुघोरसंसारदवाग्निपीडितो भजामि नित्यं भवभीतिशान्तये ॥ ५२ ॥

नमस्ते देवदेवाय महादेवाय शम्भवे । नमस्त्रिमूर्त्तिरूपाय सर्गस्थित्यन्तकारिणे ॥

नमो विश्वादिरूपाय विश्वप्रथमसाक्षिणे ।

नमः सन्मात्रतत्त्वाय बोधानन्दघनाय च ॥ ५४ ॥

सर्वक्षेत्रनिवासाय क्षेत्रभिन्नात्मशक्तये । अशक्ताय नमस्तुभ्यं शक्ताभासाय भूयसे

निराभासाय नित्याय सत्यज्ञानान्तरात्मने । विशुद्धाय विदूराय विमुक्ताशेषकर्मणे

नमो वेदान्तवेद्याय वेदमूलनिवासिने ।

नमो विविक्तचेष्टाय निवृत्तगुणवृत्तये ॥ ५७ ॥

नमः कल्याणवीर्याय कल्याणफलदायिने । नमोऽनन्ताय महते शान्तायशिवरूपिणे

अघोराय सुघोराय घोराघौघविदारिणे । भर्गाय भवबीजानां भञ्जनाय गरीयसे

नमो विध्वस्तमोहाय विशदात्मगुणाय च ।

पाहिमांजगतांनाथ! पाहिशङ्कर! शाश्वत !। पाहिरुद्र!विरूपाक्ष!पाहिमृत्युञ्जयाव्यय

शम्भो! शशाङ्ककृतशेखर! शान्तमूर्त्ते! गौरीश! गोपतिनिशापहुताशनेत्र !।

गङ्गाधरान्धकविदारण! पुण्यकीर्त्ते ! भूतेश! भूधरनिवास! सदा नमस्ते ॥ ६१

सूत उवाच

एवं स्तुतः स भगवान्राज्ञा देवो महेश्वरः। प्रसन्नः सह पार्वत्याप्रत्युवाच दयानिधिः

ईश्वर उवाच

राजंस्ते परितुष्टोऽस्मि भक्त्या पुण्यस्तवेन च।
अनन्यचेता यो नित्यं सदा मां पर्यपूजयः॥ ६३॥

तवभावपरीक्षार्थं द्विजो भूत्वाऽहमागतः। व्याघ्रेण यापरिग्रस्तासैषादेवीगिरीन्द्रजा
व्याघ्रो मायामतो यस्तेशरैरक्षतविग्रहः। धीरतांद्रष्टुकामस्तेपत्नीं याचितवानहम्
अस्याश्च कीर्तिमालिन्यास्तव भक्त्या च मानद!।
तुष्टोऽहं सम्प्रयच्छामि वरं जरय दुर्लभम्॥ ६६॥

राजोवाच

एष एव वरो देव! यद्भवान्परमेश्वरः। भवतापपरीतस्य मम प्रत्यक्षतांगतः॥ ६७॥
नान्यं वरं वृणे देव! भवतो वरदर्षभात्। अहं च येयंसा राज्ञी मम माताच मत्पिता
वैश्यःपद्माकरो नाम तत्पुत्रःसुनयाभिधः। सर्वानेतान्महादेव! सदात्वत्पार्श्वगान्कुरु

सूत उवाच

अथ राज्ञीमहाभागाप्रणता कीर्त्तिमालिनी। भक्त्याप्रसाद्यगिरिशंययाचे वरमुत्तमम्

राज्ञ्युवाच

चन्द्राङ्गदोममपितामातासीमन्तिनी च मे। तयोर्याचेमहादेवत्वत्पार्श्वे!सन्निधिंसदा
एवमस्त्वितिगौरीशःप्रसन्नोभक्तवत्सलः। तयोःकामवरंदत्त्वाक्षणादन्तर्हितोऽभवत्
सोऽपि राजा सुरैः सार्धं प्रसादं प्राप्य शूलिनः।
सहितः कीर्तिमालिन्या बुभुजे विषयान्प्रियान्॥ ७३॥
कृत्वा वर्षायुतंराज्यमव्याहतबलोन्नतिः। राज्यं पुत्रेषुविन्यस्यभेजे शम्भोःपरं पदम्
चन्द्राङ्गदोपि राजेन्द्रा राज्ञी सीमन्तिनी च सा।
भक्त्या सम्पूज्य गिरिशं जग्मतुः शाम्भवं पदम्॥ ७५॥
एतत्पवित्रमघनाशकरं विचित्रं शम्भोर्गुणानुकथनं परमं रहस्यम्।

यः श्रावयेद्बुधजनान्प्रयतः पठेद्वा सम्प्राप्यभोगविभवं शिवमेति सोऽन्ते॥ ७६
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मोत्तरखण्डे
भद्रायुशिवप्रसादकथनं नाम चतुर्दशोऽध्यायः॥ १४॥

पञ्चदशोऽध्यायः

वामदेवाख्यानवर्णनपूर्वकभस्ममाहात्म्यवर्णनम्

सूत उवाच

ऋषभस्यानुभावोऽयं वर्णितः शिवयोगिनः।
अथाऽन्यस्यापि वक्ष्यामि प्रभावं शिवयोगिनः॥ १॥
भस्मनश्चापि माहात्म्यं वर्णयामि समासतः।
कृत्यकृत्या भविष्यन्ति यच्छ्रुत्वा पापिनो जनाः॥ २॥
अस्त्येको वामदेवाख्यः शिवयोगी महातपाः।
निर्द्वंद्वो निर्गुणः शान्तो निःसङ्गः समदर्शनः॥ ३॥
आत्मारामो जितक्रोधो गृहदारविवर्जितः। अतर्कितगतिर्मौनी सन्तुष्टो निष्परिग्रहः
भस्मोद्धूलितसर्वाङ्गो जटामण्डलमण्डितः।
वल्कलाजिनसम्वीतो भिक्षामात्रपरिग्रहः॥ ५॥
स एकदा चरंल्लोके सर्वानुग्रहतत्परः। क्रौञ्चारण्यं महाघोरं प्रविवेश यदृच्छया॥
तस्मिन्निर्मनुजेऽरण्ये तिष्ठत्येकोऽतिभीषणः।
क्षुत्तृषाकुलितो नित्यं यः कश्चिद् ब्रह्मराक्षसः॥ ७॥
तं प्रविष्टं शिवात्मानं स दृष्ट्वा ब्रह्मराक्षसः। अभिदुद्राव वेगेन जग्धुं क्षुत्परिपीडितः
व्यात्ताननं महाकायं भीमदंष्ट्रं भयानकम्।

तमायान्तमभिप्रेक्ष्य योगीशो न चचाल सः ।
अथाभिद्रुत्य तरसा स घोरो वनगोचरः ।
दोर्भ्यां निष्पीड्य जग्राह निष्कम्पं शिवयोगिनम् ॥ १० ॥
तदङ्गस्पर्शनादेव सद्यो विध्वस्तकिल्बिषः ।
स ब्रह्मराक्षसो घोरो विषण्णः स्मृतिमाययौ ॥ ११ ॥
यथाचिन्तामणिस्पृष्टालोहंकाञ्चनतांव्रजेत् ।यथाजम्बूनदींप्राप्यमृत्तिकास्वर्णतांव्रजेत्
यथा मानसमभ्येत्य वायसा यान्ति हंसताम् ।
यथाऽमृतं सकृत्पीत्वा नरो देवत्वमाप्नुयात् ॥ १३ ॥
तथैव हि महात्मानोदर्शनस्पर्शनादिभिः । सद्यःपुनन्त्यघोपेतान्सत्सङ्गोदुर्लभोह्यतः
यः पूर्वं क्षुत्पिपासार्तोघोरात्माविपिनेचरः । स सद्यस्तृप्तिमायातःपूर्णानन्दो बभूवह
तद्गात्रलग्नसितभस्मकणानुविद्धः सद्योविधूतघनपापतमःस्वभावः ।
सम्प्राप्तपूर्वभवसंस्मृतिरुग्रकार्यस्तत्पादपद्मयुगुले प्रणतो बभाषे ॥ १६ ॥

राक्षस उवाच

प्रसीदमेमहयोगिन्प्रसीद करुणानिधे !। प्रसीदभवतप्तानामानन्दामृतवारिधे !॥ १७॥
काऽहं पापमतिर्घोरः सर्वप्राणिभयङ्करः । क्व ते महानुभावस्य दर्शनं करुणात्मनः
उद्धरोद्धर मां घोरे पतितंदुःखसागरे । तव सन्निधिमात्रेण महानन्दोऽभिवर्धते

वामदेव उवाच

कस्त्वं वनेचरो घोरो राक्षसोऽत्र किमास्थितः ।
कथमेतां महाघोरां कष्टां गतिमवाप्तवान् ॥ २० ॥

राक्षस उवाच

राक्षसोऽहमितः पूर्वं पञ्चविंशतिमे भवे । गोप्ता यवनराष्ट्रस्यदुर्जयो नाम वीर्यवान्
सोऽहं दुरात्मा पापीयान्स्वैरचारी मदोत्कटः ।
दण्डधारी दुराचारः प्रचण्डो निर्घृणः खलः ॥ २२ ॥
युवा बहुकलत्रोऽपि कामासक्तोऽजितेन्द्रियः ।

इमां पापीयसीं चेष्टां पुनरेकां गतोऽस्म्यहम् ॥ २३ ॥
प्रत्यहं नूतनामन्यां नारींभोक्तुमनाःसदा । आहृताःसर्वदेशेभ्यो नार्या भृत्यैर्मदाज्ञया
भुक्त्वा भुक्त्वा परित्यक्तामेकामेकां दिने दिने ।
अन्तर्गृहेषु संस्थाप्य पुनरन्याः स्त्रियो धृताः ॥ २५ ॥
एवं स्वराष्ट्रात्परराष्ट्रतश्च देशाकरग्रामपुरव्रजेभ्यः ।
आहृत्य नार्यो रमिता दिनेदिने भुक्ता पुनः काऽपि न भुज्यतेमया ॥ २६
अथान्यैश्च न भुज्यन्ते मया भुक्तास्तथा स्त्रियः ।
अन्तर्गृहेषु निहिताः शोचन्ते च दिवानिशम् ॥ २७ ॥
ब्रह्मविट्क्षत्रशूद्राणां यदानार्योमयाहृताः । मम राज्येस्थिता विप्राःसहदारैः प्रदुद्रुवुः
सभर्तृकाश्चकान्याश्चविधवाश्चरजस्वलाः । आहृत्यनार्योरमितामया कामहतात्मना
त्रिशतंद्विजनारीणांराजस्त्रीणांचतुःशतम् । षट्शतंवैश्यनारीणांसहस्रं शूद्रयोषिताम्
शतं चाण्डालनारीणां पुलिन्दीनां सहस्रकम् ।
शैलूषीणां पञ्चशतं रजकीनां चतुःशतम् ॥ ३१ ॥
असंख्या वारमुख्याश्च मया भुक्ता दुरात्मना ।
तथाऽपि मयि कामस्य न तृप्तिः समजायत ॥ ३२ ॥
एवं दुर्विषयासक्तं मत्तं पानरतं सदा । यौवनेऽपि महारोगा विविशुर्यक्ष्मकादयः
रोगार्दितोऽनपत्यश्च शत्रुभिश्चापि पीडितः ।
त्यक्तोमात्यैश्च भृत्यैश्च मृतोऽहं स्वेन कर्मणा ॥ ३४ ॥
आयुर्विनश्यत्ययशो विवर्धते भाग्यं क्षयं यात्यतिदुर्गतिंव्रजेत् ।
स्वर्गाच्च्यवन्ते पितरः पुरातना धर्मव्यपेतस्य नरस्य निश्चितम् ॥३५॥
अथाहं किङ्करैर्याम्यैर्नीतो वैवस्वतालयम् । ततोऽहं नरकेघोरेतत्कुण्डेविनिपातितः
तत्राऽहं नरके घोरे वर्षाणामयुतत्रयम् । रेतः पिबन्पीड्यमानोन्यवसं यमकिङ्करैः
ततः पापावशेषेणपिशाचो निर्जने वने । सहस्रशिश्नः सञ्जातो नित्यंक्षुत्तृपयाकुलः
पैशाचीं गतिमाश्रित्य नीतं दिव्यं शरच्छतम् ।

द्वितीयेऽहं भवे जातो व्याघ्रः प्राणिभयंकरः ॥ ३६ ॥

तृतीयेऽजगरो घोरश्चतुर्थेऽहंभवेवृकः । पञ्चमेविड्वराहश्च षष्ठेऽहं कृकलासकः ॥४०॥
सप्तमेऽहं सारमेयःसृगालश्चाष्टमे भवे । नवमे गवयोभीमोमृगोऽहंदशमे भवे ॥ ४१॥
एकादशे मर्कटश्चगृध्रोऽहंद्वादशे भवे । त्रयोदशेऽहं नकुलोवायसश्चचतुर्दशे ॥ ४२ ॥
अच्छभल्लः पञ्चदशेषोडशेवनकुक्कुटः । गर्दभोऽहंसप्तदशेमार्जारोऽष्टादशेभवे ॥ ४३
एकोनविंशेमण्डूकःकूर्मोविंशतिमे भवे । एकविंशे भवेमत्स्योद्वाविंशेमूषकोऽभवम्
उलूकोऽहं त्रयोविंशे चतुर्विंशे वनद्विपः । पञ्चविंशे भवेचास्मिञ्जातोहं ब्रह्मराक्षसः
क्षुत्परीतो निराहारो वसाम्यत्र महावने । इदानीमागतं दृष्ट्वा भवन्तं जग्धुमुत्सुकः

त्वद्देहस्पर्शमात्रेण जाता पूर्वभवस्मृतिः ॥ ४६ ॥

गतजन्मसहस्राणि स्मराम्यद्य त्वदन्तिके । निर्वेदश्च परो जातः प्रसन्नं हृदयं च मे
ईदृशोऽयं प्रभावस्ते कथंलब्धोमहामते !। तपसा वापितीव्रेणकिमुतीर्थनिषेवणात्
योगेन देवशक्त्या वामन्त्रैर्वानन्तशक्तिभिः । तत्त्वतो ब्रूहिभगवन्स्त्वामहं शरणंगतः

वामदेव उवाच

एष मद्गात्रलग्नस्य प्रभावो भस्मनोमहान् । यत्सम्पर्कात्तमोवृत्तेस्तवेयं मतिरुत्तमा

को वेद भस्मसामर्थ्यं महादेवादृते परः ।

दुर्विभाव्यं यथा शम्भोर्माहात्म्यं भस्मनस्तथा ॥ ५१ ॥

पुरा भवादृशः कश्चिद्ब्राह्मणोधर्मवर्जितः । द्राविडेषु स्थितोमूढःकर्मणाशूद्रतां गतः
चौर्यवृत्तिर्निष्कृतिकोवृषलीरतिलालसः । कदाचिज्जारतां प्राप्तः शूद्रेण निहतोनिशि

तच्छवस्य बहिर्ग्रामात्क्षिप्तस्य प्रेतकर्मणः ।

चचार सारमेयोऽङ्गेभस्मपादो यदृच्छया ॥ ५४ ॥

अथ तं नरके घोरे पतितं शिवकिङ्कराः । निन्युर्विमानमारोप्य प्रसह्य यमकिङ्करान्
शिवदूतान्समभ्येत्य यमोपि परिपृष्टवान् । महापातककर्त्तारं कथमेनं निनीषथ

अथोचुःशिवदूतास्ते पश्याऽस्य शवविग्रहम् ।

वक्षोललाटदोर्मूलान्यङ्कितानि सुभस्मना ॥ ५७ ॥

अतएनंसमानेतुमागताःशिवशासनात् । नास्मान्निषेद्धुं शक्तोसिमास्त्वत्रतवसंशयः
इत्याभाष्य यमंशम्भोर्दूतास्तंब्राह्मणंततः । पश्यतांसर्वलोकानांनिन्युर्लोकमनामयम्
तस्मादशेषपापानां सद्यः संशोधनं परम् । शम्भोर्विभूषणंभस्म सततं ध्रियते मया

इत्थं निशम्य माहात्म्यं भस्मनो ब्रह्मराक्षसः ।

विस्तरेण पुनः श्रोतुमौत्कण्ठ्यादित्यभाषत ॥ ६१ ॥

साधुसाधु महायोगिन्धन्योऽस्मि तव दर्शनात् ।

मां विमोचय धर्मात्मन् ! घोरादस्मात्कुजन्मनः ॥ ६२ ॥

किञ्चिदस्तीहमे भातिमयापुण्यंपुराकृतम् । अतोहंत्वत्प्रसादेनमुक्तोस्म्यद्यद्विजोत्तम!

एकस्मै शिवभक्ताय तस्मिन्पार्थिवजन्मनि ।

भूमिर्वृत्तिकरी दत्ता सस्यारामान्विता मया ॥ ६४ ॥

यमेनापि तदैवोक्तं पञ्चविंशतिमे भवे । कस्यचिद्योगिनः सङ्गान्मोक्ष्यसेसंसृतेरिति
तदद्यफलितंपुण्यं यत्किञ्चित्प्राग्भवार्जितम् । अतोनिर्मनुजारण्येसम्प्राप्तस्तवसङ्गमः
अतो मां घोरपाप्मानंसंसरन्तंकुजन्मनि । समुद्धरकृपासिन्धोदत्त्वाभस्मसमन्त्रकम्

कथं धार्यमिदं भस्म को मन्त्रः को विधिः शुभः ।

कः कालः कश्च वा देशः सर्वं कथय मे गुरो !॥ ६८ ॥

भवादृशामहात्मानःसदालोकहितेरताः । नात्मानोहितमिच्छन्तिकल्पवृक्षसधर्मिणः

सूत उवाच

इत्युक्तस्तेन योगीशो घोरेण वनचारिणा ।

भूयोऽपि भस्ममाहात्म्यं वर्णयामास तत्त्ववित् ॥ ७० ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांतृतीये ब्रह्मोत्तरखण्डे
भस्ममाहात्म्यकथनंनाम पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

भस्ममाहात्म्यवर्णनेत्रिपुण्ड्रमाहात्म्यवर्णनम्

सूत उवाच

श्रृणुध्वं मुनयः श्रेष्ठा! वामदेवस्य भाषितम् ॥ १ ॥

वामदेव उवाच

पुरामन्दरशैलेन्द्रे नानाधातुविचित्रिते । नानासत्त्वसमाकीर्णे नानाद्रुमलताकुले ॥
कालाग्निरुद्रो भगवान्कदाचिद्विश्ववन्दितः । समाससादभूतेशःस्वेच्छयापरमेश्वरः
समन्तात्समुपातिष्ठन्रुद्राणां शतकोटयः । तेषां मध्येसमासीनोदेवदेवस्त्रिलोचनः
तत्रागच्छत्सुरश्रेष्ठो देवैः सह पुरन्दरः । तथाग्निर्वरुणो वायुर्यमोवैवस्वतस्तथा ॥

गन्धर्वाश्चित्रसेनाद्याः खेचराःपन्नगादयः ।
विद्याधराः किम्पुरुषाः सिद्धाः साध्याश्च गुह्यकाः ॥ ६ ॥

ब्रह्मर्षयो वसिष्ठाद्या नारदाद्याः सुरर्षयः । पितरश्च महात्मानो दक्षाद्याश्च प्रजेश्वराः

उर्वश्याद्याश्चाप्सरसश्चण्डिकाद्याश्च मातरः ।
आदित्या वसवो दस्रौ विश्वेदेवा महौजसः ॥ ८ ॥

अथान्येभूतपतयो लोकसंहरणे क्षमाः । महाकालश्च नन्दी च तथा वै शङ्खपालकौ
वीरभद्रो महातेजाः शङ्कुकर्णो महाबलः । घण्टाकर्णश्च दुर्धर्षो मणिभद्रो वृकोदरः
कुण्डोदरश्च विकटास्तथाकुम्भोदरोबली । मन्दोदरःकर्णधारःकेतुभृङ्गीरिटिस्तथा

भूतनाथास्तथाऽन्ये च महाकाया महौजसः ।
कृष्णवर्णास्तथा श्वेताःकेचिन्मण्डूकसप्रभाः ॥ १२ ॥

हरिताधूसराधूम्राःकर्बुराःपीतलोहिताः। चित्रवर्णाविचित्राङ्गाश्चित्रलीलामदोत्कटाः
नानायुधोद्यतकरा नानावाहनभूषणाः । केचिद्व्याघ्रमुखाःकेचित्सूकरास्यामृगाननाः
केचिच्चनक्रवदनाः सारमेयमुखाःपरे । सृगालवदनाश्चान्य उष्ट्राभवदनाः परे ॥ १५ ॥

केचिच्छरभभेरुण्डसिंहाश्वोष्ट्रबकाननाः ।
एकवक्त्रा द्विवक्त्राश्च त्रिमुखाश्चैव निर्मुखाः ॥ १६ ॥

एकहस्तास्त्रिहस्ताश्च पञ्चहस्तास्त्वहस्तकाः । अपादाबहुपादाश्चबहुकणककर्णकाः
एकनेत्राश्चतुर्नेत्रा दीर्घाःकेचन वामनाः । समन्तात्परिवार्येशं भूतनाथमुपासते ॥
अथाशच्छन्महातेजा मुनीनांप्रवरः सुधीः । सनत्कुमारोधर्मात्मातंद्रष्टुं जगदीश्वरम्
तं देवदेवं विश्वेशं सूर्यकोटिसमप्रभम् । महाप्रलयसंक्षुब्धसप्तार्णवघनस्वनम् ॥

सम्वर्त्ताग्निसमाटोपं जटामण्डलशोभितम् ।
अक्षीणभालनयनं ज्वालाम्लानमुखत्विषम् ॥ २१ ॥

प्रदीप्तचूडामणिना शशिखण्डेन शोभितम् । तक्षकं वामकर्णेन दक्षिणेनचवासुकिम्
बिभ्राणं कुण्डलयुगं नीलरत्नमहाहनुम् । नीलग्रीवं महाबाहुं नागहारविराजितम् ॥
फणिराजपरिभ्राजत्कङ्कणाङ्गदमुद्रिकम् । अनन्तगुणसाहस्रमणिरञ्जितमेखलम् ॥२४
व्याघ्रचर्मपरीधानं घण्टादर्पणभूषितम् । कर्कोटकमहापद्मधृतराष्ट्रधनञ्जयैः ॥ २५ ॥
कूजन्नूपुरसङ्घुष्टपादपद्मविराजितम् । प्रासतोमरखट्वाङ्गशूलटङ्कधनुर्धरम् ॥ २६
अप्रधृष्यमनिर्देश्यमचिन्त्याकारमीश्वरम् । रत्नसिंहासनारूढं प्रणनाम महामुनिः ॥

तं भक्तिभारोच्छ्वसितान्तरात्मा संस्तूय वाग्भिः श्रुतिसम्मिताभिः ।
कृताञ्जलिः प्रश्रयनम्रकन्धरः पप्रच्छ धर्मानखिलाञ्छुभप्रदान् ॥ २८ ॥

यान्यानपृच्छत मुनिस्तांस्तान्धर्मानशेषतः । प्रोवाचभगवान्रुद्रोभूयोमुनिरपृच्छत

सनत्कुमार उवाच

श्रुतास्ते भगवन्धर्मास्त्वन्मुखान्मुक्तिहेतवः ।
यैर्मुक्तपापा मनुजास्तरिष्यन्ति भवार्णवम् ॥ ३० ॥

अथापरं विभो! धर्ममल्पायासंमहाफलम् । ब्रूहिकारुण्यतोमह्यंसद्योमुक्तिप्रदं नृणाम्

अभ्यासबहुला धर्माः शास्त्रदृष्टाः सहस्रशः ।
सम्यक्संसेविताः कालात्सिद्धिं यच्छन्ति वा न वा ॥ ३२ ॥

अतो लोकहितं गुह्यं भुक्तिमुक्तयोश्च साधनम् ।

धर्मं विज्ञातुमिच्छामि त्वत्प्रसादान्महेश्वर !॥ ३३ ॥

श्रीरुद्र उवाच

सर्वेषामपिधर्माणामुत्तमं श्रुतिचोदितम् । रहस्यंसर्वजन्तूनांयत्त्रिपुण्ड्रस्यधारणम्

सनत्कुमार उवाच

त्रिपुण्ड्रस्यविधिंब्रूहिभगवञ्जगतांपते । तत्त्वतोज्ञातुमिच्छामित्वत्प्रसादान्महेश्वर!

कति स्थानानि किं द्रव्यं का शक्तिः का च देवता ।

किं प्रमाणं च कः कर्त्ता के मन्त्रास्तस्य किम्फलम् ॥ ३६ ॥

एतत्सर्वमशेषेण त्रिपुण्ड्रस्य च लक्षणम् । ब्रूहि मे जगतांनाथ लोकानुग्रहकाम्यया

श्रीरुद्र उवाच

आग्नेयमुच्यते भस्म दग्धगोमयसम्भवम् । तदेव द्रव्यमित्युक्तंत्रिपुण्ड्रस्यमहामुने!

सद्योजातादिभिर्ब्रह्ममयैर्मन्त्रैश्चपञ्चभिः । परिगृह्याग्निरित्यादिमन्त्रैर्भस्माभिमन्त्रयेत्

मानस्तोकेति सम्मृज्य शिरो लिम्पेच्च त्र्यम्बकम् ।

त्रियायुषादिभिर्मन्त्रैर्ललाटे च भुजद्वये ॥

स्कन्धे च लेपयेद्भस्म सजलं मन्त्रभावितम् ॥ ४० ॥

तिस्रोरेखा भवन्त्येषु स्थानेषुमुनिपुङ्गव ! । भ्रुवोर्मध्यंसमारभ्ययावदन्तोभ्रुवोर्भवेत्

मध्यमानामिकाङ्गुल्योर्मध्येतुप्रतिलोमतः । अङ्गुष्ठेनकृतारेखा त्रिपुण्ड्रस्याभिधीयते

तिसृणामपि रेखायां प्रत्येकं नवदेवता । अकारो गार्हपत्यश्च ऋग्भूर्लोको रजस्तथा

आत्मा चैव क्रियाशक्तिः प्रातःसवनमेव च । महादेवस्तु रेखायाः प्रथमायास्तुदेवता

उकारो दक्षिणाग्निश्च नभः सत्त्वं यजुस्तथा ।

मध्यन्दिनं च सवनमिच्छाशक्त्यन्तरात्मकौ ॥ ४५ ॥

महेश्वरश्च रेखाया द्वितीयायाश्च देवता । मकाराहवनीयौ च परमात्मा तमो दिवः

ज्ञानशक्तिः सामवेदस्तृतीयसवनं तथा । शिवश्चेति तृतीयाया रेखायाश्चाधिदेवता

एता नित्यं नमस्कृत्य त्रिपुण्ड्रं धारयेत्सुधीः । महेश्वरव्रतमिदं सर्ववेदेषु कीर्त्तितम्

मुक्तिकामैर्नरैःसेव्यंपुनस्तेषां न सम्भवः । त्रिपुण्ड्रंकुरुतेयस्तु भस्मनाविधिपूर्वकम्

ब्रह्मचारी गृहस्थो वा वनस्थो यतिरेववा । महापातकसङ्घातैर्मुच्यते चोपपातकैः

तथान्यैःक्षत्रविट्शूद्रस्त्रीगोहत्यादिपातकैः ।

वीरहत्याश्वहत्याभ्यां मुच्यते नात्र संशयः ॥ ५१ ॥

अमन्त्रेणापियः कुर्यादज्ञात्वामहिमोन्नतिम् । त्रिपुण्ड्रम्भालपटलेमुच्यतेसर्वपातकैः

परद्रव्यापहरणं परदाराभिमर्शनम् । परनिन्दा परक्षेत्रहरणं परपीडनम् ॥ ५३ ॥

सस्यारामादिहरणं गृहदाहादिकर्म च । असत्यवादंपैशुन्यं पारुष्यं वेदविक्रयः ॥

कूटसाक्ष्यं व्रतत्यागः कैतवं नीचसेवनम् ॥ ५४ ॥

गोभूहिरण्यमहिषीतिलकम्बलवाससाम् । अन्नधान्यजलादीनां नीचेभ्यश्चपरिग्रहः

दासीवेश्याभुजङ्गेषु वृषलीषु नटीषु च । रजस्वलासु कन्यासु विधवासु च सङ्गमः

मांसचर्मरसादीनां लवणस्यच विक्रयः । एवमादीन्यसंख्यानिपापानिविविधानिच

सद्य एव विनश्यन्ति त्रिपुण्ड्रस्य च धारणात् ।

शिवद्रव्यापहरणं शिवनिन्दा च कुत्रचित् ॥ ५८ ॥

निन्दा च शिवभक्तानां प्रायश्चित्तैर्न शुद्ध्यति ।

रुद्राक्षा यस्य गात्रेषु ललाटे च त्रिपुण्ड्रकम् ॥ ५९ ॥

स चाण्डालोऽपि सम्पूज्यः सर्ववर्णोत्तमोभवेत् ।

यानि तीर्थानि लोकेऽस्मिन्गङ्गाद्याः सरितश्च याः ॥ ६० ॥

स्नातो भवति सर्वत्र ललाटेयस्त्रिपुण्ड्रधृक् । सप्तकोटिमहामन्त्राः पञ्चाक्षरपुरःसराः

तथान्येकोटिशोमन्त्राःशैवाःकैवल्यहेतवः । तेसर्वेतेनजप्ताःस्युर्योबिभर्त्तित्रिपुण्ड्रकम्

सहस्रंपूर्वजातानांसहस्रंचजनिष्यताम् । स्ववंशजानां मर्त्यानामुद्धरेद्यस्त्रिपुण्ड्रधृक्

इहभुक्त्वाखिलान्भोगान्दीर्घायुर्व्याधिवर्जितः । जीवितान्तेचमरणं सुखेनैवप्रपद्यते

अष्टैश्वर्यगुणोपेतंप्राप्यदिव्यं वपुः शुभम् । दिव्यंविमानमारुह्य दिव्यस्त्रीशतसेवितः

विद्याधराणां सिद्धानां गन्धर्वाणां महौजसाम् ।

इन्द्रादिलोकपालानां लोकेषु च यथाक्रमम् ॥ ६६ ॥

भुक्त्वा भोगान्सुविपुलान्प्रजेशानां पुरेषु च । ब्रह्मणःपदमासाद्य तत्रकल्पशतंरमेत्

विष्णोर्लोके च रमते यावद् ब्रह्मशतत्रयम् । ॥ ६८ ॥

शिवलोकं ततः प्राप्य स्थित्वाकालमक्षयम् । शिवसायुज्यमाप्नोतिनसभूयोऽभिजायते
सर्वोपनिषदां सारं समालोच्य मुहुर्मुहुः । इदमेव हि निर्णीतं परं श्रेयस्त्रिपुण्ड्रकम्
एतत्त्रिण्ड्रमाहात्म्यं समासात्कथितंमया । रहस्यं सर्वभूतानां गोपनीयमिदं त्वया
इत्युक्त्वाभगवान्रुद्रस्तत्रैवान्तरधीयत । सनत्कुमारोऽपिमुनिर्जगामब्रह्मणःपदम्

तवापि भस्मसम्पर्कात्सञ्जाता विमला मतिः ।
त्वमपि श्रद्धया पुण्यं धारयस्व त्रिपुण्ड्रकम् ॥ ७२ ॥

सूत उवाच

इत्युक्त्वावामदेवस्तुशिवयोगी महातपाः । अभिमन्त्र्य ददौ भस्मघोरायब्रह्मरक्षसे
तेनासौ भालपटले चक्रे तिर्यक्त्रिपुण्ड्रकम् । ब्रह्मराक्षसतांसद्योजहौतस्यानुभावतः
सबभौसूर्यसङ्काशस्तेजोमण्डलमण्डितः । दिव्यावयवरूपैश्चदिव्यमाल्याम्बरोज्ज्वलः

भक्त्या प्रदक्षिणीकृत्य तं गुरुं शिवयोगिनम् ।
दिव्यं निमानमारुह्य पुण्यलोकाञ्जगाम सः ॥ ७७ ॥
वामदेवो महायोगी दत्त्वा तस्मै पराङ्गतिम् ।
चचार लोके गूढात्मा साक्षादिव शिवः स्वयम् ॥ ७८ ॥

य एतद्भस्ममाहात्म्यं त्रिपुण्ड्रंश्रृणुयान्नरः । श्रावयेद्वापठेद्वापिस हि यातिपराङ्गतिम्

कथयति शिवकीर्तिं संसृतेर्मुक्तिहेतुं
प्रणमति शिवयोगिध्येयमीशाङ्घ्रिपद्मम् ।
रचयति शिवभक्तोद्भासि भाले त्रिपुण्ड्रं
न पुनरिह जनन्या गर्भवासं भजेत्सः ॥ ८० ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे भस्ममाहात्म्यकथने त्रिपुण्ड्रमाहात्म्यवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

भस्ममाहात्म्यवर्णनेपाञ्चालभृत्यशबराख्यानवर्णनम्

ऋषय ऊचुः

वेदवेदाङ्गतत्त्वज्ञैर्गुरुभिर्ब्रह्मवादिभिः । नृणांकृतोपदेशानां सद्यः सिद्धिर्हि जायते ॥
यथान्यजनसामान्यैर्गुरुभिर्नीतिकोविदैः । नृणां कृतोपदेशानांसिद्धिर्भवतिकादृशी

सूत उवाच

श्रद्धैवसर्वधर्मस्य चातीवहितकारिणी । श्रद्धयैवनृणां सिद्धिर्जायतेलोकयोर्द्वयोः

श्रद्धया भजतःपुंसः शिलाऽपि फलदायिनी ।
मूर्खोऽपि पूजितो भक्त्या गुरुर्भवति सिद्धिदः ॥ ४ ॥

श्रद्धयापठितोमन्त्रस्त्वबद्धोपिभलप्रदः । श्रद्धयापूजितोदेवोनीचस्यापिफलप्रदः
अश्रद्धया कृता पूजादानंयज्ञस्तपोव्रतम् । सर्वंनिष्फलतांयातिपुष्पं वन्ध्यतरोरिव
सर्वत्र संशयाविष्टः श्रद्धाहीनोऽतिचञ्चलः । परमार्थात्परिभ्रष्टः संसृतेर्न हि मुच्यते
मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजेगुरौ । यादृशी भावना यस्य सिद्धिर्भवतितादृशी
अतो भावमयं विश्वं पुण्यं पापञ्च भावतः । ते उभे भावहीनस्य न भवेतां कदाचन
अत्रेदं परमाश्चर्यमाख्यानमनुवर्ण्यते । अश्रद्धा सर्वमर्त्यानां येन सद्यो निवर्तते ॥
आसीत्पाञ्चालराजस्य सिंहकेतुरिति श्रुतः । पुत्रः सर्वगुणोपेतः क्षात्रधर्मरतः सदा
स एकदा कतिपयैर्भृत्यैर्युक्तो महाबलः । जगाम मृगयाहेतोर्बहुसत्त्वान्वितं वनम्
तद्भृत्यः शबरः कश्चिद्विचरन्मृगयां वने । ददर्शजीर्णं स्फुटितं पतितं देवतालयम्

तत्राऽपश्यद्भिन्नपीठं पतितं स्थण्डिलोपरि ।
शिवलिङ्गमृजुं सूक्ष्मं मूर्त्तं भाग्यमिवात्मनः ॥ १४ ॥

स समादाय वेगेन पूर्वकर्मप्रचोदितः । तस्मै सन्दर्शयामास राजपुत्राय धीमते ॥१५
पश्येदं रुचिरं लिङ्गं मया दृष्टमिह प्रभो !। तदेतत्पूजयिष्यामि यथाविभवमादरात्

अस्य पूजाविधिं ब्रूहि यथा देवोमहेश्वरः । अमन्त्रज्ञैश्च मन्त्रज्ञैः प्रीतोभवतिपूजितः
इति तेन निषादेन पृष्टः पार्थिवनन्दनः । प्रत्युवाच प्रहस्यैनं परिहासविचक्षणः ॥
सङ्कल्पेन सदा कुर्यादभिषेकं नवाम्भसा । उपवेश्यासने शुद्धे शुभैर्गन्धाक्षतैर्नवैः ॥
वन्यैः पत्रैश्च कुसुमैर्धूपैर्दीपैश्च पूजयेत् ॥ १६ ॥
चिताभस्मोपहारं च प्रथमं परिकल्पयेत् । आत्मोपभोग्येनान्नेन नैवेद्यं कल्पयेद्बुधः
पुनश्च धूपदीपादीनुपचारान्प्रकल्पयेत् । नृत्यवादित्रगीतादीन्यथावत्परिकल्पयेत् ॥
नमस्कृत्वातु विधिवत्प्रसादंधारयेद्बुधः । एष साधारणःप्रोक्तःशिवपूजाविधिस्तव
चिताभस्मोपहारेण सद्यस्तुष्यति शङ्करः ॥ २३ ॥

सूत उवाच

परिहासरसेनेत्थंशासितःस्वामिनाऽमुना । स चण्डकाख्यशबरोमूर्ध्नाजग्राहतद्वचः
ततः स्वभवनं प्राप्य लिङ्गमूर्त्ति महेश्वरम् । प्रत्यहं पूजयामासचिताभस्मोपहारकृत्
यच्चात्मनः प्रियं वस्तु गन्धपुष्पाक्षतादिकम् ।
निवेद्य शम्भवे नित्यमुपायुङ्क्त ततः स्वयम् ॥ २६ ॥
एवं महेश्वरं भक्त्या सह पत्न्याभ्यपूजयत् । शबरःसुखमासाद्यनिनायकतिचित्समाः
एकदा शिवपूजायै प्रवृत्तः शबरोत्तमः । न ददर्श चिताभस्म पात्रे पूरितमण्वपि ॥
अथाऽसौ त्वरितो दूरमन्विष्यन्परितोभ्रमन् ।
न लब्धवांश्चिताभस्म श्रान्तो गृहमगात्पुनः ॥ २६ ॥
तत्रआहूयपत्नींस्वां शबरोवाच्यमब्रवीत् । न लब्धंमेचिताभस्म किंकरोमिवद प्रिये
शिवपूजान्तरायोमे जातोऽद्य बतपाप्मनः । पूजां विना क्षणमपि नाहंजीवितुमुत्सहे
उपायं नात्र पश्यामि पूजोपकरणे हते । न गुरोश्च विहन्येत शासनं सकलार्थदम् ॥
इति व्याकुलितं दृष्ट्वा भर्त्तारं शबराङ्गना । प्रत्यभाषत मा भैस्त्वमुपायं प्रवदामि ते
इदमेव गृहं दग्ध्वा बहुकालोपबृंहितम् । अहमग्नि प्रवेक्ष्यामि चिताभस्म भवेत्ततः

शबर उवाच

धर्मार्थकाममोक्षाणां देहः परमसाधनम् । कथं त्यजसि तं देहं सुखार्थं नवयौवनम्

अधुना त्वनपत्या त्वमभुक्तविषयासवा । भोगयोग्यमिमं देहं कथं दग्धुमिहेच्छसि

शबर्युवाच

एतावदेवसाफल्यंजीवितस्यचजन्मनः । परार्थेयस्त्यजेत्प्राणाञ्छिवार्थेकिमुतस्वयम्
किं नु तप्तंतपोघोरं किं वा दत्तंमयापुरा । किं वार्चनं कृतं शम्भोः पूर्वजन्म शतान्तरे
किम्वा पुण्यं मम पितुः का वा मातुः कृतार्थता ।
यच्छिवार्थे समृद्धेऽग्नौ त्यजाम्येतत्कलेवरम् ॥ ३६ ॥
इत्थंस्थिरां मतिं दृष्ट्वा तस्या भक्तिंश्च शङ्करे । तथेतिदृढसङ्कल्पःशबरः प्रत्यपूजयत्
सा भर्त्तारहनुप्राप्य स्नात्वा शुचिरलङ्कृता ।
गृहमादीप्यतंवह्निंभक्त्याचक्रेप्रदक्षिणम् । नमस्कृत्वात्मगुरवेध्यात्वाहृदिसदाशिवम्
अग्निप्रवेशाभिमुखी कृताञ्जलिरिदं जगौ ॥ ४२ ॥

शबर्युवाच

पुष्पाणि सन्तु तव देव! ममेन्द्रियाणि धूपोऽगुरुर्वपुरिदं हृदयं प्रदीपः ।
प्राणा हवींषि करणानि तवाक्षताश्च पूजाफलं व्रजतु साम्प्रतमेष जीवः ॥ ४३॥
वाञ्छामि नाऽहमपि सर्वधनाधिपत्यं न स्वर्गभूमिमचलां न पदम्विधातुः ॥
भूयो भवामि यदि जन्मनिजन्मनि स्यां त्वत्पादपङ्कजलसन्मकरन्दभृङ्गी ॥४४
जन्मानि सन्तु मम देव शताधिकानि माया न मे विशतु चित्तमबोधहेतुः ।
किञ्चित्क्षणार्धमपि ते चरणारविन्दान्नापैतु मे हृदयमीश नमोनमस्ते ॥ ४५ ॥
इति प्रसाद्य देवेशं शबरी दृढनिश्चया । विवेश ज्वलितं वह्निं भस्मसादभवत्क्षणात्
शबरोऽपि तद्भस्म यत्नेन परिगृह्य सः । चक्रे दग्धगृहोपान्ते शिवपूजां समाहितः
अथ सस्मार पूजान्ते प्रसादग्रहणोचिताम् ।
दयितां नित्यमायान्तीं प्राञ्जलिं विनयान्विताम् ॥ ४८ ॥
स्मृतमात्रांतदापश्यदागतांपृष्ठतःस्थिताम् । पूर्वेणावयवेनैवभक्तिनम्रांशुचिस्मिताम्
तांवीक्ष्यशबरःपत्नींपूर्ववत्प्राजलिंस्थिताम् । भस्मावशेषितगृहं यथापूर्वमवस्थितम्
अग्निर्दहति तेजोभिःसूर्योदहति रश्मिभिः । राजा दहति दण्डेनब्राह्मणो मनसादहेत्

किमयं स्वप्न आहोस्वित्किं वा माया भ्रमात्मिका ।
इति विस्मयसम्भ्रान्तस्तां भूयः पर्यपृच्छत ॥ ५२ ॥
अपि त्वं चकथंप्राप्ता भस्मभूताऽसि पावके । दग्धं चभवनं भूयःकथंपूर्ववदास्थितम्
शबर्युवाच
यदा गृहं समुद्दीप्य प्रविष्टाऽहं हुताशने ।
तदात्मानं न जानामि न पश्यामि हुताशनम् ॥ ५४ ॥
न तापलेशोऽप्यासीन्मेप्रविष्टायाइवोदकम् । सुषुप्तेवक्षणार्धेनप्रबुद्धाऽस्मिपुनःक्षणात्
तावद्भवनमद्राक्षमदग्धमिव सुस्थितम् । अधुना देवपूजान्ते प्रसादं लब्धुमागता ॥
एवं परस्परं प्रेम्णा दम्पत्योर्भाषमाणयोः । प्रादुरासीत्तयोरग्रे विमानं दिव्यमद्भुतम्
तस्मिन्विमाने शतचन्द्रभास्वरे चत्वार ईशानुचराः पुरःसराः ।
हस्ते गृहीत्वाऽथ निषाददम्पती आरोपयामासुरमुक्तविग्रहौ ॥ ५८ ॥
तयोर्निषाददम्पत्योस्तत्क्षणादेव तद्वपुः । शिवदूतकरस्पर्शात्तत्सारूप्यमवाप ह ॥
तस्माच्छ्रद्धैव सर्वेषुविधेया पुण्यकर्मसु । नीचोपि शबरःप्राप श्रद्धयायोगिनां गतिम्
किं जन्मना सकलवर्णजनोत्तमेन-
किं विद्यया शकलशास्त्रविचारवत्या ।
यस्यास्ति चेतसि सदा परमेशभक्तिः
कोऽन्यस्ततस्त्रिभुवने पुरुषोऽस्ति धन्यः ॥ ६१ ॥
इति श्रीस्कन्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे
भस्ममाहात्म्यवर्णनेपाञ्चालभृत्यशबराख्यानवर्णनंनामसप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः

उमामहेश्वरव्रताचरणेशारदाख्यानवर्णनम्

सूत उवाच

अथाहं सम्प्रवक्ष्यामि सर्वधर्मोत्तमोत्तमम् । उमामहेश्वरं नाम व्रतं सर्वार्थसिद्धिदम्
आनर्त्तसम्भवः कश्चिन्नाम्ना वेदरथो द्विजः । कलत्रपुत्रसम्पन्नो विद्वानुत्तमवंशजः
तस्यैवं वर्त्तमानस्य ब्राह्मणस्य गृहाश्रमे । बभूव शारदानाम कन्या कमललोचना ॥
तां रूपलक्षणोपेतां बालां द्वादशहायनाम् । ययाचे पद्मनाभाख्यो मृतदारश्चसद्विजः
महाधनस्य शान्तस्यसदाराजसखस्यच । याञ्चाभङ्गभयात्तस्यतां कन्यांप्रददौपिता
मध्यन्दिने कृतोद्वाहः स विप्रः श्वशुरालये । सन्ध्यामुपासितुंसायं सरस्तटमुपाययौ
उपास्य सन्ध्यां विधिवत्प्रत्यागच्छत्तमोवृते ।
मार्गे दष्टो भुजङ्गेन ममार निजकर्मणा ॥ ७ ॥
तस्मिन्मृतेकृतोद्वाहेसहसा तस्यबान्धवाः । चुक्रुशुःशोकसन्तप्तौश्वशुरावस्यकन्यका
निर्हृत्यतंबन्धुजनाजग्मुःस्वंस्वं निवेशनम् । शारदाप्राप्तवैधव्या पितुरेवालये स्थिता
भूताच्छादनभोज्येनभर्त्राविरहितासती । निनायकतिचिन्मासान्साबालापितृमन्दिरे
एकदा नैध्रुवोनामकश्चिद्वृद्धतरो मुनिः । अन्धः शिष्यकरग्राही तन्मन्दिरमुपाययौ
तस्मिन्वृद्धे गृहं प्राप्ते क्वापि यातेषु बन्धुषु ।
साक्षादिवात्मनो दैवं सा बाला समुपागमत् ॥ १२ ॥
स्वागतंतेमहाभागपीठेऽस्मिन्नुपविश्यताम् । नमस्तेमुनिनाथायप्रियंतेकरवाणिकिम्
इत्युक्त्वाभक्तिमास्थायकृत्वा पादावनेजनम् । वीजयित्वापरिश्रान्तंतंमुनिंपर्यतोषयत्
श्रान्तंपीठेसमावेश्यकृत्वाभ्यङ्गं स्वपाणिना । कृतस्नानंच विधिवत्कृतदेवार्चनंमुनिम्
सुखासनोपविष्टं तं धूपमाल्यानुलेपनैः । अर्चयित्वा वरान्नेन भोजयामास सादरम्
भुक्त्वाचसम्यक्छनकैस्तृप्तश्चानन्दनिर्भरः । चकारान्धमुनिस्तस्यै सुप्रीतःपरमाशिषम्

विहृत्य भर्त्रा सहसा च तेन लब्ध्वा सुतं सर्वगुणैर्वरिष्ठम् ।

कीर्त्तिं च लोके महतीमवाप्य प्रसादयोग्या भव देवतानाम् ॥ १८ ॥

इत्यभिव्याहृतंतेन मुनिना गतचक्षुषा । निशम्य विस्मिताबाला प्रत्युवाचकृताञ्जलिः

ब्रह्मंस्त्वद्वचनंसत्यं कदाचिन्नमृषा भवेत् । तदेतन्मन्दभाग्यायाः कथमेतत्फलिष्यति

शिलाग्र्यामिव सद्वृष्टिः शुनक्यामिव सत्क्रिया ।

विफला मन्दभाग्यायामाशीर्ब्रह्मविदामपि २१ ॥

सैषाऽहं विधवा ब्रह्मन्दुष्कर्मफलभागिनी ।

त्वदाशीर्वचनस्याऽस्य कथं यास्यामि पात्रताम् ॥ २२ ॥

मुनिरुवाच

त्वामनालक्ष्य यत्प्रोक्तमन्धेनापिमयाऽधुना । तदेतत्साधयिष्यामिकुरुमच्छासनंशुभे!

उमामभेश्वरं नाम व्रतं यदि चरिष्यसि । तेन व्रतानुभावेन सद्यः श्रेयोऽनुभोक्ष्यसे

शारदोवाच

त्वयोपदिष्टं यत्नेनचरिष्याम्यपि दुश्चरम् । तद्व्रतं ब्रूहिमेब्रह्मन्विधानं वदविस्तरात्

मुनिरुवाच

चैत्रे वा मार्गशीर्षे वा शुक्लपक्षे शुभे दिने । व्रतारम्भं प्रकुर्वीत यथावद्गुर्वनुज्ञया ॥

अष्टम्यांचचतुर्दश्यामुभयोरपि पर्वणोः । सङ्कल्पं विधिवत्कृत्वा प्रातःस्नानंसमाचरेत्

सन्तर्प्य पितृदेवादीन्गत्वा स्वभवनंप्रति । मण्डपं रचयेद्दिव्यं वितानाद्यैरलङ्कृतम्

फलपल्लवपुष्पाद्यैस्तोरणैश्च समन्वितम् । पञ्चवर्णैश्च तन्मध्ये रजोभिः पद्ममुद्धरेत्

चतुर्दशदलैर्बाह्ये द्वाविंशद्भिस्तदन्तरे । तदन्तरे षोडशभिरष्टभिश्च तदन्तरे ॥ ३० ॥

एवं पद्मं समुद्धृत्य पञ्चवर्णैर्मनोरमम् । चतुरस्रं ततः कुर्यादन्तर्वर्तुलमुत्तमम् ॥ ३१

व्रीहितण्डुलराशिंचतन्मध्येच सकूर्चकम् । कूर्चोपरिसुसंस्थाप्यकलशं वारिपूरितम्

कलशोपरिविन्यस्यवस्त्रंवर्णसमन्वितम । तस्योपरिष्टात्सौवर्ण्यौप्रतिमेशिवयोःशुभे

निधाय पूजयेद्भक्तया यथाविभवविस्तरम् ॥ ३३ ॥

पञ्चामृतैस्तु संस्नाप्य तथा शुद्धोदकेन च । रुद्रैकादशकं जप्त्वा पञ्चाक्षरशताष्टकम्

अभिमन्त्र्य पुनः स्थाप्य पीठमध्ये तथाऽर्चयेत् ।

स्वयं शुद्धासनासीनो धौतशुक्लाम्बरः सुधीः ॥ ३५

पीठमामन्त्र्य मन्त्रेण प्राणायामान्समाचरेत् । सङ्कल्पंप्रवदेत्तत्रशिवाग्रेविहिताञ्जलिः

यानि पापानि घोराणिजन्मान्तरशतेषु मे । तेषां सर्वविनाशाय शिवपूजांसमारभे

सौभाग्यविजयारोग्यधर्मैश्वर्याभिवृद्धये । स्वर्गापवर्गसिद्ध्यर्थंकरिष्येशिवपूजनम्

इतिसङ्कल्पमुच्चार्ययथावत्सुसमाहितः । अङ्गन्यासं ततः कृत्वाध्यायेदीशञ्चपार्वतीम्

कुन्देन्दुधवलाकारं नागाभरणभूषितम् । वरदाभयहस्तं च बिभ्राणं परशुं मृगम्

सूर्यकोटिप्रतीकाशं जगदानन्दकारणम् । जाह्नवीजलसम्पर्काद्दीर्घपिङ्गजटाधरम्

उरगेन्द्रफणोद्भूतमहामुकुटमण्डितम् । शीतांशुखण्डविलसत्कोटीराङ्गदभूषणम्

उन्मीलद्बालनयनं तथा सूर्येन्दुलोचनम् । नीलकण्ठं चतुर्बाहुंगजेन्द्राजिनवाससम्

रत्नसिंहासनारूढं नागाभरणभूषितम् । देवीं च दिव्यवसनांबालसूर्यायुतद्युतिम्

बालवेषां च तन्वङ्गीं बालशीतांशुशेखराम् ।

पाशाङ्कुशवराभीति बिभ्रतीं च चतुर्भुजाम् ॥ ४५ ॥

प्रसादसुमुखीमम्बां लीलारसविहारिणीम् । लसत्कुरबकाशोकपुन्नागनवचम्पकैः

कृतावतंसामुत्फुल्लमल्लिकोत्कलितालकाम् ।

काञ्चीकलापपर्यस्तजघनाभोगशालिनीम् ॥ ४७ ॥

उदारकिङ्किणीश्रेणीनूपुराढ्यपदद्वयाम् । गण्डमण्डलसंसक्तरत्नकुण्डलशोभिताम्

बिम्बाधरानुरक्तांशुलसद्दशनकुड्मलाम् । महार्हरत्नग्रैवेयतारहारविराजिताम् ॥ ४९

नवमाणिक्यरुचिरकङ्कणाङ्गदमुद्रिकाम् । रक्तांशुकपरीधानां रत्नमाल्यानुलेपनाम्

उद्यत्पीनकुचद्वन्द्वनिन्दिताम्भोजकुड्मलाम् ।

लीलालोलासितापाङ्गीं भक्तानुग्रहदायिनीम् ॥ ५१ ॥

एवं ध्यात्वा तु हृत्पद्मे जगतः पितरौ शिवौ ।

जप्त्वा तदात्मकं मन्त्रं तदन्ते बहिरर्चयेत् ॥ ५२ ॥

आवाह्यप्रतिमायुग्मेकल्पयेदासनादिकम् । अर्घ्यंचदद्याच्छिवयोर्मन्त्रेणानेनमन्त्रवित्

नमस्ते पार्वतीनाथ! त्रैलोक्यवरदर्षभ !। त्र्यम्बकेश! महादेव! गृहाणार्घ्यंनमोऽस्तुते
नमस्ते देवदेवेशिप्रपन्नभयहारिणि । अम्बिके!वरदे! देविगृहाणार्घ्यं शिवप्रिये !॥५५
इतित्रिवारमुच्चार्यदद्यादर्घ्यंसमाहितः। गन्धपुष्पाक्षतान्सम्यग्धूपदीपान्प्रकल्पयेत्
नैवेद्यं पायसान्नेन घृताक्तं परिकल्पयेत् । जुहुयान्मूलमन्त्रेण हविरष्टोत्तरं शतम्
तत उद्वास्य नैवेद्यं धूपनीराजनादिकम् । कृत्वा निवेद्यताम्बूलंनमस्कुर्यात्समाहितः

अथाभ्यर्च्योपचारेण भोजयेद्विप्रदम्पती ॥ ५६ ॥
एवं सायन्तनीं पूजां कृत्वा विप्रानुमोदितः ।
भुञ्जीत वाग्यतो रात्रौ हविष्यं क्षीरभावितम् ॥ ६० ॥

एवं सम्वत्सरं कुर्याद्व्रतं पक्षद्वये बुधः । ततः सम्वत्सरे पूर्णे व्रतोद्यापनमाचरेत्
शतरुद्राभिजप्तेन स्नापयेत्प्रतिमे जलैः । आगमोक्तेन मन्त्रेण सम्पूज्यगिरिजाशिवौ
सवस्त्रं ससुवर्णं च कलशं प्रतिमान्वितम् । दत्त्वाचार्याय महते सदाचाररताय च

ब्राह्मणान्भोजयेद्भक्त्या यथाशक्त्याभिपूज्य च ॥ ६३ ॥
दद्याच्च दक्षिणां तेभ्यो गोहिरण्याम्बरादिकम् ।
भुञ्जीत तदनुज्ञातः सहेष्टजनबन्धुभिः ॥ ६४ ॥
एवं यः कुरुते भक्त्या व्रतं त्रैलोक्यविश्रुतम् ।
त्रिःसप्तकुलमुद्धृत्य भुक्त्वा भोगान्यथेप्सितान् ॥ ६५ ॥

इन्द्रादिलोकपालानां स्थानेषु रमते ध्रुवम् । ब्रह्मलोके च रमते विष्णुलोकेचशाश्वते
शिवलोकमथ प्राप्य तत्र कल्पशतंपुनः । भुक्त्वा भोगान्सुविपुलाञ्छिवमेवप्रपद्यते
महाव्रतमिदं प्रोक्तं त्वमपि श्रद्धया चर । अत्यन्तदुर्लभं वापिलप्स्यसेचमनोरथम्
इत्यादिष्टामुनीन्द्रेणसाबालामुदिताभृशम् । प्रत्यग्रहीत्सुविश्रब्धातद्वाक्यंसुमनोहरम्
अथ तस्याः समायाताःपितृमातृसहोदराः । तं मुनिं सुखमासीनंददृशुःकृतभोजनम्
सहसागत्य ते सर्वे नमश्चकुर्महात्मने । प्रसीद नः प्रसीदेति गृणन्तः पर्यपूजयन्

श्रुत्वा च ते तया साध्व्या पूजितं परमं मुनिम् ।
अनुग्रहं व्रतं तस्यै श्रुत्वा हर्षं परं ययुः ॥ ७२ ॥

ते कृताञ्जलयः सर्वे तमूचुर्मुनिपुङ्गवम् ॥ ७३ ॥

अद्य धन्या वयं सर्वे तवागमनमात्रतः । पावितं नः कुलं सर्वं गृहं च सफलीकृतम्
इयं च शारदा नाम कन्या वैधव्यमागता । केनापिकर्मयोगेन दुर्विलङ्घ्येन भूयसा
संसाद्य तव पादाब्जंप्रपन्नाशरणंसती । इमां समुद्धरासह्यात्सुघोराद्दुःखसागरात्

त्वयाऽपि तावदत्रैव स्थातव्यं नो गृहान्तिके ।
अस्मद्गृहमठेऽप्यस्मिन्स्नानपूजाजपोचिते ॥ ७७ ॥

एषा बालापि भगवन्कुर्वन्ती त्वत्पदार्चनम् । व्रतं त्वत्सन्निधावेवचरिष्यतिमहामुने!
यावत्समाप्तिमायातिव्रतमस्यास्त्वदन्तिके । उषित्वातावदत्रैवकृतार्थान्कुरुनोगुरो

एवमभ्यर्थितः सर्वैस्तस्या भ्रातृजनादिभिः ।
तथेति स मुनिश्रेष्ठस्तत्रोवास मठे शुभे ॥ ८० ॥
साऽपि तेनोपदिष्टेन मार्गेण गिरिजाशिवौ ।
अर्चयन्ती व्रतं सम्यक्चचार विमला सती ॥ ८१ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे उमामहेश्वरव्रताचरणे शारदाख्यानवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः

शारदाख्यानवर्णनम्

सूत उवाच

एवं महाव्रतं तस्याश्चरन्त्या गुरुसन्निधौ ।
सम्वत्सरो व्यतीयाय नियमासक्तचेतसः ॥ १ ॥

सम्वत्सरान्ते सा बाला तत्रैव पितृमन्दिरे । चकारोद्यापनंसम्यग्विप्रभोजनपूर्वकम्

दत्त्वा च दक्षिणां तेभ्यो ब्राह्मणेभ्यो यथार्हतः ।

विसृज्य तान्नमस्कृत्य पितृभ्यामभिनन्दिता ॥ ३ ॥
उपोषिता स्वयं तस्मिन्दिने नियममाश्रिता ।
जजाप परमं मन्त्रमुपदिष्टं महात्मना ॥ ४ ॥

अथप्रदोषसमये प्राप्ते सम्पूज्यशङ्करम् । तस्मिन्गृहान्तिकमठेगुरोस्तस्यचसन्निधौ
जपार्चनरता साध्वी ध्यायन्ती परमेश्वरम् । तस्मिञ्जागरणेरात्रावुपविष्टाशिवान्तिके

तस्यां रात्रौ तया सार्धं स मुनिर्जगदम्बिकाम् ।
जपध्यानतपोभिश्च तोषयामास पार्वतीम् ॥ ७ ॥

तस्याश्च भक्त्या व्रतभाविताया मुनेस्तपोयोगसमाधिना च ।
तुष्टा भवानी जगदेकमाता प्रादुर्बभूवाकृतसान्द्रमूर्त्तिः ॥ ८ ॥

प्रादुर्भूता यदागौरी तयोरग्रे जगन्मयी । अन्धोऽपितत्क्षणादेवमुनिःप्रापदृशोर्द्वयम्

तां वीक्ष्य जगतां धात्रीमाविर्भूतां पुरःस्थिताम् ।
निपेततुस्तत्पदयोः स मुनिः सा च कन्यका ॥ १० ॥
तौ भक्तिभावोच्छ्वसितामलाशयावानन्दबाष्पोक्षितसर्वगात्रौ ।
उत्थाप्य देवी कृपया परिप्लुता प्रेम्णा बभाषे मृदुवल्गुभाषिणी ॥ ११ ॥

देव्युवाच

प्रीताऽस्मि ते मुनिश्रेष्ठ! वत्से! प्रीताऽस्मि तेऽनघे ।
किम्वा ददाम्यभिमतं देवानामपि दुर्लभम् ॥ १२ ॥

मुनिरुवाच

एषा तु शारदा नाम कन्यातुगतभर्तृका । मयाप्रतिश्रुतंचास्यै तुष्टेन गतचक्षुषा ॥१३
सह भर्त्रा चिरं कालं विहृत्यसुतमुत्तमम् । लभस्वेतिमयाप्रोक्तंसत्यंकुरुनमोऽस्तुते

श्रीदेव्युवाच

एषापूर्वभवेबाला द्राविडस्यद्विजन्मनः । आसीद्द्वितीयादयिताभामिनानामविश्रुता
सा भर्तृप्रेयसी नित्यं रूपमाधुर्यपेशला । भर्तारं वशमानिन्ये रूपवश्यादिकैतवैः ॥

अस्यां चासक्तहृदयः स विप्रो मोहयन्त्रितः ।
कदाचिदपि नैवाऽगाज्ज्येष्ठपत्नीं पतिव्रताम् ॥ १७ ॥

अनभ्यागमनाद्भर्तुः सा नारीपुत्रवर्जिता । सदा शोकेन सन्तप्ता कालेन निधनं गता

अस्या गृहसमीपस्थो यः कश्चिद् ब्राह्मणो युवा ।
इमां वीक्ष्याऽथ चार्वङ्गीं कामार्तः करमग्रहीत् ॥ १६ ॥

अनया रोषताम्राक्ष्या सविप्रस्तु निवारितः । इमांस्मरन्दिवानक्तं निधनं प्रत्यपद्यत
एषासम्मोह्यभर्तारंज्येष्ठपत्न्यांपराङ्मुखम् । चकारतेनपापेनभवेस्मिन्विधवाऽभवत्

याः कुर्वन्ति स्त्रियो लोके जायापत्योश्च विप्रियम् ।
तासां कौमारवैधव्यमेकविंशतिजन्मसु ॥ २२ ॥

यदेतया पूर्वभवे मत्पूजा महती कृता । तेन पुण्येन तत्पापं नष्टं सर्वं तदैव हि ॥

यो विप्रो विरहार्तः सन्मृतः कामविमोहितः ।
सोऽस्याः पाणिग्रहं कृत्वा भवेऽस्मिन्निधनं गतः ॥ २४ ॥
प्राग्जन्मपतिरेतस्याः पाण्ड्यराष्ट्रेषु सोऽधुना ।
जातो विप्रवरः श्रीमान्सदारः सपरिच्छदः ॥ २५ ॥

तेन भर्त्रा प्रतिनिशंसैषाप्रेम्णाभिसङ्गता । स्वप्ने रतिसुखं यातु श्रेष्ठं जागरणादपि

षष्ट्युत्तरत्रिशतयोजनदूरसंस्थो देशादितो द्विजवरः स च कर्मगत्या ।
एनां वधूं प्रतिनिशं मनसोभिरामां स्वप्नेषु पश्यति चिरं रतिमादधानः ॥ २७

सैषावैस्वप्नसङ्गत्या पत्युः प्रतिनिशं सती । कालेन लप्स्यते पुत्रं वेदवेदाङ्गपारगम्

एतस्यां तनयं जातमात्मनश्चिरसङ्गमात् ।
सोऽपि विप्रोऽनिशं स्वप्ने द्रक्ष्यति प्रेमभावितम् ॥ २६ ॥

अनयाराधिता पूर्वं भवे साहं महामुने !। अस्यैव वरदानाय प्रादुर्भूतास्मिसाम्प्रतम्

सूत उवाच

अथोवाचमहादेवीतांबालांप्रतिसादरम् । अयि वत्से! महाभागे! शृणु मे परमं वचः
यदाकदापि भर्त्तारंकापिदेशे पुरातनम् । द्रक्ष्यसिस्वप्नदृष्टंप्राग्ज्ञास्यसेत्वंविचक्षणा

त्वां द्रक्ष्यति स विप्रोऽपि सुनयां स्वप्नलक्षणाम्
तदा परस्परालापो युवयोः सम्भविष्यति ॥ ३३ ॥

तदास्वतनयंभद्रेतस्मैदेहि बहुश्रुतम् । फलमस्य व्रतस्याग्र्य तस्य हस्ते समर्पय
ततः प्रभृति तस्यैव वशे तिष्ठ सुमध्यमे । युवयोर्दैहिकः सङ्गो माभूत्स्वप्नरताद्दृते
कालात्पञ्चत्वमापन्ने तस्मिन्ब्राह्मणसत्तमे । अग्निंप्रविश्यतेनैवसह यास्यसि मत्पदम्
पुत्रस्ते भविता सुभ्रु! सर्वलोकमनोरमः । सम्पदश्चभविष्यन्तिप्राप्स्यते परमं पदम्

सूत उवाच

इत्युक्त्वा त्रिजगन्मातादत्त्वातस्यैमनोरथम् । तयोःसम्पश्यतोरेवक्षणेनादर्शनंगता
सापि बाला वरं लब्ध्वा पार्वत्याः करुणानिधेः । अवापपरमानन्दंपूजयामासतंगुरुम्
तस्यांरात्र्यांव्यतीतायांसमुनिर्लब्धलोचनः । तस्याःपित्रोश्चतत्सर्वंरहस्याचष्टधर्मवित्
अथसर्वानुपामन्त्र्यशारदां च यशस्विनीम् । विधायानुग्रहंतेषांययौस्वैरगतिर्मुनिः
एवं दिनेषु गच्छत्सु साबाला चप्रतिक्षणम् । भर्तुःसमागमंलेभेस्वप्नेसुखविवर्धनम्
गौर्या वरप्रदानेन शारदा विशदव्रता । दधार गर्भं स्वप्नेऽपि भर्तुः सङ्गानुभावतः

तां श्रुत्वा भर्तृरहितां शारदां गर्भिणीं सतीम् ।
सर्वे धिगिति प्रोचुस्तां जारिणीति जगुर्जनाः ॥ ४४ ॥
सम्परेतस्य तद्भर्तुर्ये जातिकुलबान्धवाः ।
तां वार्तां दुःसहां श्रुत्वा ययुस्तत्पितृमन्दिरम् ॥ ४५ ॥

अथ सर्वे समायाताग्रामवृद्धाश्च पण्डिताः । समाजंचक्रिरेतत्रकुलवृद्धैःसमन्वितम्
अन्तर्वत्नींसमाहूयशारदां विनताननाम् । अतर्जयन्सुसंक्रुद्धाःकेचिदासन्पराङ्मुखाः

अयि जारिणि! दुर्बुद्धे! किमेतत्ते विचेष्टितम् ।
अस्मत्कुले सुदुष्कीर्त्ति कृतवत्यसि बालिशे !॥ ४८ ॥

इतिसन्तर्जयन्तस्ते ग्रामवृद्धामनीषिणः । सर्वेसम्मन्त्रयामासुःकिंकुर्मइतिभाषिणः
तत्रोचुःकेचवृद्धास्तां बालां प्रतिविनिर्दयाः । एषा पापमतिर्बालाकुलद्वयविनाशिनी

कृत्वाऽस्याः केशवपनं छित्त्वा कर्णौ च नासिकाम् ।

निर्वास्यतां बहिर्ग्रामात्परित्यज्य स्वगोत्रतः ॥ ५१ ॥

इति सर्वे समालोच्य तां तथा कर्तुमुद्यताः । अथान्तरिक्षेसम्भूताशुश्रुवे वागगोचरा
अनया न कृतं पापं न चैव कुलदूषणम् । व्रतभङ्गो न चैतस्यास्सुचरित्रेयमङ्गना ॥
इतः परमियं नारीं जारिणीतिवदन्ति ये । तेषां दोषविमूढानांसद्योजिह्वाविदीर्यते
इत्यन्तरिक्षेजनितांवाणीं श्रुत्वाऽशरीरिणीम् । सर्वेप्रजहृषुस्तस्याजननीजनकादयः
ततःससम्भ्रमाःसर्वेग्रामवृद्धाःसभाजनाः । मुहूर्त्तंमौनमालम्ब्यभीतास्तस्थुरधोमुखाः

तत्र केचिदविश्वस्ता मिथ्यावाणीत्यवादिषुः ।
तेषां जिह्वा द्विधा भिन्ना ववमुस्ते कृमीन्क्षणात् ॥ ५७ ॥
ततः सम्पूजयामासुस्तां बालां ज्ञातिबान्धवाः ।
बान्धवाश्च स्त्रियो वृद्धाः शशंसुः साधुसाध्विति ॥ ५८ ॥
मुमुचुः केचिदानन्दबाष्पबिन्दून् कुलोत्तमाः ।
कुलस्त्रियः प्रमुदितास्तामुद्दिश्य समाश्वसन् ॥ ५९ ॥

अथतत्रापरेप्रोचुर्देवो वदति नानृतम् । कथमेषा दधौ गर्भं शीलान्न चलिता ध्रुवम्

इतिसर्वान्सभ्यजनान्संशयाविष्टचेतसः ।
विलोक्य वृद्धस्तत्रैको (कः) सर्वज्ञो लोकतत्त्ववित् ॥ ६१ ॥
मायामयमिदं विश्वं दृश्यते श्रूयते च यत् ।
किम्भाव्यं किमभाव्यं वा संसारेऽस्मिन्क्षणात्मके ॥ ६२ ॥

अनिरूप्यमभूतार्थं मायया जायते स्फुटम् । ईश्वरस्यवशेमायातस्यकोवेद चेष्टितम्
उपरिचरस्य राजर्षेः शुक्रंनिपतितं जले । सशुक्रं तज्जलं पीत्वा वेश्या गर्भं दधौ किल
मुनेर्विभाण्डकस्यापिशुक्रंपीत्वासहाम्भसा । हरिणीगर्भिणीभूत्वाऋष्यशृङ्गमसूयत
सुराष्ट्रस्यतथा राज्ञः करंस्पृष्ट्वामृगाङ्गना । तत्क्षणाद्गर्भिणीभूत्वा मुनिंप्रासूततापसम्
तथा सत्यवतीनारी शफरीगर्भसम्भवा । तथैव महिषीगर्भो जातश्च महिषासुरः ॥
तथासन्तिपुरानार्यःकारुण्याद्गर्भसम्भवाः । तथाहिवसुदेवेनरोहिण्यास्तनयोऽभवत्
देवतानां महर्षीणां शापेन च वरेण च । अयुक्तमपि यत्कर्म युज्यते नात्र संशयः ॥

साम्बस्यजठराज्जातं मुसलंमुनिशापतः । युवनाश्वस्यगर्भोऽभून्मुनीनांमन्त्रगौरवात्
नूनमेषापिकल्याणी महर्षेः पादसेवनात् । महाव्रतानुभावाच्च धत्ते गर्भमनिन्दिता ॥
अस्मिन्नर्थे रहस्येनां सत्यंपृच्छन्तुयोषितः । ततोनिवृत्तसन्देहोभविष्यतिमहाजनः
ततस्तद्वचनादेव तामपृच्छन्स्त्रियोमिथः । ताभ्यःशशंसतत्सर्वंसा स्ववृत्तंमहाद्भुतम्
विजानन्तस्ततः सर्वे मानयित्वा च तां सतीम् ।
मोदमानाः प्रशंसन्तः प्रययुः स्वं स्वमालयम् ॥ ७४ ॥
अथ काले शुभे प्राप्ते शारदा विमलाशया । असूत तनयं बाला बालार्कसमतेजसम् ॥
स कुमारो महोदारलक्षणः कमलेक्षणः । अवाप्य महतीं विद्यां बाल्य एवमहामतिः
अथोपनीतो गुरुणा काले लोकमनोरमः । स शारदेय एवेति लोके ख्यातिमवाप ह
ऋग्वेदमष्टमे वर्षे नवमे यजुषां गणम् । दशमे सामवेदं च लीलयाध्यगमत्सुधीः ॥
अथ त्रिलोकमहिते सम्प्राप्तेशिवपर्वणि । गोकर्णं प्रययुः सर्वे जनाः सर्वनिवासिनः
शारदाऽपि स्वपुत्रेण गोकर्णं प्रययौ सती ॥ ८० ॥
तत्रापश्यत्समायातं सदा स्वप्नेषु लक्षितम् । पूर्वजन्मनिभर्त्तारं द्विजबन्धुजनावृतम्
तं दृष्ट्वाप्रेमनिर्विण्णापुलकाङ्कितविग्रहा । निरुद्धबाष्पप्रसरातस्थौ तन्न्यस्तलोचना
स च विप्रोऽपि तां दृष्ट्वा रूपलक्षणलक्षिताम् ।
स्वप्ने सदा भुज्यमानामात्मनो रतिदायिनीम् ॥ ८३ ॥
तंकुमारमपिस्वप्नेदृष्ट्वाचात्मशरीरजम् । विलोक्यविस्मयाविष्टस्तदन्तिकमुपाययौ
भद्रे! त्वां प्रष्टुमिच्छामि यत्किञ्चिन्मनसि स्थितम् ।
इति प्रथममाभाष्य रहः स्थानं निनाय ताम् ॥ ८५ ॥
कात्वंकथयवामोरुकस्यभार्यासिसुव्रते । कोदेशःकस्यवापुत्रीकिन्नामेत्यब्रवीच्चताम्
इति तेनसमापृष्टासानारीबाष्पलोचना । व्याजहारात्मनो वृत्तं बाल्यवैधव्यकारणम्
पुनः पप्रच्छ तां बालांपुत्रः कस्यायमुत्तमः । कथंधृतोवाजठरेबालोऽयंचन्द्रसन्निभः

शारदोवाच

एष मे तनयः स्वामिन्सर्वविद्याविशारदः । शारदेय इति प्रोक्तो ममनाम्नैवकल्पितः

इति तस्यावचः श्रुत्वाविहस्यब्राह्मणोत्तमः । प्रोवाचकष्टात्कष्टंहिचरितंतवभामिनि
पाणिग्रहणमात्रेते कृत्वाभर्त्तामृतःकिल । कथंचायंसुतोजातस्तस्यकारणमुच्यताम्
इति तेनोदितां वाणीमाकर्ण्याऽतीव लज्जिता ।
क्षणं चाऽश्रुमुखी भूत्वा धैर्यादित्थमभाषत ॥ ९२ ॥

शारदोवाच

तदलंपरिहासोक्त्यात्वंमांवेत्सिमहामते । त्वामहंवेद्मिवार्थेऽस्मिन्प्रमाणंमनआवयोः
इत्युक्त्वा सर्वमावेद्य देव्यादत्तंवरादिकम् । व्रतस्यार्धं कुमारं तं ददौतस्मैधृतव्रतम्
सोऽपि प्रमुदितोविप्रःकुमारंप्रतिगृह्यतम् । पित्रोरनुमतेनैव तां निनायनिजालयम्
सापि स्थित्वा बहून्मासांस्तस्य विप्रस्य मन्दिरे ।
तस्मिन्कालवशं प्राप्ते प्रविश्याग्निं तमन्वगात् ॥ ९६ ॥
ततस्तौ दम्पती भूत्वा विमानं दिव्यमास्थितौ ।
दिव्यभोगसमायुक्तौ जग्मतुः शिवमन्दिरम् ॥ ९७ ॥
इत्येतत्पुण्यमाख्यानं मया समनुवर्णितम् ।
पठतां शृण्वतां सम्यग्भुक्तिमुक्तिफलप्रदम् ॥ ९८ ॥
आयुरारोग्यसम्पत्तिधनधान्यविवर्द्धनम् । स्त्रीणांमङ्गलसौभाग्यसन्तानसुखसाधनम्
एतन्महाख्यानमघौघनाशनं गौरीमहेशव्रतपुण्यकीर्तनम् ।
भक्त्या सकृद्यः शृणुयाच्च कीर्त्तयेद्भुक्त्वा स भोगान्पदमेति शाश्वतम् ॥ १०० ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे
शारदाख्यानवर्णनं नामैकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः

रुद्राक्षमहिमवर्णनेराजपुत्रमन्त्रिपुत्रयोराख्यानवर्णनम्

सूत उवाच

अथ रुद्राक्षमाहात्म्यं वर्णयामि समासतः । सर्वपापक्षयकरं शृण्वतां पठतामपि ॥
अभक्तो वापिभक्तोवानीचो नीचतरोपि वा । रुद्राक्षान्धारयेद्यस्तु मुच्यतेसर्वपातकैः
रुद्राक्षधारणं पुण्यं केन वा सदृशं भवेत् । महाव्रतमिदं प्राहुर्मुनयस्तत्त्वदर्शिनः ॥
सहस्रं धारयेद्यस्तु रुद्राक्षाणां धृतव्रतः । तं नमन्ति सुराः सर्वे यथा रुद्रस्तथैव सः
अभावे तु सहस्रस्य बाह्वोः षोडश षोडश । एकं शिखायां करयोर्द्वादश द्वादशैव हि
द्वात्रिंशत्कण्ठदेशेतुचत्वारिंशत्तु मस्तके । एकैककर्णयोःषट्षट् वक्षस्यष्टोत्तरंशतम्

यो धारयति रुद्राक्षान्रुद्रवत्सोऽपि पूज्यते ॥ ६

मुक्ताप्रवालस्फटिकरौप्यवैदूर्यकाञ्चनैः । समेतान्धारयेद्यस्तु रुद्राक्षान्स शिवो भवेत्
केवलानपिरुद्राक्षान्यथालाभं बिभर्तियः । तंनस्पृशन्तिपापानितमांसीवविभावसुम्
रुद्राक्षमालया जप्तो मन्त्रोऽनन्तफलप्रदः । अरुद्राक्षो जपः पुंसां तावन्मात्रफलप्रदः
यस्याङ्गेनास्तिरुद्राक्षएकोपि बहुपुण्यदः । तस्यजन्मनिरर्थं स्यात्त्रिपुण्ड्ररहितंयदि
रुद्राक्षं मस्तकेबद्ध्वा शिरःस्नानं करोतियः । गङ्गास्नानफलंतस्य जायतेनात्रसंशयः
रुद्राक्षंपूजयेद्यस्तुविनातोयाभिषेचनम् । यत्फलंलिङ्गपूजायास्तदेवाप्नोतिनिश्चितम्
एकवक्त्राः पञ्चवक्त्रा एकादशमुखाः परे । चतुर्दशमुखाः केचिद्रुद्राक्षा लोकपूजिताः

भक्त्या सम्पूजितो नित्यं रुद्राक्षः शङ्करात्मकः ।
दरिद्रं वाऽपि कुरुते राजराजश्रियान्वितम् ॥ १४ ॥

अत्रेदम्पुण्यमाख्यानं वर्णयन्ति मनीषिणः । महापापक्षयकरं श्रवणात्कीर्त्तनादपि
राजाकाश्मीरदेशस्य भद्रसेनइतिश्रुतः । तस्य पुत्रोऽभवद्धीमान्सुधर्मानाम वीर्यवान्
तस्यामात्यसुतः कश्चित्तारको नाम सद्गुणः । बभूव राजपुत्रस्य सखा परमशोभनः

तावुभौपरमस्निग्धौ कुमारौ रूपसुन्दरौ । विद्याभ्यासपरौ बाल्येसहक्रीडांप्रचक्रतुः
तौ सदा सर्वगात्रेषु रुद्राक्षकृतभूषणौ । विचेरतुरुदाराङ्गौसततं भस्मधारिणौ ॥
हारकेयूरकटककुण्डलादिविभूषणम् । हेमरत्नमयं त्यक्त्वा रुद्राक्षान्दधतुश्च तौ ॥
रुद्राक्षमालिनौ नित्यं रुद्राक्षकरकङ्कणौ । रुद्राक्षकण्ठाभरणौ सदा रुद्राक्षकुण्डलौ
हेमरत्नाद्यलङ्कारे लोष्टपाषाणदर्शनौ । बोध्यमानावपि जनैर्न रुद्राक्षान्व्यमुञ्चताम् ॥
तस्य काश्मीरराजस्य गृहं प्राप्तो यदृच्छया । पराशरो मुनिवरः साक्षादिवपितामहः
तमर्चयित्वा विधिवद्राजाधर्मभृतां वरः । प्रपच्छ सुखमसीनं त्रिकालज्ञं महामुनिम्

राजोवाच

भगवन्नेष पुत्रोमे सोऽपि मन्त्रिसुतश्च मे । रुद्राक्षधारिणौनित्यं रत्नाभरणनिःस्पृहौ
शास्यमानावपि सदा रत्नाकल्पपरिग्रहे । विलङ्घितास्मद्वचनौ रुद्राक्षेष्वेव तत्परौ

नोपदिष्टाविमौ बालौ कदाचिदपि केनचित् ।
एषा स्वाभाविकी वृत्तिः कथमासीत्कुमारयोः ॥ २७ ॥

पराशर उवाच

शृणु राजन्प्रवक्ष्यामि तवपुत्रस्यधीमतः । यथात्वंमन्त्रिपुत्रस्यप्राग्वृत्तं विस्मयावहम्
नन्दिग्रामे पुरा काचिन्महानन्देति विश्रुता । बभूव वारवनिता शृङ्गारललिताकृतिः
छत्रंपूर्णेन्दुसङ्काशं यानंस्वर्णविराजितम् । चामराणि सुदण्डानिपादुकेचहिरण्यमये

अम्बराणि विचित्राणि महार्हाणि द्युमन्ति च ।
चन्द्ररश्मिनिभाः शय्याः पर्यङ्काश्च हिरण्मयाः ॥ ३१ ॥
गावो महिष्यः शतशो दासाश्च शतशस्तथा ॥ ३२ ॥

सर्वाभरणदीप्ताङ्ग्योदास्यश्चनवयौवनाः । भूषणानिपरार्ध्याणिनवरत्नोज्ज्वलानिच
गन्धकुङ्कुमकस्तूरीकर्पूरागुरुलेपनम् । चित्रमाल्यावतंसश्च यथेष्टं मृष्टभोजनम् ॥ ३४

नानाचित्रवितानाढ्यं नानाधान्यमयं गृहम् ।
बहुरत्नसहस्राढ्यं कोटिसंख्याधिकं धनम् ॥ ३५ ॥

एवं विभवसम्पन्ना वेश्या कामविहारिणी । शिवपूजारता नित्यं सत्यधर्मपरायणा

सदाशिवकथासक्ताशिवनामकथोत्सुका। शिवभक्ताङ्घ्रयवनताशिवभक्तिरतानिशम्
विनोदहेतोःसा वेश्या नाट्यमण्डपमध्यतः। रुद्राक्षैर्भूषयित्वैकं मर्कटंचैवकुक्कुटम्
करतालैश्च गीतैश्च सदा नर्तयति स्वयम्।
पुनश्च विहसन्त्युच्चैः सखीभिः परिवारिता॥ ३६॥
रुद्राक्षैःकृतकेयूरकर्णाभरणभूषणः। मर्कटः शिक्षया तस्याः सदा नृत्यति बालवत्
शिखायां बद्धरुद्राक्षःकुक्कुटःकपिनासह। चिरंनृत्यतिनृत्यज्ञः पश्यतांचित्रमावहम्
एकदा भवनं तस्याः कश्चिद्वैश्यः शिवव्रती।
आजगाम सरुद्राक्षस्त्रिपुण्ड्री निर्ममः कृती॥ ४२॥
स बिभ्रद्धस्म विशदे प्रकोष्ठ वरकङ्कणम्। महारत्नपरिस्तीर्णं ज्वलन्तं तरुणार्कवत्
तमागतंसा गणिकासम्पूज्य परया मुदा। तत्प्रकोष्ठगतं वीक्ष्यकङ्कणं प्राहविस्मिता
महारत्नमयः सोऽयं कङ्कणस्त्वत्करे स्थितः।
मनो हरति मे साधो! दिव्यस्त्रीभूषणोचितः॥ ४५॥
इति तां वररत्नाढ्ये सस्पृहां करभूषणे। वीक्ष्योदारमतिर्वैश्यः सस्मितंसमभाषत

वैश्य उवाच

अस्मिन्रत्नवरे दिव्ये यदि ते सस्पृहं मनः।
तमेवादत्स्व सुप्रीता मौल्यमस्य ददासि किम्॥ ४७॥

वेश्योवाच

वयं तु स्वैरचारिण्यो वेश्यास्तु न पतिव्रताः।
अस्मत्कुलोचितो धर्मो व्यभिचारो न संशयः॥ ४८॥
यद्येतद्रत्नखचितं ददासि करभूषणम्। दिनत्रयमहोरात्रं तव पत्नी भवाम्यहम्॥

वैश्य उवाच

तथास्तु यदि ते सत्यं वचनं वारवल्लभे!। ददामि रत्नवलयं त्रिरात्रं भव मद्वधूः॥
एतस्मिन्व्यवहारे तु प्रमाणं शशिभास्करौ।
त्रिवारं सत्यमित्युक्त्वा हृदयं मे स्पृश प्रिये!॥ ५१॥

वेश्योवाच

दिनत्रयमहोरात्रं पत्नी भूत्वा तव प्रभो!। सहधर्मं चरामीति सा तद्धृदयमस्पृशत्
अथ तस्यैसवैश्यस्तुप्रददौ रत्नकङ्कणम्। लिङ्गं रत्नमयंचास्याहस्ते दत्त्वेदमब्रवीत्
इदं रत्नमयं शैवं लिङ्गं मत्प्राणसन्निभम्। रक्षणीयंत्वयाकान्ते! तस्यहानिर्मृतिर्मम
एवमस्त्विति सा कान्ता लिङ्गमादाय रत्नजम्।
नाट्यमण्डपिकास्तम्भे निधाय प्राविशद् गृहम्॥ ५५॥
सा तेन सङ्गता रात्रौ वैश्येन विटधर्मिणा। सुखं सुष्वाप पर्यङ्के मृदुतल्पोपशोभिते
ततोनिशीथसमये नाट्यमण्डपिकान्तरे। अकस्मादुत्थितोवह्निस्तमेव सहसावृणोत्
मण्डपे दह्यमानेतुसहसोत्थायसम्भ्रमात्। सा वेश्यामर्कटंतत्र मोचयामासबन्धनात्
स मर्कटोमुक्तबन्धः कुक्कुटेन सहामुना। भीतो दूरं प्रदुद्राव विधूयाग्निकणान्बहून्
स्तम्भेनसह निर्दग्धं तल्लिङ्गं शकलीकृतम्। दृष्ट्वा वेश्या च वैश्यश्च दुरन्तंदुःखमापतुः
दृष्ट्वा प्राणसमं लिङ्गं दग्धं वैश्यपतिस्तथा। स्वयमप्यात्तनिर्वेदो मरणाय मतिं दधौ
निर्वेदान्नितरां खेदाद्वैश्यस्तामाह दुःखिताम्।
शिवलिङ्गे तु निर्भिन्ने नाहं जीवितुमुत्सहे॥ ६२॥
चितां कारयमे भद्रेतव भृत्यैर्बलाधिकैः। शिवेमनः समावेश्य प्रविशामि हुताशनम्
यदि ब्रह्मेन्द्रविष्ण्वाद्या वारयेयुः समेत्य माम्।
तथाऽप्यस्मिन्क्षणे धीरः प्रविश्याग्निं त्यजाम्यसून्॥ ६४॥
तमेवं दृढबन्धंसा विज्ञायबहुदुःखिता। स्वभृत्यैः कारयामासचितां स्वनगराद्बहिः
ततः स वैश्यः शिवभक्तिपूतः प्रदक्षिणीकृत्य समिद्धमग्निम्।
विवेश पश्यत्सु जनेषु धीरः सा चानुतापं युवती प्रपेदे॥ ६६॥
अथसादुःखितानारीस्मृत्वाधर्मंसुनिर्मलम्। सर्वान्बन्धून्समीक्ष्यैवं बभाषेकरुणंवचः
रत्नकङ्कणमादाय मया सत्यमुदाहृतम्। दिनत्रयमहं पत्नी वैश्यस्यामुष्यसम्मता॥
कर्मणा मत्कृतेनायं मृतो वैश्यः शिवव्रती। तस्मादहं प्रवेक्ष्यामिसहानेन हुताशनम्
सधर्मचारिणीत्युक्तं सत्यमेतद्धि पश्यथ॥ ६९॥

सत्येनप्रीतिमायान्तिदेवास्त्रिभुवनेश्वराः । सत्यासक्तिःपरोधर्मःसत्येसर्वंप्रतिष्ठितम्
सत्येन स्वर्गमोक्षौ च नाऽसत्येन परा गतिः
तस्मात्सत्यं समाश्रित्य प्रवेक्ष्यामि हुताशनम् ॥ ७२ ॥
इतिसाद्दृढनिर्बन्धावार्यमाणापिबन्धुभिः । सत्यलोपभयान्नारी प्राणांस्त्यक्तुं मनोदधे
सर्वस्वं शिवभक्तेभ्यो दत्त्वा ध्यात्वा सदाशिवम् ।
तमग्निं त्रिः परिक्रम्य प्रवेशाभिमुखी स्थिता ॥ ७३ ॥
तां पतन्तीं समिद्धेऽग्नौ स्वपदार्पितमानसाम् ।
वारयामास विश्वात्मा प्रादुर्भूतः शिवः स्वयम् ॥ ७४ ॥
सा तं विलोक्याऽखिलदेवदेवं त्रिलोचनं चन्द्रकलावतंसम्
शशाङ्कसूर्यानलकोटिभासं स्तब्धेव भीतेव तथैव तस्थौ ॥ ७५ ॥
तां विह्वलां परित्रस्तां वेपमानां जडीकृताम् ।
समाश्वास्य गलद्बाष्पां करे गृह्याऽब्रवीद्वचः ॥ ७६ ॥

शिव उवाच

सत्यं धर्मं च ते धैर्यं भक्तिं च मयि निश्चलाम् ।
निरीक्षितुं त्वत्सकाशं वैश्यो भूत्वाऽहमागतः ॥ ७७ ॥
माययाऽग्निं समुत्थाप्य दग्धवान्नाट्यमण्डपम् ।
दग्धं कृत्वा रत्नलिङ्गं प्रविष्टोऽस्मि हुताशनम् ॥७८ ॥
वेश्याः कैतवकारिण्यः स्वैरिण्यो जनवञ्चकाः ।
सा त्वं सत्यमनुस्मृत्य प्रविष्टाग्निं मया सह ॥ ७९ ॥
अतस्ते सम्प्रदास्यामि भोगांस्त्रिदशदुर्लभान् ।
आयुश्च परमं दीर्घमारोग्यं च प्रजोन्नतिम् ॥
यद्यदिच्छसि सुश्रोणि! तत्तदेव ददामि ते ॥ ८० ॥

सूत उवाच

इति ब्रुवति गौरीशे सा वेश्या प्रत्यभाषत ॥ ८१ ॥

वेश्योवाच

नमेवाञ्छाऽस्तिभोगेषुभूमौस्वर्गेरसातले । तवपादम्बुजस्पर्शादन्यत्किञ्चिन्नवै वृणे
एते भृत्याश्च दास्यश्च ये चाऽन्ये मम बान्धवाः ।
सर्वे त्वदर्चनपरास्त्वयि सन्न्यस्तवृत्तयः ॥ ८३ ॥
सर्वानेतान्मया सार्धंनीत्वा तव परं पदम् । पुनर्जन्मभयं घोरंविमोचयनमोऽस्तु ते
तथेति तस्या वचनं प्रतिनन्द्य महेश्वरः । तान्सर्वांश्च तया सार्धं निनाय परमं पदम्

पराशर उवाच

नाट्यमण्डपिकादाहे यौदूरंविद्रुतौ पुरा । तत्रावशिष्टौ तावेव कुक्कुटो मर्कटस्तथा
कालेन निधनं यातो यस्तस्या नाट्यमर्कटः ।
सोऽभूत्तव कुमारोऽसौ कुक्कुटो मन्त्रिणः सुतः ॥ ८७ ॥
रुद्राक्षधारणोद्भूतात्पुण्यात्पूर्वभवार्जितात् । कुले महतिसञ्जातौ वर्तेतेबालकाविमौ
पूर्वाभ्यासेन रुद्राक्षान्दधाते शुद्धमानसौ ।
अस्मिञ्जन्मनि तं लोकं शिवं सम्पूज्य यास्यतः ॥ ८९ ॥
एषा प्रवृत्तिस्त्वनयोर्बालयोः समुदाहृता ।
कथा च शिवभक्तायाः किमन्यत्प्रष्टुमिच्छसि ॥ ९० ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे
रुद्राक्षमहिमवर्णने काश्मीरदेशीयराजपुत्रमन्त्रिपुत्रयोराख्यानवर्णनंनाम
विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः

राजपुत्रस्यमृत्युनिवारणायरुद्राध्यायमहिमयवर्णनम्

सूत उवाच

एवंब्रह्मर्षिणाप्रोक्तांवाणींपीयूषसन्निभाम् । आकर्ण्य मुदितोराजाप्राञ्जलिःपुनरब्रवीत्

राजोवाच

अहो सत्सङ्गमः पुंसामशेषाघप्रशोधनः ।

कामक्रोधनिहन्ता च इष्टदोग्धा जनस्य हि ॥ २ ॥

मम मायातमो नष्टं ज्ञानदृष्टिः प्रकाशिता । तव दर्शनमात्रेण प्रायोऽहममरोत्तमः ॥३

श्रुतं च पूर्वचरितं बालयोः सम्यगेतयोः । भविष्यदपि पृच्छामि मत्पुत्राचरणं मुने

अस्यायुः कति वर्षाणि भाग्यं वद च कीदृशम् ।

विद्या कीर्त्तिश्च शक्तिश्च श्रद्धा भक्तिश्च कीदृशी ॥ ५ ॥

एतत्सर्वमशेषेणमुनेत्वंवक्तुमर्हसि । तवशिष्योस्मिभृत्योस्मिशरणंत्वांगतोस्म्हम्

पराशर उवाच

अत्रावाच्यं हि यत्किञ्चित्कथं शक्तोऽस्मि शंसितुम् ।

तच्छ्रुत्वा धृतिमन्तोऽपि विषादं प्राप्नुयुर्जनाः ॥ ७ ॥

तथापि निर्व्यलीकेन भावेनपरिपृच्छतः । अवाच्यमपिवक्ष्यामितवस्नेहान्महीपते!

अमुष्य त्वत्कुमारस्य वर्षाणि द्वादशात्ययुः । इतः परं प्रपद्येत सप्तमे दिवसेमृतिम्

इतितस्यवचःश्रुत्वाकालकूटमिवोदितम् । मूर्च्छितःसहसाभूमौपतितोनृपतिःशुचा

तमुत्थाप्यसमाश्वास्यसमुनिः करुणार्द्रधीः । उवाचमाभैर्नृपतेपुनर्वक्ष्यामितेहितम्

सर्गात्पुरानिरालोकं तदेकंनिष्कलंपरम् । चिदानन्दमयंज्योतिस आद्यःकेवलःशिवः

स एवादौ रजोरूपं सृष्ट्वा ब्रह्माणमात्मना । सृष्टिकर्मनियुक्ताय तस्मै वेदांश्चदत्तवान्

पुनश्च दत्तवानीश आत्मतत्त्वैकसंग्रहम् । सर्वोपनिषदांसारं रुद्राध्यायं च दत्तवान्

यदेकमव्ययंसाक्षाद्ब्रह्मज्योतिःसनातनम् । शिवात्मकंपरंतत्त्वंरुद्राध्यायेप्रतिष्ठितम्

स आत्मभूः सृजद्विश्वंचतुर्भिर्वदनैर्विराट् । ससर्जवेदांश्चतुरोलोकानांस्थिति हेतवे

तत्रायं यजुषांमध्ये ब्रह्मणोदक्षिणान्मुखात् । अशेषोपनिषत्सारोरुद्राध्यायःसमुद्गतः

स एष मुनिभिःसर्वैर्मरीच्यत्रिपुरोगमैः । सह देवैर्धृतस्तेभ्यस्तच्छिष्याजगृहुश्चतम्

तच्छिष्यशिष्यैस्तत्पुत्रैस्तत्पुत्रैश्च क्रमागतः ।

धृतो रुद्रात्मकःसोऽयं वेदसारः प्रसादितः ॥ १६ ॥

एष एव परोमन्त्र एष एव परन्तपः । रुद्राध्यायजपः पुंसां परं कैवल्यसाधनम् ॥

महापातकिनःप्रोक्ताउपपातकिनश्चये । रुद्राध्यायजपात्सद्यस्तेऽपियान्तिपराङ्गतिम्

भूयोपिब्रह्मणासृष्टाःसदसन्मिश्रयोनयः । देवतिर्यङ्मनुष्याद्यास्ततःसम्पूरितञ्जगत्

तेषां कर्माणि सृष्टानि स्वजन्मानुगुणानि च ।

लोकास्तेषु प्रवर्तन्ते भुञ्जते चैव तत्फलम् ॥ २३ ॥

लोकसृष्टिप्रवाहार्थं स्वयमेव प्रजापतिः । धर्माधर्मौ ससर्जाग्रे स्ववक्षः पृष्ठभागतः

धर्ममेवानुतिष्ठन्तः पुण्यं विन्दति तत्फलम् । अधर्ममनुतिष्ठन्तस्ते पापफलभोगिनः

पुण्यकर्मफलं स्वर्गो नरकस्तद्विपर्ययः । तयोर्द्वावधिपौ धात्राकृतौ शतमखान्तकौ

कामः क्रोधश्च लोभश्च मदमानादयः परे । अधर्मस्य सुता आसन्सर्वे नरकनायकाः

गुरुतल्पः सुरापानंतथान्यःपुल्कसीगमः । कामस्यतनया ह्येते प्रधानाःपरिकीर्त्तिताः

क्रोधात्पितृवधोजातस्तथामातृवधःपरः । ब्रह्महत्याच कन्यैका क्रोधस्यतनयाऽभवत्

देवस्वहरणश्चैव ब्रह्मस्वहरणस्तथा । स्वर्णस्तेय इतित्वेते लोभस्य तनयाःस्मृताः

एतानाहूय चाण्डालान्यमः पातकनायकान् । नरकस्य विवृद्ध्यर्थमाधिपत्यञ्चकारह

ते यमेन समादिष्टा नवपातकनायकाः । ते सर्वे सङ्गता भूयो घोराः पातकनायकाः

नरकान्पालयामासुःस्वभृत्यैश्चोपपातकैः । रुद्राध्यायेषुविप्राप्तेसाक्षात्कैवल्यसाधने

भीताः प्रदुद्रुवुः सर्वे तेऽमीपातकनायकाः । यमं विज्ञापयामासुः सहान्यैरुपपातकैः

जयदेव!महाराजवयं हि तवकिङ्कराः । नरकस्य विवृद्ध्यर्थं साधिकाराःकृतास्त्वया

अधुना वर्तितुं लोके न सक्ताः स्मो वयं प्रभो !।

रुद्राध्यायानुभावेन निर्दग्धाश्चैव विद्रुताः ॥ ३६ ॥

ग्रामेग्रामे नदीकूले पुण्येष्वायतनेषु च । रुद्रजाप्ये तु पर्याप्ते कथं लोके चरेमहि ॥
प्रायश्चित्तसहस्रं वै गणयामो न किञ्चन । रुद्रजाप्याक्षराण्येव सोढुं बत न शक्नुमः
महापातकमुख्यानामस्माकंलोकघातिनाम् । रुद्रजाप्यं भयंघोरं रुद्रजाप्यंमहद्विषम्
अतो दुर्विषहं घोरमस्माकं व्यसनं महत् । रुद्रजाप्येन सम्प्राप्तमपनेतुं त्वमर्हसि ॥
इति विज्ञापितःसाक्षाद्यमःपातकनायकैः । ब्रह्मणोऽन्तिकमासाद्यतस्मैसर्वंन्यवेदयत्
देवदेव! जगन्नाथ त्वामेव शरणंगतः । त्वया नियुक्तो मर्त्यानांनिग्रहे पापकारिणाम्

अधुना पापितो मर्त्या न सन्ति पृथिवीतले ।
रुद्राध्यायेन निहतं पातकानां महत्कुलम् ॥ ४३ ॥

पातकानां कुलेनष्टे नरकाः शून्यतांगताः । नरकेशून्यतांयाते मम राज्यंहिनिष्फलम्
तस्मात्त्वयैवभगवान्नुपायःपरिचिन्त्यताम्। यथामेनविहन्येतस्वामित्वंमर्त्यदेहिनाम्
इति विज्ञापितो धाता यमेन परिखिद्यता । रुद्रजाप्यविघातार्थमुपायं पर्यकल्पयत्
अश्रद्धाञ्चैव दुर्मेधामविद्यायाःसुतेउभे । श्रद्धामेधाविघातिन्यौ मर्त्येषुपर्यचोदयत्

ताभ्यां विमोहिते लोके रुद्राध्यायपराङ्मुखे ।
यमःस्वस्थानमासाद्य कृतार्थ इव सोऽभवत् ॥ ४८ ॥

पूर्वजन्मकृतैपापैर्जायन्तेऽल्पायुषो जनाः । तानिपापानिनश्यन्ति रुद्रं जप्तवतांनृणाम्
क्षीणेषु सर्वपापेषु दीर्घमायुर्बलं धृतिः । आरोग्यं ज्ञानमैश्वर्यं वर्धते सर्वदेहिनाम् ॥
रुद्राध्यायेन येदेवंस्नापयन्ति महेश्वरम् । कुर्वन्तस्तज्जलैःस्नानं ते मृत्युंसन्तरन्ति च
रुद्राध्यायाभिजप्तेनस्नानंकुर्वन्तियेऽम्भसा । तेषां मृत्युभयंनास्ति शिवलोकेमहीयते
शतरुद्राभिषेकेण शतायुर्जायते नरः । अशेषपापनिर्मुक्तः शिवस्य दयितो भवेत् ॥
एष रुद्रायुतस्नानं करोतु तव पुत्रकः । दशवर्षसहस्राणि मोदते भुवि शक्रवत् ॥
अव्याहतबलैश्वर्यो हतशत्रुर्निरामयः । निर्धूताखिलपापौघःशास्ता राज्यमकण्टकम्
विप्रा वेदविदःशान्ताः कृतिनःशंसितव्रताः । ज्ञानयज्ञतपोनिष्ठाः शिवभक्तिपरायणाः

रुद्राध्यायजपं सम्यक्कुर्वन्तु विमलाशयाः ।

तेषां जपानुभावेन सद्यः श्रेयो भविष्यति ॥ ५७ ॥
इत्युक्तवन्तं नृपतिर्महामुनिं तमेव वव्रे प्रथमं क्रियागुरुम् ।
अथाऽपरांस्त्यक्तधनाशयान्मुनीनावाहयामास सहस्रशः क्षणात् ॥ ५८ ॥

ते विप्राःशान्तमनसःसहस्रपरिसम्मिताः । कलशानांशतंस्थाप्य पुण्यवृक्षरसैर्युतम्
रुद्राध्यायेन संस्नाप्यतमुर्वीपतिपुत्रकम् । विधिवत्स्नापयामासुःसम्प्राप्ते सप्तमे दिने
स्नाप्यमानो मुनिजनैःस राजन्यकुमारकः । अकस्मादेवसन्त्रस्तःक्षणंमूर्च्छामवाप ह
सहसैव प्रबुद्धोऽसौमुनिभिःकृतरक्षणः । प्रोवाच कश्चित्पुरुषोदण्डहस्तःसमागतः
मां प्रहर्तुं कृतमतिर्भीमदण्डो भयानकः । सोऽपि चान्यैर्महावीरैः पुरुषैरभिताडितः
बद्ध्वा पाशेन महता दूरं नीत इवाभवत् । एतावदहमद्राक्षं भवद्भिः कृतरक्षणः ॥
इत्युक्तवन्तं नृपतेस्तनूजं द्विजसत्तमाः । आशीर्भिः पूजयामासुर्भयं राज्ञे न्यवेदयन्

अथ सर्वानृषीञ्छ्रेष्ठान्दक्षिणाभिर्नृपोत्तमः ।
पूजयित्वा वराह्नेन भोजयित्वा च भक्तितः ॥ ६६ ॥
प्रतिगृह्याऽऽशिषस्तेषां मुनीनां ब्रह्मवादिनाम् ।
भक्त्या बन्धुजनैः सार्धं सभायां समुपाविशत् ॥ ६७ ॥

तस्मिन्समागते वीरे मुनिभिःसह पार्थिवे । आजगाममहायोगीदेवर्षिर्नारदःस्वयम्

तमागतं प्रेक्ष्य गुरुं मुनीनां सार्धं सदस्यैरखिलैर्मुनीन्द्रैः ।
प्रणम्य भक्त्या विनिवेश्य पीठे कृतोपचारं नृपतिर्बभाषे ॥ ६८ ॥

राजोवाच

दृष्टं किमस्ति ते ब्रह्मंस्त्रिलोक्यां किञ्चिदद्भुतम् ।
तन्नो ब्रूहि वयं सर्वे त्वद्वाक्यामृतलालसाः ॥ ७० ॥

नारद उवाच

अद्यचित्रंमहद्दृष्टं व्योम्नोऽवतरतामया । तच्छृणुष्व महाराज ! सहैभिर्मुनिपुङ्गवैः
अद्य मृत्युरिहायातो निहन्तुं तवपुत्रकम् । दण्डहस्तोदुराधर्षो लोकमुद्बाधयन्सदा
ईश्वरोऽपि विदित्वैनं त्वत्पुत्रं हन्तुमागतम् । सहैवपार्षदैःकश्चिद्वीरभद्रमचोदयत्

स आगत्यहठान्मृत्युं त्वपुत्रं हन्तुमागतम् । गृहीत्वासुदृढंबद्ध्वादण्डेनाभ्यहनद्रुषा
तं नीयमानं जगदीशसन्निधिं शीघ्रं विदित्वा भगवान्यमः स्वयम् ।
कृताञ्जलिर्देव जयेत्युदीरयन्प्रणम्य मूर्ध्ना निजगाद शूलिनम् ॥ ७५ ॥

यम उवाच

देवदेव! महारुद्र! वीरभद्र! नमोऽस्तुते । निरागसिकथंमृत्यौकोपस्तव समुत्थितः
निजकर्मानुबन्धेन राजपुत्रं गतायुषम् । प्रहर्तुमुद्यते मृत्यौ कोऽपराधोवद प्रभो !॥

वीरभद्र उवाच

दशवर्षसहस्रायुः स राजतनयः कथम् । विपत्तिमन्तरायाति रुद्रस्नानहताशुभः ॥
अस्ति चेत्तव सन्देहो मद्वाक्येऽप्यनिवारिते ।
चित्रगुप्तं समाहूय प्रष्टव्योऽद्यैव मा चिरम् ॥ ७६ ॥

नारद उवाच

अथाहूतश्चित्रगुप्तो यमेनसहसागतः । आयुः प्रमाणं त्वत्सूनोः परिपृष्टः स चाब्रवीत्
द्वादशाब्दंचतस्यायुरित्युक्त्वाथविमृश्यच । पुनर्लेख्यगतंप्राह स वर्षायुतजीवितम्
अथभीतोयमोराजावीरभद्रं प्रणम्य च । कथञ्चिन्मोचयामास मृत्युंदुर्वारबन्धनात्
वीरभद्रेणमुक्तोऽथयमोऽगान्निजमन्दिरम् । वीरभद्रश्च कैलासमहं प्राप्तस्तवान्तिकम्
अतस्तवकुमारोऽयंरुद्रजाप्यानुभावतः । मृत्योर्भयं समुत्तीर्य सुखीजातोऽयुतंसमाः
इत्युक्त्वा नृपमामन्त्र्य नारदे त्रिदिवंगते ।
विप्राः सर्वे प्रमुदिताः स्वं स्वं जग्मुरथाश्रमम् ॥ ८५ ॥
इत्थं काश्मीरनृपतीरुद्राध्यायप्रभावतः । निस्तीर्याशेषदुःखानि कृतार्थोभूत्सपुत्रकः
ये कीर्तयन्ति मनुजाः परमेश्वरस्य माहात्म्यमेतदथ कर्णपुटैः पिबन्ति ।
ते जन्मकोटिकृतपापगणैर्विमुक्ताः शान्ताः प्रयान्ति परमं पदमिन्दुमौलेः ॥८७
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां तृतीये ब्रह्मोत्तरखण्डे
राजपुत्रस्यमृत्युनिवारणायरुद्राध्यायमहिमवर्णनं नामैकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः

पुराणश्रवणमहिमवर्णनम्

सूत उवाच

एवं शिवतमः पन्था शिवेनैव प्रदर्शितः । नृणां संसृतिबद्धानां सद्यो मुक्तिकरःपरः
अथ दुर्मेधसां पुंसां वेदेष्वनधिकारिणाम् ।
स्त्रीणां द्विजातिबन्धूनां सर्वेषां च शरीरिणाम् ॥ २ ॥
एष साधारणःपन्थाःसाक्षात्कैवल्यसाधनः । महामुनिजनैः सेव्योदेवैरपिसुपूजितः
यत्कथाश्रवणं शम्भोःसंसारभयनाशनम् । सद्योमुक्तिकरंश्लाघ्यं पवित्रंसर्वदेहिनाम्
अज्ञानतिमिरान्धानांदीपोऽयंज्ञानसिद्धिदः । भवरोगनिबद्धानांसुसेव्यंपरमौषधम्
महापातकशैलानां वज्रघातसुदारुणम् । भर्जनं कर्मबीजानां साधनं सर्वसम्पदाम्
येश्रृण्वन्तिसदाशम्भोःकथांभुवनपावनीम् । ते वैमनुष्यालोकेस्मिन्रुद्राएवनसंशयः
श्रृण्वतां शूलिनो गाथां तथा कीर्तयतां सताम् ।
तेषां पादरजांस्येव तीर्थानि मुनयो जगुः ॥ ८ ॥
तस्मान्निःश्रेयसं गन्तुं येऽभिवाञ्छन्ति देहिनः ।
ते श्रृण्वन्तु सदा भक्त्या शैवीं पौराणिकीं कथाम् ॥ ९ ॥
यद्यशक्तःसदाश्रोतुं कथांपौराणकीं नरः । मुहूर्त्तं वापिश्रृणुयान्नियतात्मा दिनेदिने
अथ प्रतिदिनं श्रोतुमशक्तो यदिमानवः । पुण्यमासेषु वा पुण्येदिनेपुण्यतिथिष्वपि
यः श्रृणोति कथां रम्यां पुराणैः समुदीरिताम् ।
स निस्तरति संसारं दग्ध्वा कर्ममहाटवीम् ॥ १२ ॥
मुहूर्तंवातदर्द्धंवाक्षणंवापावनींकथाम् । येश्रृण्वन्तिसदाभक्त्यानतेषामस्तिदुर्गतिः
यत्फलंसर्वयज्ञेषु सर्वदानेषु यत्फलम् । सकृत्पुराणश्रवणात्तत्फलं विन्दते नरः ॥१४
कलौयुगे विशेषेण पुराणश्रवणादृते । नास्तिधर्मः परःपुंसां नास्तिमुक्तिपथः परः

पुराणश्रवणाच्छम्भोर्नास्ति संकीर्तनं परम् ।
अत एव मनुष्याणां कल्पद्रुममहाफलम् ॥ १६ ॥
कलौ हीनायुषो मर्त्या दुर्बलाः श्रमपीडिताः ।
दुर्मेधसो दुःखभाजो धर्माचारविवर्जिताः ॥ १७ ॥
इति सञ्चिन्त्यकृपया भगवान्बादरायणः । हितायतेषांविदधे पुराणाख्यं सुधारसम्
पिबन्नेवामृतं यत्नादेतत्स्यादजरामरः । शम्भोः कथामृतं कुर्यात्कुलमेवाजरामरम्
बालो युवा दरिद्रो वा वृद्धो वा दुर्बलोऽपि वा ।
पुराणज्ञः सदा वन्द्यः पूज्यश्च सुकृतार्थिभिः ॥ २० ॥
नीचबुद्धिं न कुर्वीत पुराणज्ञे कदाचन । यस्यवक्त्राम्बुजाद्वाणीकामधेनुःशरीरिणाम्
गुरवः सन्ति लोकेषु जन्मतो गुणतस्तथा । तेषामपिच सर्वेषां पुराणज्ञः परो गुरुः
भवकोटिसहस्रेषु भूत्वा भूत्वाऽवसीदति ।
यो ददात्यपुनर्वृत्तिं कोऽन्यस्तस्मात्परो गुरुः ॥ २३ ॥
पुराणज्ञः शुचिर्दान्तः शान्तो विजितमत्सरः ।
साधुः कारुण्यवान्वाग्मी वदेत्पुण्यकथां सुधीः ॥ २४ ॥
व्यासासनं समारूढोयदापौराणिकोद्विजः । असमाप्तप्रसङ्गश्चनमस्कुर्यान्नकस्यचित्
येधूर्तायेचदुर्वृत्तायेचान्ये विजिगीषवः । तेषांकुटिलवृत्तीनामग्रे नैव वदेत्कथाम् ॥
नदुर्जनसमाकीर्णे नशूद्रश्वापदावृते । देशे न द्यूतसदने वदेत्पुण्यकथां सुधीः ॥ २७
सद्ग्रामे सुजनाकीर्णे सुक्षेत्रे देवतालये । पुण्येनदनदीतीरे वदेत्पुण्यकथां सुधीः ॥
शिवभक्तिसमायुक्ता नान्यकार्येषु लालसाः ।
वाग्यताः शुचयोऽव्यग्राः श्रोतारः पुण्यभागिनः ॥ २६ ॥
अभक्ता ये कथां पुण्यां शृण्वन्ति मनुजाधमाः ।
तेषां पुण्यफलं नास्ति दुःखं स्याज्जन्मजन्मनि ॥ ३० ॥
पुराणंयेत्वसम्पूज्यताम्बूलाद्यैरुपायनैः । शृण्वन्तिचकथांभक्त्यादरिद्राःस्युर्नपापिनः
कथायां कीर्त्यमानायां ये गच्छन्त्यन्यतो नराः ।

भोगान्तरे प्रणश्यन्ति तेषां दाराश्च सम्पदः ॥ ३२ ॥
सोष्णीषमस्तका ये च कथां शृण्वन्ति पावनीम् ।
ते बलाकाः प्रजायन्ते पापिनो मनुजाधमाः ॥ ३३ ॥
ताम्बूलंभक्षयन्तोयेकथांशृण्वन्तिपावनीम् । स्वविष्ठांखादयन्त्येतान्नरकेयमकिङ्कराः
येचतुङ्गासनारूढाःकथांशृण्वन्तिदाम्भिकाः ।अक्षयान्नरकान्भुक्त्वातेभवन्त्येववायसाः
ये चवीरासनारूढायेच मञ्चकसंस्थिताः । शृण्वन्तिसत्कथांतेवैभवन्त्यर्जुनपादपाः
असम्प्रणम्यशृण्वन्तोविषवृक्षाभवन्तिते । कथांशयानाःशृण्वन्तो भवन्त्यजगरानराः
यः शृणोतिकथांवक्तुः समानासनमाश्रितः । गुरुतल्पसमंपापंसम्प्राप्य नरकंव्रजेत्
ये निन्दन्ति पुराणज्ञं कथां वा पापहारिणीम् ।
ते वै जन्मशतं मर्त्याः शुनकाःसम्भवन्ति च ॥ ३६ ॥
कथायां वर्तमानायांये वदन्ति नराधमाः । ते गर्दभाःप्रजायन्तेकृकलासास्ततःपरम्
कदाचिदपियेपुण्यांनशृण्वन्तिकथांनराः । तेभुक्त्वानरकान्घोरान्भवन्तिवनसूकराः
ये कथामनुमोदन्ते कीर्त्यमानांनरोत्तमाः । अशृण्वन्तोऽपितेयान्तिशाश्वतंपरमंपदम्
कथायां कीर्त्यमानायां विघ्नं कुर्वन्ति ये शठाः ।
कोट्यब्दान्नरकान्भुक्त्वा भवन्ति ग्रामसूकराः ॥ ४३ ॥
ये श्रावयन्ति मनुजान्पुण्यां पौराणिकीं कथाम् ।
कल्पकोटिशतं साग्रं तिष्ठन्ति ब्रह्मणः पदम् ॥ ४४ ॥
आसनार्थं प्रयच्छन्ति पुराणज्ञस्य ये नराः । कम्बलाजिनवासांसिमञ्चंफलकमेव च
स्वर्गलोकं समासाद्य भुक्त्वा भोगान्यथेप्सितान् ।
स्थित्वा ब्रह्मादिलोकेषु पदं यान्ति निरामयम् ॥ ४६ ॥
पुराणज्ञस्य यच्छन्ति ये सूत्रवसनंनवम् । भोगिनोज्ञानसम्पन्नास्तेभवन्ति भवे भवे
ये महापातकैर्युक्ता उपपातकिनश्चये । पुराणश्रवणादेव ते यान्ति परमं पदम् ॥४८
अत्रवक्ष्ये महापुण्यमितिहासं द्विजोत्तमाः । शृण्वतांसर्वपापघ्नंविचित्रंसुमनोहरम्
दक्षिणापथमध्येवै ग्रामोबाष्कलसञ्ज्ञितः । तत्रसन्तिजनाः सर्वैमूढाःकर्मविवर्जिताः

न तत्र ब्राह्मणाचाराः श्रुतिस्मृतिपराङ्मुखाः ।

जपस्वाध्यायरहिताः परस्त्रीविषयातुराः ॥ ५१ ॥

कृषीवलाःशस्त्रधरा निर्दैवाजिह्मवृत्तयः । न जानन्ति परं धर्मं ज्ञानवैराग्यलक्षणम् ॥

स्त्रियश्च पापनिरताः स्वैरिण्यः कामलालसाः ।

दुर्बुद्धयः कुटिलगाः सद्व्रताचारवर्जिताः ॥ ५३ ॥

तत्रैको विदुरोनाम दुरात्माब्राह्मणाधमः । आसीद्वेश्यापतिर्योसौसदारोपिकुमार्गगः स्वपत्नींबन्दुलांनाम हित्वाप्रतिनिशं तथा । वेश्याभवनमासाद्यरम ते स्मरपीडितः सापितस्याङ्गनारात्रौ वियुक्ता नवयौवना । असहन्तीस्मरावेशं रेमेजारेण सङ्गता ॥ तां कदाचिद्दुराचारांजारेणसहसङ्गताम् । दृष्ट्वातस्याःपतिःक्रोधादभिदुद्रावसत्वरः जारे पलायिते पत्नीं गृहीत्वा स दुराशयः । सन्ताड्य मुष्टिबन्धेन मुहुर्मुहुरताडयत् सा नारी पीडिता भर्त्राकुपिता प्राह निर्भया । भवान्प्रतिनिशंवेश्यांरमतेकागतिर्मम अहंरूपवती योषा नवयौवनशालिनी । कथं सहिष्ये कामार्ता तव सङ्गतिवर्जिता॥

इत्युक्तः स तया तन्व्याप्रोवाच ब्राह्मणाधमः ।

युक्तमेव त्वयोक्तं हि तस्माद्वक्ष्यामि ते हितम् ॥ ६१ ॥

जारेभ्यो धनमाकृष्यतेभ्योदेहिपरांरतिम् । तद्धनंदेहिमेसर्वंपण्यस्त्रीणांददामितत् एवं सम्पूर्यते कामो ममापिच वरानने । तथेतिभर्तृवचनंप्रतिजग्राह सा वधूः ॥ ६३ एवं तयोस्तु दम्पत्योर्दुराचारप्रवृत्तयोः । कालेन निधनं प्राप्तः स विप्रोवृषलीपतिः मृते भर्तरि सा नारी पुत्रैः सहनिजालये । उवाससुचिरंकालंकिञ्चिदुत्क्रान्तयौवना एकदा दैवयोगेन सम्प्राप्ते पुण्यपर्वणि । सा नारीबन्धुभिःसार्द्धं गोकर्णं क्षेत्रमाययौ

तत्र तीर्थजले स्नात्वा कस्मिंश्चिद्देवतालये ।

शुश्राव देवमुख्यानां पुण्यां पौराणिकीं कथाम् ॥ ६७ ॥

योषितां जारसक्तानां नरके यमकिङ्कराः । सन्तप्तलोहपरिघं क्षिपन्ति स्मरमन्दिरे इति पौराणिकेनोक्तांसाश्रुत्वा धर्मसंहिताम् । तमुवाचरहस्येषाभीताब्राह्मणपुङ्गवम् ब्रह्मन्पापमजानन्त्या मयाचरितमुल्बणम् । यौवने कामचारेण कौटिल्येन प्रवर्तितम्

इदं त्वद्वचनं श्रुत्वा पुराणार्थविजृम्भितम् । भीतिर्मे महती जाता शरीरं वेपतेमुहुः

धिङ् मां दुरिन्द्रियासक्तां पापां स्मरविमोहिताम् ।

अल्पस्य यत्सुखस्यार्थे घोरां यास्यामि दुर्गतिम् ॥ ७२ ॥

कथं पश्यामि मरणे यमदूतान्भयङ्करान् । कथं पाशैर्बलात्कण्ठे बध्यमाना धृतिं लभे कथं सहिष्ये नरके खण्डशोदेहकृन्तनम् । पुनः कथं पतिष्यामि सन्तप्ता क्षारकर्दमे कथं च योनिलक्षेषुक्रिमिकीटखगादिषु । परिभ्रमामिदुःखौघात्पीड्यमानानिरन्तरम् कथं च रोचते मह्यमद्यप्रभृति भोजनम् । रात्रौ कथंचसेविष्ये निद्रां दुःखपरिप्लुता हाहाहतास्मिदग्धास्मिविदीर्णहृदयास्मिच । हाविधे!मांमहापापेदत्त्वाबुद्धिमपातयः

पततस्तुङ्गशैलाग्राच्छूलाक्रान्तस्य देहिनः ।

यद्दुःखं जायते घोरं तस्मात्कोटिगुणं मम ॥ ७८ ॥

अश्वमेधायुतं कृत्वा गङ्गांस्नात्वाशतंसमाः । न शुद्धिर्जायते प्रायोमत्पापस्यगरीयसः किंकरोमिक्वगच्छामि कंवाशरणमाश्रये । को वा मां त्रायते लोकेपतन्तीं नरकार्णवे त्वमेवमेगुरुर्ब्रह्मंस्त्वंमातात्वंपितासि च । उद्धरोद्धरमां दीनां त्वामेव शरणं गताम् इति तां जातनिर्वेदां पतितां चरणद्वये । उत्थाप्य कृपया धीमान्बभाषे द्विजपुङ्गवः

ब्राह्मण उवाच

दिष्ट्याकालेप्रबुद्धासिश्रुत्वेमांमहतींकथाम् । माभैषीस्तववक्ष्यामिगतिंचैवसुखावहाम् सत्कथाश्रवणादेव जाता ते मतिरीदृशी । इन्द्रियार्थेषु वैराग्यंपश्चात्तापो महानभूत् पश्चात्तापो हि सर्वेषामघानां निष्कृतिः परा । तेनैव कुरुते सद्यःप्रायश्चित्तं सुधीर्नरः

प्रायश्चित्तानि सर्वाणि कृत्वा च विधिवत्पुनः ।

अपश्चात्तापिनो मर्त्या न यान्ति गतिमुत्तमाम् ॥ ८६ ॥

सत्कथाश्रवणान्नित्यंसंयातिपरमाङ्गतिम । पुण्यक्षेत्रनिवासाच्चचित्तशुद्धिःप्रजायते यथा सत्कथयानित्यंसंयातिपरमांगतिम् । तथान्यैः सद्व्रतैर्जन्तोर्नभवेन्मतिरुत्तमा यथामुहुःशोध्यमानोदर्पणोनिर्मलोभवेत् । तयासत्कथयाचेतो विशुद्धिं परमां व्रजेत्

विशुद्धे चेतसि नृणां ध्यानं सिध्यत्युमापतेः ।

ध्यानेन सर्वं मलिनं मनोवाक्कायसम्भृतम् ॥ ९० ॥
सद्यो विधूय कृतिनो यान्ति शम्भोः परं पदम् ।
अतः सन्न्यस्तपुण्यानां सत्कथासाधनं परम् ॥ ९१ ॥
कथया सिध्यति ध्यानं ध्यानात्कैवल्यमुत्तमम् ।
असिद्धपरमध्यानः कथामेतां शृणोति यः ।
सोऽन्यजन्मनि सम्प्राप्य ध्यानं याति परां गतिम् ॥ ९२ ॥

नामोच्चारणमात्रेणजप्त्वामन्त्रमजामिलः । पश्चात्तापसमायुक्तस्त्ववापपरमांगतिम्
सर्वेषां श्रेयसाम्बीजं सत्कथाश्रवणंनृणाम् ।यस्तद्विहीनःसपशुःकथंमुच्येतबन्धनात्
अतस्त्वमपिसर्वेभ्योविषयेभ्योनिवृत्तधीः । भक्तिं परांसमाधायसत्कथांशृणुसर्वदा

शृण्वन्त्याः सत्कथां नित्यं चेतस्ते शुद्धिमेष्यति ॥ ९५ ॥

तेनध्यायसिविश्वेशंततोमुक्तिमवाप्स्यसि । ध्यायतःशिवपादाब्जंमुक्तिरेकेनजन्मना
भविष्यति न सन्देहःसत्यंसत्यंवदाम्यहम् । इत्युक्तातेनविप्रेणसानारीवाष्पसङ्कुला

पतित्वा पादयोस्तस्य कृतार्थाऽस्मीत्यभाषत ।
तस्मिन्नेव महाक्षेत्रे तस्मादेव द्विजोत्तमात् ॥ ९८ ॥
शुश्राव सत्कथां साध्वीं कैवल्यफलदायिनीम् ।
स उवाच द्विजस्तस्यै कथां वैराग्यबृंहिताम् ॥ ९९ ॥

यां श्रुत्वामनुजःसद्यस्त्यजेद्विषयवासनाम् । तस्याश्चित्तंयथाशुद्धंवैराग्यरसगंयथा

तथोवाच द्विजः शैवीं कथां भक्तिसमन्विताम् ।
यथायथा मनस्तस्याः प्रसादमभिगच्छति ।
तथातथा शनैः शम्भोर्ध्यानयोगमुपादिशत् ॥ १०१ ॥

शनैः शनैर्ध्वस्तरजस्तमोमलं विमुक्तसर्वेन्द्रियभोगविग्रहम् ।
विशुद्धतत्त्वं हृदयं द्विजस्त्रिया विवेश विश्वेश्वररूपचिन्तनम् ॥ १०२ ॥

इत्थं सद्गुरुमाश्रित्यसानारीप्राप्तसन्मतिः । दध्यौ मुहुर्मुहुःशम्भोश्चिदानन्दमयंवपुः
नित्ं तीर्थजलेस्नात्वाजटावल्कलधारिणी । भस्मोद्धलितसर्वाङ्गीरुद्राक्षकृतभूषणा

शिवनामजपासक्तावाग्यतामितभोजना । बद्धपद्मासनाऽव्यग्रासत्कथाश्रवणोत्सुका
गुरुशुश्रूषणरता त्यक्तापत्यसुहृज्जना । गुरूपदिष्टयोगेन शिवमेवमतोषयत् ॥ ६ ॥

विश्वेश! विश्वविलयस्थितिजन्महेतो! विश्वैकवन्द्य! शिव! शाश्वतविश्वरूप !
विध्वस्तकालविपरीतगुणावभास! श्रीमन्महेश! मयि धेहि कृपाकटाक्षम् ॥७॥
शम्भो! शशाङ्ककृतशेखर ! शान्तमूर्ते! गङ्गाधरामरवरार्चितपादपद्म ।
नागेन्द्रभूषण! नगेन्द्रनिकेतनेश! भक्तार्तिहन्मयि निधेहि कृपाकटाक्षम् ॥ ८ ॥
श्रीविश्वनाथ! करुणाकर! शूलपाणे ! भूतेश! भर्ग भुवनत्रयगीतकीर्ते !।
श्रीनीलकण्ठ! मदनान्तक! विश्वमूर्ते! गौरीपते! मयि निधेहि कृपाकटाक्षम् ॥

इत्थं प्रतिदिनं भक्त्या प्रार्थयन्ती महेश्वरम् ।
शृण्वन्ती सत्कथां सम्यक्कर्मबन्धं समाच्छिनत् ॥ ११० ॥

अथ कालेन सा नारी समुत्सृज्यकलेवरम् । महेशानुचरैर्नीतासम्प्राप्ताशिवमन्दिरम्
तत्र देवैर्महादेवं सेव्यमानं सहोमया । गणेशनन्दिभृङ्गयाद्यैर्वीरभद्रेश्वरादिभिः ॥
उपास्यमानं गौरीशं कोटिसूर्यसमप्रभम् । त्रिलोचनं पञ्चमुखं नीलग्रीवं सदाशिवम्
वामाङ्के बिभ्रतं गौरींविद्युच्चन्द्रसमप्रभाम् । दृष्ट्वाससम्भ्रमं नारीसाप्रणम्यपुनःपुनः
आनन्दाश्रुजलोत्सिक्ता रोमहर्षसमाकुला । सम्मानिताकरुणया पार्वत्याशङ्करेण च
तस्मिंल्लोके परानन्दघनज्योतिषि शाश्वते । लब्ध्वानिवासमचलं लेभेसुखमनाहतम्
सा कदाचिदुमां देवीमुपसृत्यप्रणम्यच । पर्यपृच्छत मे भर्त्ता कां गतिं गतवानिति
तामुवाचमहादेवीसतेभर्त्ता दुराशयः । भुक्त्वा नरकदुःखानिविन्ध्येजातःपिशाचकः
पुनः पप्रच्छसानारी देवीं त्रिभुवनेश्वरीम् । केनोपायेन मे भर्त्ता सद्गतिंप्राप्नुयादिति

देव्युवाच

सोऽस्मत्कथां कदाचिच्छृणुयाद्यदि । निस्तीर्य दुर्गतिं सर्वामिमं लोकम्प्रयास्यति
इति गौर्यावचःश्रुत्वासानारीविहिताञ्जलिः । प्रार्थयामासतांदेवीं भर्तुःपापविशोधने
तया मुहुः प्रर्थ्यमाना पार्वती करुणायुता । तुम्बुरुं नाम गन्धर्वमाहूयेदमथाब्रवीत् ॥

तुम्बुरो! गच्छ भद्रं ते विन्ध्यशैलं सहानया ।
आस्ते पिशाचकस्तत्र योऽस्याः पतिरसन्मतिः ॥ १२३ ॥

तस्याग्रे परमां पुण्यां कथामस्मद्गुणैर्युताम् ।
आख्याय दुर्गतेर्मुक्तं तमानय शिवान्तिकम् ॥ १२४ ॥

इतिदेव्यासमादिष्टस्तुम्बुरुस्तां प्रणम्यच । तयासहविमानेनविन्ध्याद्रिं सहसाययौ
तत्रापश्यन्महाकायं रक्तनेत्रं महाहनुम् । प्रहसन्तं रुदन्तं च वल्गन्तञ्च पिशाचकम्
बलाद्गृहीत्वा तंपाशैर्बद्ध्वावैसंनिवेश्यच । तुम्बुरुर्वल्लकीहस्तोजगौ गौरीपतेःकथाम्
सपिशाचोमहापुण्यां कथांश्रुत्वापुरद्विषः । विधूयकलुषंसर्वंसत्ताहात्प्रापसंस्मृतिम्
सपैशाचंवपुस्त्यक्त्वास्वरूपं दिव्यमाप्यच । जगौस्वयमपि श्रीमच्चरितं पार्वतीपतेः

विमानमारुह्य स दिव्यरूपधृक्सः तुम्बुरुः पार्श्वगतः स्वकान्तया ।
गायन्महेशस्य गुणान्मनोरमाञ्जगाम कैवल्यपदं सनातनम् ॥ १३० ॥

सूत उवाच

इत्येतत्कथितं पुण्यमाख्यानं दुरितापहम् । महेश्वरप्रीतिकरं निर्मलज्ञानसाधनम् ॥
यइदंश्रृणुयान्मर्त्यः कीर्तयेद्वा समाहितः । शम्भोर्गुणानुकथनं विचित्रं पापनाशनम्
परमानन्दजनकं भवरोगमहौषधम् । भुक्त्वेह विविधान्भोगान्मुक्तोयातिपरांगतिम्

सूत उवाच

यूयं खलु महाभागाः कृतार्था मुनिसत्तमाः । ये सेवन्ते सदाशम्भोःकथामृतरसंनवम्

ते जन्मभाजः खलु जीवलोके येषां मनो ध्यायति विश्वनाथम् ।
वाणी गुणान्स्तौति कथां श्रृणोति श्रोत्रद्वयं ते भवमुत्तरन्ति ॥ १३५ ॥
विविधगुणविभेदैर्नित्यमस्पृष्टरूपं जगति च बहिरन्तर्वा समानं महिम्ना ।
स्वमहसि विहरन्तं वाङ्मनोवृत्तिदूरं परमशिवमनन्तानन्दसान्द्रं प्रपद्ये ॥ १३६

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे
पुराणश्रवणमहिमवर्णनं नाम द्वाविंशोऽध्यायः ॥ २२ ॥

——:०:——

समाप्तमिदं ब्रह्मोत्तरखण्डं ब्रह्मखण्डश्च ॥